# ॥ बृहदारण्यकोपनिषत् ॥

॥ बृहदारण्यकोपनिषत् ॥
काण्व पाठः ।

A मधु काण्ड [ उपदेश काण्ड]

अध्याय I ब्राह्मण i-vi मन्त्राः ८० 1-...

अध्याय II ब्राह्मण i-vi मन्त्राः ६६ 1-...

B मुनि [yaaj navalkya] काण्ड [ उपपत्ति काण्ड]

अध्याय III ब्राह्मण i-ix मन्त्राः ९२ 1-...

अध्याय IV ब्राह्मण i-vi मन्त्राः ९२ 1-...

C खिल काण्ड[ उपासना काण्ड]

अध्याय V ब्राह्मण i-xv मन्त्राः ३३ 1-...

अध्याय VI ब्राह्मण i-v मन्त्राः ७५ 1-...

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

अथ प्रथमोऽध्यायः ।

प्रथमं ब्राह्मणम् ।

मन्त्र १ [I.i.1]

उषा वा अश्वस्य मेध्यस्य शिरः ।
SF उषास् वै अश्वस्य मेध्यस्य शिरस्
सूर्यश्चक्षुर्
SF सूर्यस् चक्षुस्
वातः प्राणो
SF वातस् प्राणस्
व्यात्तमग्निर्वैश्वानरः
SF व्यात्तम् अग्निस् वैश्वानरस्
संवत्सर आत्माऽश्वस्य मेध्यस्य ।द्यौः पृष्ठम्
SF संवत्सरस् आत्मा अश्वस्य मेध्यस्य द्यौस् पृष्ठम्
अन्तरिक्षमुदरम्
SF अन्तरिक्षम् उदरम्
पृथिवी पाजस्यम्
SF पृथिवी पाजस्यम्
दिशः पार्श्वे
SF दिशस् पार्श्वे
अवान्तरदिशः पर्शव
SF अवान्तरदिशस् पर्शवस्
ऋतवोऽङ्गानि
SF ऋतवस् अङ्गानि
मासाश्चार्धमासाश्च पर्वाण्य्
SF मासास् च अर्धमासास् च पर्वाणि
अहोरात्राणि प्रतिष्ठा
SF अहोरात्राणि प्रतिष्ठा
नक्षत्राण्यस्थीनि
SF नक्षत्राणि अस्थीनि
नभो माꣳसान्य्
SF नभस् माꣳसानि
ऊवध्यꣳ सिकताः
SF ऊवध्यम् सिकतास्
सिन्धवो गुदा
SF सिन्धवस् गुदास्
यकृच्च क्लोमानश्च पर्वता
SF यकृत् च क्लोमानस् च पर्वतास्
ओषधयश्च वनस्पतयश्च लोमान्य्
SF ओषधयस् च वनस्पतयस् च लोमानि
उद्यन्पूर्वार्धो
SF उद्यन् पूर्वार्धस्
निम्लोचञ्जघनार्धो
SF निम्लोचन् जघनार्धस्
यद्विजृम्भते
SF यद् विजृम्भते
तद्विद्योतते
SF तद् विद्योतते
यद्विधूनुते
SF यद् विधूनुते

तत्स्तनयति
 SF तद् स्तनयति
यन्मेहति
 SF यद् मेहति
तद्वर्षति
 SF तद् वर्षति
वागेवास्य वाक् ॥१ ॥
 SF वाक् एव अस्य वाक्

मन्त्र २ [I.i.2]

अहर्वा अश्वं पुरस्तान्महिमाऽन्वजायत
 SF अहर्वै अश्वम् पुरस्ताद् महिमा अन्वजायत
तस्य पूर्वे समुद्रे योनी
 SF तस्य पूर्वे समुद्रे योनिस्
रात्रिरेनं पश्चान्महिमाऽन्वजायत
 SF रात्रिस् एनम् पश्चाद् महिमा अन्वजायत
तस्यापरे समुद्रे योनिर्
 SF तस्य अपरे समुद्रे योनिस्
एतौ वा अश्वं महिमानावभितः सम्बभूवतुर्
 SF एतौ वै अश्वम् महिमानौ अभितस् सम्बभूवतुः
हयो भूत्वा देवानवहद्
 SF हयस् भूत्वा देवान् अवहत्
वाजी गन्धर्वान्
 SF वाजी गन्धर्वान्
अर्वाऽसुरान्
 SF अर्वा असुरान्
अश्वो मनुष्यान्
 SF अश्वस् मनुष्यान्
समुद्र एवास्य बन्धुः
 SF समुद्रस् एव अस्य बन्धुस्
समुद्रो योनिः ॥ २ ॥ इति प्रथमं ब्राह्मणम् ॥
 SF समुद्रस् योनिस्

द्वितीयं ब्राह्मणम् ।

मन्त्र १ [I.ii.1]

नैवेह किंचनाग्र आसीन्
 SF न एव इह किम् चन अग्रे आसीत्
मृत्युनैवेदमावृतमासीदशनाययाऽशनाया हि मृत्युस्
 SF मृत्युना एव इदम् आवृतम् आसीत् अशनायया अशनाया हि मृत्युः
तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति ।
 SF तद् मनस् अकुरुत आत्मन्वी स्याम् इति
सोऽर्चन्नचरत्
 SF सस् अर्चन् अचरत्
तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति ।
 SF तस्य अर्चतस् आपस् अजायन्त अर्चते वै मे कम् अभूत् इति
तदेवार्क्यस्यार्कत्वं ।
 SF तद् एव अर्क्यस्य अर्कत्वम्
कꣳ ह वा अस्मै भवति
 SF कम् ह वै अस्मै भवति
य एवमेतदर्कस्यार्कत्वं वेद ॥१ ॥
 SF यस् एवम् एतद् अर्क्यस्य अर्कत्वम् वेद

मन्त्र २ [I.ii.2]

आपो वा अर्क
 SF अपस् वै अर्कः
तद्यदपाꣳ शर आसीत्
 SF तद् यद् अपाम् शरस् आसीत्
तत्समहन्यत ।
 SF तद् समहन्यत
सा पृथिव्यभवत्
 SF सा पृथिवी अभवत्
तस्यामश्राम्यत्
 SF तस्याम् अश्राम्यत्
तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः ॥ २ ॥
 SF तस्य श्रान्तस्य तप्तस्य तेजस् रसस् निरवर्तत अग्निस्

मन्त्र ३ [I.ii.3]

स त्रेधाऽऽत्मानं व्यकुरुताऽऽदित्यं तृतीयम्
 SF स त्रेधा आत्मानम् व्यकुरुत आदित्यम् तृतीयम्
वायुं तृतीयꣳ ।
 SF वायुम् तृतीयम्
स एष प्राणस्त्रेधा विहितस्
 SF स एष प्राणस् त्रेधाविहितः
तस्य प्राची दिक्छिरोऽसौ चासौ चेर्मौ
 SF तस्य प्राची दिक् शिरस् असौ च असौ च ईर्मौ
अथास्य प्रतीची दिक्पुच्छम्
 SF अथ अस्य प्रतीची दिक् पुच्छम्
असौ चासौ च सक्थ्यौ
 SF असौ च असौ च सक्थ्यौ
दक्षिणा चोदीची च पार्श्वे
 SF दक्षिणा च उदीची च पार्श्वे
द्यौः पृष्ठम्
 SF द्यौस् पृष्ठम्
अन्तरिक्षमुदरम्
 SF अन्तरिक्षम् उदरम्

इयमुरः
 SF इयम् उरस्
स एषोऽप्सु प्रतिष्ठितो
 SF स एषस् अप्सु प्रतिष्ठितस्
यत्र क्व चैति
 SF यत्र क्व च एति
तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥
 SF तद् एव प्रतितिष्ठति एवम् विद्वान्

मन्त्र ४ [I.ii.4]

सोऽकामयत
 SF सस् अकामयत
द्वितीयो म आत्मा जायेतेति ।
 SF द्वितीयस् मे आत्मा जायेत इति
स मनसा वाचं मिथुनꣳ समभवदशनाया मृत्युस्
 SF स मनसा वाचम् मिथुनम् समभवत् अशनायाम्
 मृत्युः
तद्यद्रेत आसीत्
 SF तद् यद् रेतस् आसीत्
स संवत्सरोऽभवन्
 SF स संवत्सरस् अभवत्
न ह पुरा ततः संवत्सर आस ।
 SF न ह पुरा ततस् संवत्सरस् आस
तमेतावन्तं कालमबिभर्यावान्संवत्सरस्
 SF तम् एतावन्तम् कालम् अबिभर्यावान् संवत्सरः
तमेतावतः कालस्य परस्तादसृजत ।
 SF तम् एतावतस् कालस्य परस्ताद् असृजत
तं जातमभिव्याददात्
 SF तम् जातम् अभिव्याददात्
स भाणकरोत्
 SF स भाण् अकरोत्
सैव वागभवत् ॥ ४ ॥
 SF सा एव वाग् अभवत्

मन्त्र ५ [I.ii.5]

स ऐक्षत
 SF सस् ऐक्षत
यदि वा इममभिमꣳस्ये
 SF यदि वै इमम् अभिमꣳस्ये
कनीयोऽन्नं करिष्य इति ।
 SF कनीयस् अन्नम् करिष्ये इति
स तया वाचा तेनाऽऽत्मनेदꣳ सर्वमसृजत
 SF स तया वाचा तेन आत्मना इदम् सर्वम् असृजत
यदिदं किञ्चर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान्
प्रजाः पशून्
 SF यद् इदम् किञ्च ऋचस् यजूꣳषि सामानि
 छन्दाꣳसि यज्ञान् प्रजाम् पशून्
स यद्यदेवासृजत
 SF स यत् यत् एव असृजत
तत्तदत्तुमध्रियत ।
 SF तत् तत् अत्तुम् अध्रियत
सर्वं वा अत्तीति
 SF सर्वम् वै अत्ति इति
तददितेरदितित्वꣳ ।
 SF तद् अदितेस् अदितित्वम्
सर्वस्यैतस्यात्ता भवति
 SF सर्वस्य अत्ता भवति
सर्वमस्यान्नं भवति
 SF सर्वम् अस्य अन्नम् भवति
य एवमेतददितेरदितित्वं वेद ॥ ५ ॥
 SF यस् एवम् एतद् अदितेस् अदितित्वम् वेद

मन्त्र ६ [I.ii.6]

सोऽकामयत
 SF सस् अकामयत
भूयसा यज्ञेन भूयो यजेयेति ।
 SF भूयसा यज्ञेन भूयस् यजेय इति
सोऽश्राम्यत्
 SF सस् अश्राम्यत्
स तपोऽतप्यत ।
 SF स तपस् अतप्यत
तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्
 SF तस्य श्रान्तस्य तप्तस्य यशस् वीर्यम् उदक्रामत्
प्राणा वै यशो वीर्यम् ।
 SF प्राणास् वै यशस् वीर्यम्
तत् प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत
 SF तद् प्राणेषु उत्क्रान्तेषु शरीरम् श्वयितुम् अध्रियत
तस्य शरीर एव मन आसीत् ॥ ६ ॥
 SF तस्य शरीरे एव मनस् आसीत्

मन्त्र ७ [I.ii.7]

सोऽकामयत
 SF सस् अकामयत
मेध्यं म इदꣳ स्याद्
 SF मेध्यम् मे इदम् स्यात्
आत्मन्व्यनेन स्यामिति ।
 SF आत्मन्वी अनेन स्याम् इति
ततोऽश्वः समभवद्

 SF ततस् अश्वस् समभवत्
यदश्वत्
 SF यद् अश्वत्
तन्मेध्यमभूदिति ।
 SF तद् मेध्यम् अभूत् इति
तदेवाश्वमेधस्याश्वमेधत्वम्
 SF तद् एव अश्वमेधस्य अश्वमेधत्वम्
एष ह वा अश्वमेधं वेद
 SF एष ह वै अश्वमेधम् वेद
य एनमेवं वेद ।
 SF यस् एनम् एवम् वेद
तमनवरुध्यैवामन्यत ।
 SF तम् अनवरुध्य इव अमन्यत
तꣳ संवत्सरस्य परस्तादात्मन आलभत ।
 SF तम् संवत्सरस्य परस्ताद् आत्मने आलभत
पशून्देवताभ्यः प्रत्यौहत्
 SF पशून् देवताभ्यस् प्रत्यौहत्
तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्त
 SF तस्माद् सर्वदेवत्यम् प्रोक्षितम् प्राजापत्यम् आलभन्ते
एष ह वा अश्वमेधो य एष तपति
 SF एष वै अश्वमेधस् यस् एष तपति
तस्य संवत्सर आत्माऽयमग्निरर्कस्
 SF तस्य संवत्सरस् आत्मा अयम् अग्निस् अर्कः
तस्येमे लोका आत्मानस्
 SF तस्य इमे लोकास् आत्मानः
तावेतावर्काश्वमेधौ ।
 SF तौ एतौ अर्काश्वमेधौ
सो पुनरेकैव देवता भवति
 SF स पुनरेका एव देवता भवति
मृत्युरेवाप पुनर्मृत्युं जयति
 SF मृत्युस् एव अप पुनर्मृत्युम् जयति
नैनं मृत्युराप्नोति
 SF न एनम् मृत्युस् आप्नोति
मृत्युरस्याऽऽत्मा भवत्य्
 SF मृत्युस् अस्य आत्मा भवति
एतासां देवतानामेको भवति ॥ ७ ॥ इति द्वितीयं ब्राह्मणम् ॥
 SF एतासाम् देवतानाम् एकस् भवति

तृतीयं ब्राह्मणम् ।

मन्त्र १ [I.iii.1]

द्वया ह प्राजापत्या
 SF द्वयास् ह प्राजापत्यास्
देवाश्चासुराश्च ।
 SF देवास् च असुरास् च
ततः कानीयसा एव देवा
 SF ततस् कानीयसास् एव देवास्
ज्यायसा असुरास्
 SF ज्यायसास् असुराः
त एषु लोकेष्वस्पर्धन्त ।
 SF ते एषु लोकेषु अस्पर्धन्त
ते ह देवा ऊचुर्
 SF ते ह देवास् ऊचुः
हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥
 SF हन्त असुरान् यज्ञे उद्गीथेन अत्ययाम इति

मन्त्र २ [I.iii.1]

ते ह वाचमूचुस्
 SF ते ह वाचम् ऊचुर्
त्वं न उद्गायेति ।
 SF त्वम् नस् उद्गाय इति
तथेति ।
 SF तथा इति
तेभ्यो वागुदगायद्
 SF तेभ्यस् वाक् उदगायत्
यो वाचि भोगस्तं देवेभ्य आगायद्
 SF यस् वाचि भोगस् तम् देवेभ्यस् आगायत्
यत्कल्याणं वदति तदात्मने ।
 SF यद् कल्याणम् वदति तद् आत्मने
ते विदुर्
 SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
 SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाऽविध्यन्
 SF तम् अभिद्रुत्य पाप्मना अविध्यन्
स यः स पाप्मा यदेवेदमप्रतिरूपं वदति
 SF स यस् स पाप्मा यद् एव इदम् अप्रतिरूपम् वदति
स एव स पाप्मा ॥ २ ॥
 SF सस् एव स पाप्मा

मन्त्र ३ [I.iii.3]

अथ ह प्राणमूचुस्
 SF अथ ह प्राणम् ऊचुर्
त्वं न उद्गायेति ।
 SF त्वम् नस् उद्गाय इति
तथेति ।
 SF तथा इति
तेभ्यः प्राण उदगायद्
 SF तेभ्यस् प्राणस् उदगायत्

यः प्राणे भोगस्तं देवेभ्य आगायद्
SF यस् प्राणे भोगस् तम् देवेभ्यस् आगायत्
यत्कल्याणं जिघ्रति तदात्मने ।
SF यद् कल्याणम् जिघ्रति तद् आत्मने
ते विदुर्
SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाऽविध्यन्
SF तम् अभिद्रुत्य पाप्मना अविध्यन्
स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति
SF स यस् स पाप्मा यद् एव इदम् अप्रतिरूपम् जिघ्रति
स एव स पाप्मा ॥ ३ ॥
SF सस् एव स पाप्मा

मन्त्र ४ [I.iii.4]

अथ ह चक्षुरूचुस्
SF अथ ह चक्षुस् ऊचुर्
त्वं न उद्गायेति ।
SF त्वम् नस् उद्गाय इति
तथेति ।
SF तथा इति
तेभ्यश्चक्षुरुदगायद्
SF तेभ्यस् चक्षुस् उदगायत्
यश्चक्षुषि भोगस्तं देवेभ्य आगायद्
SF यस् चक्षुषि भोगस् तम् देवेभ्यस् आगायत्
यत्कल्याणं पश्यति तदात्मने ।
SF यद् कल्याणम् पश्यति तद् आत्मने
ते विदुर्
SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाऽविध्यन्
SF तम् अभिद्रुत्य पाप्मना अविध्यन्
स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति
SF स यस् स पाप्मा यद् एव इदम् अप्रतिरूपम् पश्यति
स एव स पाप्मा ॥ ४ ॥
SF सस् एव स पाप्मा

मन्त्र ५ [I.iii.5]

अथ ह श्रोत्रमूचुस्
SF अथ ह श्रोत्रम् ऊचुर्
त्वं न उद्गायेति ।
SF त्वम् नस् उद्गाय इति
तथेति ।
SF तथा इति
तेभ्यः श्रोत्रमुदगायद्
SF तेभ्यस् श्रोत्रम् उदगायत्
यः श्रोत्रे भोगस्तं देवेभ्य आगायद्
SF यस् श्रोत्रे भोगस् तम् देवेभ्यस् आगायत्
यत्कल्याणꣳ शृणोति तदात्मने ।
SF यद् कल्याणम् शृणोति तद् आत्मने
ते विदुर्
SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाऽविध्यन्
SF तम् अभिद्रुत्य पाप्मना अविध्यन्
स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति
SF स यस् स पाप्मा यद् एव इदम् अप्रतिरूपम् शृणोति
स एव स पाप्मा ॥ ५ ॥
SF स एव स पाप्मा

मन्त्र ६ [I.iii.6]

अथ ह मन ऊचुस्
SF अथ ह मनस् ऊचुर्
त्वं न उद्गायेति ।
SF त्वम् नस् उद्गाय इति
तथेति ।
SF तथा इति
तेभ्यो मन उदगायद्
SF तेभ्यस् मनस् उदगायत्
यो मनसि भोगस्तं देवेभ्य आगायद्
SF यस् मनसि भोगस् तम् देवेभ्यस् आगायत्
यत्कल्याणꣳ सङ्कल्पयति तदात्मने ।
SF यद् कल्याणम् सङ्कल्पयति तद् आत्मने
ते विदुर्
SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाऽविध्यन्
SF तम् अभिद्रुत्य पाप्मना अविध्यन्
स यः स पाप्मा यदेवेदमप्रतिरूपꣳ सङ्कल्पयति
SF स यस् स पाप्मा यद् एव इदम् अप्रतिरूपम् सङ्कल्पयति
स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्
SF सस् एव स पाप्मा एवम् उ खलु एतास् देवतास्
पाप्मभिस् उपासृजन्
एवमेनाः पाप्मनाऽविध्यन् ॥ ६ ॥
SF एवम् एनास् पाप्मना अविध्यन्

मन्त्र ७ [I.iii.7]

अथ हेममासन्यं प्राणमूचुस्
 SF अथ ह इमम् आसन्यम् प्राणम् ऊचुर्
त्वं न उद्गायेति ।
 SF त्वम् नस् उद्गाय इति
तथेति ।
 SF तथा इति
तेभ्य एष प्राण उदगायत्
 SF तेभ्यस् एष प्राणस् उदगायत्
ते विदुर्
 SF ते अविदुः
अनेन वै न उद्गात्राऽत्येष्यन्तीति ।
 SF अनेन वै नस् उद्गात्रा अत्येष्यन्ति इति
तमभिद्रुत्य पाप्मनाविध्यन् ।
 SF तम् अभिद्रुत्य पाप्मना अविव्यत्सन्
स यथाश्मानमृत्वा लोष्टो विध्वꣳसेतैवꣳ हैव
विध्वꣳसमाना विष्वञ्चो विनेशुस्
 SF स यथा अश्मानम् ऋत्वा लोष्टस् विध्वꣳसेत एवम्
  ह एव विध्वꣳसमाना विष्वञ्चो विनेशुः
ततो देवा अभवन्
 SF ततस् देवास् अभवन्
पराऽसुराः ।
 SF पर असुरास्
भवत्यात्मना
 SF भवति आत्मना
पराऽस्य द्विषन्भ्रातृव्यो भवति
 SF पर अस्य द्विषन् भ्रातृव्यस् भवति
य एवं वेद ॥७ ॥
 SF य एवम् वेद

मन्त्र ८ [I.iii.8]

ते होचुः
 SF ते ह ऊचुर्
क्व नु सोऽभूद्
 SF क्व नु सस् अभूत्
यो न इत्थमसक्तेत्य्
 SF यस् नस् इत्थम् असक्त इति
अयमास्येऽन्तरिति
 SF अयम् आस्ये अन्तरिति
सोऽयास्य
 SF सस् अयास्यस्
आङ्गिरसो
 SF अङ्गिरसस्
ऽङ्गानाꣳ हि रसः ॥८ ॥
 SF अङ्गानाम् हि रसस्

मन्त्र ९ [I.iii.9]

सा वा एषा देवता दूर्नाम
 SF सा वै एषा देवता दूर्नाम
दूरꣳ ह्यस्या मृत्युर्
 SF दूरम् हि अस्यास् मृत्युस्
दूरꣳ ह वा अस्मान्मृत्युर्भवति
 SF दूरम् ह वै अस्माद् मृत्युस् भवति
य एवं वेद ॥९ ॥
 SF यस् एवम् वेद

मन्त्र १० [I.iii.10]

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य
 SF सा वै एषा देवता एतासाम् देवतानाम् पाप्मानम्
  मृत्युम् अपहत्य
यत्राऽऽसां दिशामन्तस्
 SF यत्र आसाम् दिशाम् अन्तः
तद्गमयां चकार
 SF तद् गमयाम् चकार
तदासां पाप्मनो विन्यदधात्
 SF तद् आसाम् पाप्मनस् विन्यदधात्
तस्मान्न जनमियान्
 SF तस्माद् न जनम् इयात्
नान्तमियान्
 SF न अन्तम् इयात्
नेत्पाप्मानं मृत्युमन्ववायानीति ॥१० ॥
 SF नेद् पाप्मानम् मृत्युम् अन्ववायानि इति

मन्त्र ११ [I.iii.11]

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना
मृत्युमत्यवहत् ॥११ ॥
 SF सा वै एषा देवता एतासाम् देवतानाम् पाप्मानम्
  मृत्युम् अपहत्य अथ एनास् मृत्युम् अत्यवहत्

मन्त्र १२ [I.iii.12]

स वै वाचमेव प्रथमामत्यवहत्
 SF सा वै वाचम् एव प्रथमाम् अत्यवहत्
सा यदा मृत्युमत्यमुच्यत
 SF सा यदा मृत्युम् अत्यमुच्यत
सोऽग्निरभवत्

SF सस् अग्निस् अभवत्
सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥१२ ॥
SF सस् अयम् अग्निस् परेण मृत्युम् अतिक्रान्तस् दीप्यते

मन्त्र १३ [I.iii.13]

अथ प्राणमत्यवहत्
SF अथ प्राणम् अत्यवहत्
स यदा मृत्युमत्यमुच्यत
SF स यदा मृत्युम् अत्यमुच्यत
स वायुरभवत्
SF स वायुस् अभवत्
सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥१३ ॥
SF सस् अयम् वायुस् परेण मृत्युम् अतिक्रान्तस् पवते

मन्त्र १४ [I.iii.14]

अथ चक्षुरत्यवहत्
SF अथ चक्षुस् अत्यवहत्
तद्यदा मृत्युमत्यमुच्यत
SF तद् यदा मृत्युम् अत्यमुच्यत
स आदित्योऽभवत्
SF स आदित्यस् अभवत्
सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥१४ ॥
SF सस् असौ आदित्यस् परेण मृत्युम् अतिक्रान्तस् तपति

मन्त्र १५ [I.iii.15]

अथ श्रोत्रमत्यवहत्
SF अथ श्रोत्रम् अत्यवहत्
तद्यदा मृत्युमत्यमुच्यत
SF तद् यदा मृत्युम् अत्यमुच्यत
ता दिशोऽभवꣳस्
SF तास् दिशस् अभवन्
ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥१५ ॥
SF तास् इमास् दिशस् परेण मृत्युम् अतिक्रान्तास्

मन्त्र १६ [I.iii.16]

अथ मनोऽत्यवहत्
SF अथ मनस् अत्यवहत्
तद्यदा मृत्युमत्यमुच्यत
SF तद् यदा मृत्युम् अत्यमुच्यत
स चन्द्रमा अभवत्
SF स चन्द्रमास् अभवत्
सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्य्
SF सस् असौ चन्द्रस् परेण मृत्युम् अतिक्रान्तस् भाति
एवꣳ ह वा एनमेषा देवता मृत्युमतिवहति
SF एवम् ह वै एनम् एषा देवता मृत्युम् अतिवहति
य एवं वेद ॥१६ ॥
SF यस् एवम् वेद

मन्त्र १७ [I.iii.17]

अथाऽऽत्मनेऽन्नाद्यमागायद्
SF अथ आत्मने अन्नाद्यम् आगायत्
यद्धि किञ्चान्नमद्यते
SF यद् धि किञ्च अन्नम् अद्यते
ऽनेनैव तदद्यत
SF अनेन एव तद् अद्यते
इह प्रतितिष्ठति ॥१७ ॥
SF इह प्रतितिष्ठति

मन्त्र १८ [I.iii.18]

ते देवा अब्रुवन्न्
SF ते देवास् अब्रुवन्
एतावद्वा इदꣳ सर्वं यदन्नम्
SF एतावत् वै इदम् सर्वम् यद् अन्नम्
तदात्मन आगासीर्
SF तद् आत्मने आगासीस्
अनु नोऽस्मिन्नन्न आभजस्वेति ।
SF अनु नस् अस्मिन् अन्ने आभजस्व इति
ते वै माऽभिसंविशतेति ।
SF ते वै मा अभिसंविशत इति
तथेति ।
SF तथा इति
तꣳ समन्तं परिण्यविशन्त ।
SF तम् समन्तम् परिण्यविशन्त
तस्माद्यदनेनान्नमत्ति
SF तस्माद् यद् अनेन अन्नम् अत्ति
तेनैतास्तृप्यन्त्य्
SF तेन एतास् तृप्यन्ति
एवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति
SF एवम् ह वै एनम् स्वास् अभिसंविशन्ति
भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्
SF भर्ता स्वानाम् श्रेष्ठस् पुरएता भवति अन्नादस् अधिपतिस्
य एवं वेद ।
SF यस् एवम् वेद
य उ हैवंविदꣳ स्वेषु प्रतिप्रतिर्बुभूषति
SF यस् उ ह एवंविदम् स्वेषु प्रतिप्रतिस् बुभूषति

न हैवालं भार्येभ्यो भवत्य्
SF न ह् एव अलम् भार्येभ्यस् भवति
अथ य एवैतमनुभवति
SF अथ यस् एव एतम् अनुभवति
यो वैतमनु भार्यान् बुभूर्षति
SF यस् वा एतम् अनु भार्यान्बुभूर्षति
स हैवालं भार्येभ्यो भवति ॥१८ ॥
SF स ह् एव अलम् भार्येभ्यस् भवति

मन्त्र १९ [I.iii.19]

सोऽयास्य आङ्गिरसो
SF सस् अयास्यस् आङ्गिरसस्
ऽङ्गानाꣳ हि रसः ।
SF अङ्गानाम् हि रसस्
प्राणो वा अङ्गानाꣳ रसः ।
SF प्राणस् वै अङ्गानाम् रसस्
प्राणो हि वा अङ्गानाꣳ रसस्
SF प्राणस् हि वै अङ्गानाम् रसः
तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति
SF तस्माद् यस्माद् कस्माच्च अङ्गाद् प्राणस् उत्क्रामति
तदेव तच्छुष्यत्य्
SF तद् एव तद् शुष्यति
एष हि वा अङ्गानाꣳ रसः ॥१९ ॥
SF एष हि वै अङ्गानाम् रसस्

मन्त्र २० [I.iii.20]

एष उ एव बृहस्पतिर्
SF एषस् उ एव बृहस्पतिस्
वाग्वै बृहती
SF वाक् वै बृहती
तस्या एष पतिस्
SF तस्यास् एष पतिः
तस्मादु बृहस्पतिः ॥२० ॥
SF तस्माद् उ बृहस्पतिस्

मन्त्र २१ [I.iii.21]

एष उ एव ब्रह्मणस्पतिर्
SF एषस् उ एव ब्रह्मणस्पतिस्
वाग्वै ब्रह्म
SF वाक् वै ब्रह्म
तस्या एष पतिस्
SF तस्यास् एष पतिः
तस्मादु ब्रह्मणस्पतिः ॥२१ ॥
SF तस्माद् उ ब्रह्मणस्पतिस्

मन्त्र २२ [I.iii.22]

एष उ एव साम
SF एषस् उ एव साम
वाग्वै सामैष सा चामश्चेति
SF वाक् वै साम एष सा च अमस् च इति
तत्साम्नः सामत्वं ।
SF तद् साम्नस् सामत्वम्
यद्वेव समः प्लुषिणा
SF यद् उ एव समस् प्लुषिणा
समो मशकेन
SF समस् मशकेन
समो नागेन
SF समस् नागेन
सम एभिस्त्रिभिर्लोकैः
SF समस् एभिस् त्रिभिस् लोकैस्
समोऽनेन सर्वेण
SF समस् अनेन सर्वेण
तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकताम्
SF तस्माद् उ एव साम अश्नुते साम्नस् सायुज्यम् सलोकताम्
य एवमेतत्साम वेद ॥२२ ॥
SF यस् एवम् एतद् साम वेद

मन्त्र २३ [I.iii.23]

एष उ वा उद्गीथः ।
SF एषस् उ वै उद्गीथस्
प्राणो वा उत्
SF प्राणस् वै उद्
प्राणेन हीदꣳ सर्वमुत्तब्धं ।
SF प्राणेन हि इदम् सर्वम् उत्तब्धम्
वागेव गीथोच्च गीथा चेति
SF वाक् एव गीथा उद् च गीथा च इति
स उद्गीथः ॥२३ ॥
SF स उद्गीथस्

मन्त्र २४ [I.iii.24]

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचायं
त्यस्य राजा मूर्धानं विपातयताद्
SF तद् ध अपि ब्रह्मदत्तस् चैकितानेयस् राजानम्
भक्षयन् उवाच अयम् त्यस्य राजा मूर्धानम्
विपातयतात्
यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति ।

SF यद् इतस् अयास्यस् आङ्गिरसस् अन्येन उदगायत् इति
वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥
SF वाचा च हि एव स प्राणेन च उदगायत् इति

मन्त्र २५ [I.iii.25]

तस्य हैतस्य साम्नो यः स्वं वेद
SF तस्य ह एतस्य साम्नस् यस् स्वम् वेद
भवति हास्य स्वम् ।
SF भवति ह अस्य स्वम्
तस्य वै स्वर एव स्वम् ।
SF तस्य वै स्वरस् एव स्वम्
तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत
SF तस्माद् आर्त्विज्यम् करिष्यन् वाचि स्वरम् इच्छेत
तया वाचा स्वरसम्पन्नयाऽऽर्त्विज्यं कुर्यात्
SF तया वाचा स्वरसम्पन्नया आर्त्विज्यम् कुर्यात्
तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एवाथो यस्य स्वं भवति ।
SF तस्माद् यज्ञे स्वरवन्तम् दिदृक्षन्ते एव अथ उ यस्य स्वम् भवति
भवति हास्य स्वम्
SF भवति ह अस्य स्वम्
य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥
SF यस् एवम् एतत् साम्नस् स्वम् वेद

मन्त्र २६ [I.iii.26]

तस्य हैतस्य साम्नो यः सुवर्णं वेद
SF तस्य ह एतस्य साम्नस् यस् सुवर्णम् वेद
भवति हास्य सुवर्णम् ।
SF भवति ह अस्य सुवर्णम्
तस्य वै स्वर एव सुवर्णम् ।
SF तस्य वै स्वरस् एव सुवर्णम्
भवति हास्य सुवर्णम्
SF भवति ह अस्य सुवर्णम्
य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥
SF यस् एवम् एतद् साम्नस् सुवर्णम् वेद

मन्त्र २७ [I.iii.27]

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद
SF तस्य ह एतस्य साम्नस् यस् प्रतिष्ठाम् वेद
प्रति ह तिष्ठति ।
SF प्रति ह तिष्ठति
तस्य वै वागेव प्रतिष्ठा
SF तस्य वै वाक् एव प्रतिष्ठा
वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयते
SF वाचि हि खलु एषस् एतद् प्राणस् प्रतिष्ठितस् गीयते
ऽन्न इत्यु हैक आहुः ॥ २७ ॥
SF अन्ने इति उ ह एके आहुर्

मन्त्र २८ [I.iii.28]

अथातः पवमानानामेवाभ्यारोहः ।
SF अथ अतस् पवमानानाम् एव अभ्यारोहस्
स वै खलु प्रस्तोता साम प्रस्तौति ।
SF स वै खलु प्रस्तोता साम प्रस्तौति
स यत्र प्रस्तुयात्
SF स यत्र प्रस्तुयात्
तदेतानि जपेद्
SF तद् एतानि जपेत्
असतो मा सद् गमय
SF असतस् मा सत् गमय
तमसो मा ज्योतिर्गमय
SF तमसस् मा ज्योतिस् गमय
मृत्योर्माऽमृतं गमयेति ।
SF मृत्योस् मा अमृतम् गमय इति
स यदाहासतो मा सद्गमयेति
SF स यद् आह असतस् मा सत् गमय इति
मृत्युर्वा असत्
SF मृत्युस् वै असत्
सदमृतम्
SF सत् अमृतम्
मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह ।
SF मृत्योस् मा अमृतम् गमय अमृतम् मा कुरु इति एव एतद् आह
तमसो मा ज्योतिर्गमयेति
SF तमसस् मा ज्योतिस् गमय इति
मृत्युर्वै तमो
SF मृत्युस् वै तमस्
ज्योतिरमृतम्
SF ज्योतिस् अमृतम्
मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह ।
SF मृत्योस् मा अमृतम् गमय अमृतम् मा कुरु इति एव एतद् आह
मृत्योर्मामृतं गमयेति
SF मृत्योस् मा अमृतम् गमय इति
नात्र तिरोहितमिवास्त्य्
SF न अत्र तिरोहितम् इव अस्ति
अथ यानीतराणि स्तोत्राणि
SF अथ यानि इतराणि स्तोत्राणि
तेष्वात्मनेऽन्नाद्यमागायेत्

 SF तेषु आत्मने अन्नाद्यम् आगायेत्
तस्मादु तेषु वरं वृणीत
 SF तस्माद् उ तेषु वरम् वृणीत
यं कामं कामयेत
 SF यम् कामम् कामयेत
तꣳ ।
 SF तम्
स एष एवंविदुद्गाताऽऽत्मने वा यजमानाय वा यं कामं कामयते
 SF सस् एषस् एवंविद् उद्गाता आत्मने वा यजमानाय वा
 यम् कामम् कामयते
तमागायति ।
 SF तम् आगायति
तद्धैतल्लोकजिदेव
 SF तद् ध एतद् लोकजित् एव
न हैवालोक्यताया आशास्ति
 SF न ह् एव अलोक्यतायास् आशा अस्ति
य एवमेतत्साम वेद ॥ २८ ॥ इति तृतीयं ब्राह्मणम् ॥
 SF यस् एवम् एतद् साम वेद

चतुर्थं ब्राह्मणम् ।

मन्त्र १ [I.iv.1]

आत्मैवेदमग्र आसीत्पुरुषविधः ।
 SF आत्मा एव इदम् अग्रे आसीत् पुरुषविधस्
सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्
 SF सस् अनुवीक्ष्य न अन्यद् आत्मनस् अपश्यत्
सोऽहमस्मीत्यग्रे व्याहरत्
 SF सस् अहम् अस्मि इति अग्रे व्याहरत्
ततोऽहंनामाभवत् ।
 SF ततस् अहंनाम अभवत्
तस्मादप्येतर्ह्यामन्त्रितो
 SF तस्माद् अपि एतर्हि आमन्त्रितस्
ऽहमयमित्येवाग्र उक्त्वाऽथान्यन्नाम प्रब्रूते यदस्य भवति ।
 SF अहम् अयम् इति एव अग्रे उक्त्वा अथ अन्यद् नाम प्रब्रूते
 यद् अस्य भवति
स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्
 SF स यद् पूर्वस् अस्माद् सर्वस्माद् सर्वान् पाप्मनस्
 औषत्
तस्मात्पुरुषः ।
 SF तस्माद् पुरुषस्
ओषति ह वै स तम्
 SF ओषति ह वै स तम्
योऽस्मात्पूर्वो बुभूषति
 SF यस् अस्माद् पूर्वस् बुभूषति
य एवं वेद ॥१ ॥
 SF यस् एवम् वेद

मन्त्र २ [I.iv.2]

सोऽबिभेत्
 SF सस् अबिभेत्
तस्मादेकाकी बिभेति ।
 SF तस्माद् एकाकी बिभेति
स हायमीक्षां चक्रे
 SF स ह् अयम् ईक्षाम् चक्रे
यन्मदन्यन्नास्ति
 SF यद् मद् अन्यद् न अस्ति
कस्मान्नु बिभेमीति ।
 SF कस्माद् नु बिभेमि इति
तत एवास्य भयं वीयाय ।
 SF ततस् एव अस्य भयम् वीयाय
कस्माद्ध्यभेष्यत्
 SF कस्माद् धि अभेष्यत्
द्वितीयाद्वै भयं भवति ॥ २ ॥
 SF द्वितीयाद् वै भयम् भवति

मन्त्र ३ [I.iv.3]

स वै नैव रेमे
 SF स वै न एव रेमे
तस्मादेकाकी न रमते ।
 SF तस्माद् एकाकी न रमते
स द्वितीयमैच्छत्
 SF स द्वितीयम् ऐच्छत्
स हैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ ।
 SF स ह् एतावान् आस यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ
स इममेवाऽऽत्मानं द्वेधाऽपातयत्।
 SF स इमम् एव आत्मानम् द्वेधा अपातयत्
ततः पतिश्च पत्नी चाभवताम् ।
 SF ततस् पतिस् च पत्नी च अभवताम्
तस्मादिदमर्धबृगलमिव स्व इति ह स्माऽऽह याज्ञवल्क्यस्
 SF तस्माद् इदम् अर्धबृगलम् इव स्वस् इति ह् स्म अह
 याज्ञवल्क्यः
तस्मादयमाकाशः स्त्रिया पूर्यत एव ।
 SF तस्माद् अयम् आकाशस् स्त्रिया पूर्यते एव
ताꣳ समभवत्
 SF ताम् समभवत्
ततो मनुष्या अजायन्त ॥ ३ ॥
 SF ततस् मनुष्यास् अजायन्त

मन्त्र ४ [I.iv.4]

सो हेयमीक्षां चक्रे
SF सा उ ह इयम् ईक्षाम् चक्रे
कथं नु माऽऽत्मन एव जनयित्वा सम्भवति ।
SF कथम् नु मा आत्मनस् एव जनयित्वा सम्भवति
हन्त तिरोऽसानीति ।
SF हन्त तिरस् असानि इति
सा गौरभवद्
SF सा गौस् अभवत्
ऋषभ इतरस्
SF वृषभस् इतरः
ताँ समेवाभवत्
SF ताम् सम् एव अभवत्
ततो गावोऽजायन्त ।
SF ततस् गावस् अजायन्त
वडवेतराऽभवद्
SF वडवा इतरा अभवत्
अश्ववृष इतरो
SF अश्ववृषस् इतरस्
गर्दभीतरा
SF गर्दभी इतरा
गर्दभ इतरस्
SF गर्दभस् इतरः
ताँ समेवाभवत्
SF ताम् सम् एव अभवत्
तत एकशफमजायत
SF तत एकशफम् अजायत
अजेतराऽभवद्
SF अजा इतरा अभवत्
वस्त इतरो
SF बस्तस् इतरस्
ऽविरितरा
SF अविस् इतरा
मेष इतरस्
SF मेषस् इतरः
ताँ समेवाभवत्
SF ताम् सम् एव अभवत्
ततोऽजावयोऽजायन्तैवमेव यदिदं किञ्च मिथुनमा पिपीलिकाभ्यस्
SF ततस् अजावयस् अजायन्त एवम् एव यद् इदम् किञ्च मिथुनम् आ पिपीलिकाभ्यः
तत्सर्वमसृजत ॥ ४ ॥
SF तद् सर्वम् असृजत

मन्त्र ५ [I.iv.5]

सोऽवेद्
SF सस् अवेत्
अहं वाव सृष्टिरस्म्य्
SF अहम् वाव सृष्टिस् अस्मि
अहँ हीदँ सर्वमसृक्षीति ।
SF अहम् हि इदम् सर्वम् असृक्षि इति
ततः सृष्टिरभवत्
SF ततस् सृष्टिस् अभवत्
सृष्ट्याँ हास्यैतस्यां भवति
SF सृष्ट्याम् ह अस्य एतस्याम् भवति
य एवं वेद ॥ ५ ॥
SF यस् एवम् वेद

मन्त्र ६ [I.iv.6]

अथेत्यभ्यमन्थत्
SF अथ इति अभ्यमन्थत्
स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत ।
SF स मुखाद् च योनेस् हस्ताभ्याम् च अग्निम् असृजत
तस्मादेतदुभयमलोमकमन्तरतो
SF तस्माद् एतद् उभयम् अलोमकम् अन्तरतस्
ऽलोमका हि योनिरन्तरतस्
SF अलोमका हि योनिस् अन्तरतस्
तद्यदिदमाहुर्
SF तद् यद् इदम् आहुः
अमुं यजामुं यजेत्येकैकं देवम्
SF अमुम् यज अमुम् यज इति एकैकम् देवम्
एतस्यैव सा विसृष्टिर्
SF एतस्य एव सा विसृष्टिः
एष उ ह्येव सर्वे देवा
SF एषस् उ हि एव सर्वे देवास्।
अथ यत्किञ्चेदमार्द्रम्
SF अथ यद् किञ्च इदम् आर्द्रम्
तद्रेतसोऽसृजत
SF तद् रेतसस् असृजत
तदु सोमः ।
SF तद् उ सोमस्
एतावद्वा इदँ सर्वमन्नं चैवान्नादश्च
SF एतावत् वै इदम् सर्वम् अन्नम् च एव अन्नदस् च
सोम एवान्नम्
SF सोम एव अन्नम्
अग्निरन्नादः ।
SF अग्निस् अन्नादस्
सैषा ब्रह्मणोऽतिसृष्टिर्
SF सा एषा ब्रह्मणस् अतिसृष्टिस्
यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत
SF यद् श्रेयसस् देवान् असृजत अथ यद् मर्त्यस् सन्

अमृतान् असृजत
तस्मादतिसृष्टिर्
SF तस्माद् अतिसृष्टिस्
अतिसृष्ट्याꣳ हास्यैतस्यां भवति
SF अतिसृष्ट्याम् ह अस्य एतस्याम् भवति
य एवं वेद ॥ ६ ॥
SF यस् एवम् वेद

मन्त्र ७ [I.iv.7]

तद्धेदं तर्ह्यव्याकृतमासीत्
SF तद् ध इदम् तर्हि अव्याकृतम् आसीत्
तन्नामरूपाभ्यामेव व्याक्रियतासौ नामाऽयमिदꣳरूप इति ।
SF तद् नामरूपाभ्याम् एव व्याक्रियत असौ नाम अयम् इदꣳरूपस् इति
तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदꣳरूप इति ।
SF तद् इदम् अपि एतर्हि नामरूपाभ्याम् एव व्याक्रियते असौ नाम अयम् इदꣳरूपस् इति
स एष इह प्रविष्ट आ नखाग्रेभ्यो
SF सस् एषस् इह प्रविष्ट आ नखाग्रेभ्यस्
यथा क्षुरः क्षुरधानेऽवहितः स्याद्
SF यथा क्षुरस् क्षुरधाने अवहितस् स्यात्
विश्वम्भरो वा विश्वम्भरकुलाये
SF विश्वम्भरस् वा विश्वम्भरकुलाये
तं न पश्यन्त्य्
SF तम् न पश्यन्ति
अकृत्स्नो हि सः
SF अकृत्स्नस् हि सस्
प्राणन्नेव प्राणो नाम भवति
SF प्राणन् एव प्राणस् नाम भवति
वदन्वाक्
SF वदन् वाक्
पश्यंश्चक्षुः
SF पश्यन् चक्षुस्
शृण्वञ्छ्रोत्रम्
SF शृण्वन् श्रोत्रम्
मन्वानो मनस्
SF मन्वानस् मनः
तान्यस्यैतानि कर्मनामान्येव ।
SF तानि अस्य एतानि कर्मनामानि एव
स योऽत एकैकमुपास्ते
SF स यस् अतस् एकैकम् उपास्ते
न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्य्
SF न स वेद अकृत्स्नस् हि एषस् अतस् एकैकेन भवति
आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति ।
SF आत्मा इति एव उपासीत अत्र हि एते सर्वे एकम् भवन्ति
तदेतत्पदनीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत्सर्वं वेद ।
SF तद् एतद् पदनीयम् अस्य सर्वस्य यद् अयम् आत्मा अनेन हि एतद् सर्वम् वेद
यथा ह वै पदेनानुविन्देद्
SF यथा ह वै पदेन अनुविन्देत्
एवं कीर्तिꣳ श्लोकं विन्दते
SF एवम् कीर्तिम् श्लोकम् विन्दते
य एवं वेद ॥ ७ ॥
SF यस् एवम् वेद

मन्त्र ८ [I.iv.8]

तदेतत्प्रेयः पुत्रात्
SF तद् एतद् प्रेयस् पुत्राद्
प्रेयो वित्तात्
SF प्रेयस् वित्ताद्
प्रेयोऽन्यस्मात् सर्वस्माद्
SF प्रेयस् अन्यस्माद् सर्वस्माद्
अन्तरतरम्
SF अन्तरतरम्
यदयमात्मा ।
SF यद् अयम् आत्मा
स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्
SF स यस् अन्यम् आत्मनस् प्रियम् ब्रुवाणम् ब्रूयात्
प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव स्याद्
SF प्रियम् रोत्स्यति इति ईश्वरस् ह तथा एव स्यात्
आत्मानमेव प्रियमुपासीत ।
SF आत्मानम् एव प्रियम् उपासीत
स य आत्मानमेव प्रियमुपास्ते
SF स यस् आत्मानम् एव प्रियम् उपास्ते
न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥
SF न ह अस्य प्रियम् प्रमायुकम् भवति

मन्त्र ९ [I.iv.9]

तदाहुर्
SF तद् आहुः
यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते
SF यद् ब्रह्मविद्यया सर्वम् भविष्यन्तस् मनुष्यास् मन्यन्ते
किमु तद्ब्रह्मावेद्
SF किम् उ तद् ब्रह्म अवेत्
यस्मात्तत्सर्वमभवदिति ॥ ९ ॥
SF यस्मात् तद् सर्वम् अभवत् इति

मन्त्र १० [I.iv.10]

ब्रह्म वा इदमग्र आसीत्
SF ब्रह्म वै इदम् अग्रे आसीत्
तदात्मानमेवावेद्
SF तद् आत्मानम् एव अवेत्
अहं ब्रह्मास्मीति ।
SF अहम् ब्रह्म अस्मि इति
तस्मात्तत्सर्वमभवत्
SF तस्माद् तद् सर्वम् अभवत्
तद्यो यो देवानां प्रत्यबुध्यत
SF तद् यस् यस् देवानाम् प्रत्यबुध्यत
स एव तदभवत्
SF सस् एव तद् अभवत्
तथर्षीणाम्
SF तथा ऋषीनाम्
तथा मनुष्याणाम् ।
SF तथा मनुष्याणाम्
तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे
SF तद् ध एतद् पश्यन् ऋषिस् वामदेवस् प्रतिपेदे
ऽहं मनुरभवꣳ सूर्यश्चेति ।
SF अहम् मनुस् अभवम् सूर्यस् च इति
तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति
SF तद् इदम् अपि एतर्हि यस् एवम् वेद अहम् ब्रह्म अस्मि इति
स इदꣳ सर्वं भवति
SF स इदम् सर्वम् भवति
तस्य ह न देवाश्चनाभूत्या ईशत
SF तस्य ह न देवास् चन अभूत्यास् ईशते
आत्मा ह्येषाꣳ स भवत्य्
SF आत्मा हि एषाम् स भवति
अथ योऽन्यां देवतामुपास्ते
SF अथ यस् अन्याम् देवताम् उपास्ते
ऽन्योऽसाव्
SF अन्यस् असौ
अन्योऽहमस्मीति
SF अन्यस् अहम् अस्मि इति
न स वेद ।
SF न स वेद
यथा पशुरेवꣳ स देवानाम् ।
SF यथा पशुस् एवम् स देवानाम्
यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युर्
SF यथा ह वै बहवस् पशवस् मनुष्यम् भुञ्ज्युः
एवमेकैकः पुरुषो देवान्भुनक्त्य्
SF एवम् एकैकस् पुरुषस् देवान् भुनक्ति
एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति
SF एकस्मिन् एव पशौ आदीयमाने अप्रियम् भवति
किमु बहुषु
SF किम् उ बहुषु
तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥१० ॥
SF तस्माद् एषाम् तद् न प्रियम् यद् एतद्
मनुष्यास् विद्युर्

मन्त्र ११ [I.iv.11]

ब्रह्म वा इदमग्र आसीदेकमेव ।
SF ब्रह्म वै इदम् अग्रे आसीत् एकम् एव
तदेकꣳ सन्न व्यभवत्
SF तद् एकम् सन् न व्यभवत्
तच्छ्रेयो रूपमत्यसृजत क्षत्रम्
SF तद् श्रेयस् रूपम् अत्यसृजत क्षत्रम्
यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति ।
SF यानि एतानि देवत्रा क्षत्राणि इन्द्रस् वरुणस् सोमस् रुद्रस् पर्जन्यस् यमस् मृत्युस् ईशानस् इति
तस्मात्क्षत्रात्परं नास्ति
SF तस्माद् क्षत्राद् परम् न अस्ति
तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये ।
SF तस्माद् ब्राह्मणस् क्षत्रियम् अधस्ताद् उपास्ते राजसूये
क्षत्र एव तद्यशो दधाति
SF क्षत्रे एव तद् यशस् दधाति
सैषा क्षत्रस्य योनिर्यद्ब्रह्म ।
SF सा एषा क्षत्रस्य योनिस् यद् ब्रह्म
तस्माद्यद्यपि राजा परमतां गच्छति
SF तस्माद् यदि अपि राजा परमताम् गच्छति
ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम् ।
SF ब्रह्म एव अन्ततस् उपनिश्रयति स्वाम् योनिम्
य उ एनꣳ हिनस्ति
SF यस् उ एनम् हिनस्ति
स्वाꣳ स योनिमृच्छति ।
SF स्वाम् स योनिमृच्छति
स पापीयान्भवति
SF स पापीयान् भवति
यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥११ ॥
SF यथा श्रेयाꣳसम् हिꣳसित्वा

मन्त्र १२ [I.iv.12]

स नैव व्यभवत्
SF स न एव व्यभवत्
स विशमसृजत

 SF स विशम् असृजत
यान्येतानि देवजातानि गणश आख्यायन्ते
 SF यानि एतानि देवजातानि गणशस् आख्यायन्ते
वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥१२ ॥
 SF वसवस् रुद्रास् आदित्यास् विश्वे देवास् मरुतस् इति

मन्त्र १३ [I.iv.13]

स नैव व्यभवत्
 SF स न एव व्यभवत्
स शौद्रं वर्णमसृजत पूषणम्
 SF स शौद्रम् वर्णम् असृजत पूषणम्
इयं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किञ्च ॥
१३ ॥
 SF इयम् वै पूषा इयम् हि इदम् सर्वम् पुष्यति यद्
 इदम् किञ्च

मन्त्र १४ [I.iv.14]

स नैव व्यभवत्
 SF स न एव व्यभवत्
तच्छ्रेयो रूपमत्यसृजत धर्मम् ।
 SF तद् श्रेयस् रूपम् अत्यसृजत धर्मम्
तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्
 SF तद् एतत् क्षत्रस्य क्षत्रम् यद् धर्मः
तस्माद्धर्मात् परं नास्त्य्
 SF तस्माद् धर्माद् परम् न अस्ति
अथो अबलीयान् बलीयाꣳसमाशꣳसते धर्मेण यथा
राज्ञैवम् ।
 SF अथ उ अबलीयान् बलीयाꣳसम् आशꣳसते धर्मेण
 यथा राज्ञा एवम्
यो वै स धर्मः
 SF यस् वै स धर्मस्
सत्यं वै तत्
 SF सत्यम् वै तद्
तस्मात्सत्यं वदन्तमाहुर्
 SF तस्माद् सत्यम् वदन्तम् आहुः
धर्मं वदतीति
 SF धर्मम् वदति इति
धर्मं वा वदन्तꣳ
 SF धर्मम् वा वदन्तम्
सत्यं वदतीत्य्
 SF सत्यम् वदति इति
एतद्ध्येवैतदुभयं भवति ॥१४ ॥
 SF एतद् धि एव एतद् उभयम् भवति

मन्त्र १५ [I.iv.15]

तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्
 SF तद् एतद् ब्रह्म क्षत्रम् विट् शूद्रः
तदग्निनैव देवेषु ब्रह्माभवद्
 SF तद् अग्निना एव देवेषु ब्रह्म अभवत्
ब्राह्मणो मनुष्येषु
 SF ब्राह्मणस् मनुष्येषु
क्षत्रियेण क्षत्रियो
 SF क्षत्रियेण क्षत्रियस्
वैश्येन वैश्यः
 SF वैश्येन वैश्यस्
शूद्रेण शूद्रस्
 SF शूद्रेण शूद्रः
तस्मादग्नावेव देवेषु लोकमिच्छन्ते
 SF तस्माद् अग्नौ एव देवेषु लोकम् इच्छन्ते
ब्राह्मणे मनुष्येष्व्
 SF ब्राह्मणे मनुष्येषु
एताभ्याꣳ हि रूपाभ्यां ब्रह्माभवद्
 SF एताभ्याम् हि रूपाभ्याम् ब्रह्म अभवत्
अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति
 SF अथ यस् ह वै अस्माद् लोकाद् स्वम् लोकम् अदृष्ट्वा
 प्रैति
स एनमविदितो न भुनक्ति
 SF स एनम् अविदितस् न भुनक्ति
यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतम् ।
 SF यथा वेदस् वा अननूक्तस् अन्यद् वा कर्म अकृतम्
यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति
 SF यदि ह वै अपि अनेवंविद् महत्पुण्यम् कर्म करोति
तद्धास्यान्ततः क्षीयत एवाऽऽत्मानमेव लोकमुपासीत ।
 SF तद् ध अस्य अन्ततस् क्षीयते एव आत्मानमेव लोकम्
 उपासीत
स य आत्मानमेव लोकमुपास्ते
 SF सयस् आत्मानम् एव लोकम् उपास्ते
न हास्य कर्म क्षीयते
 SF न ह अस्य कर्म क्षीयते
ऽस्माद्ध्येवाऽऽत्मनो यद्यत्कामयते
 SF अस्माद् धि एव आत्मनस् यत् यत् कामयते
तत्तत्सृजते ॥१५ ॥
 SF तद् तद् सृजते

मन्त्र १६ [I.iv.16]

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः
 SF अथ उ अयम् वै आत्मा सर्वेषाम् भूतानाम् लोकस्
स यज्जुहोति

SF स यद् जुहोति
यद्यजते तेन देवानां लोको
SF यद् यजते तेन देवानाम् लोकस्
ऽथ यदनुब्रूते
SF अथ यद् अनुब्रूते
तेन ऋषीणाम्
SF तेन ऋषीणाम्
अथ यत् पितृभ्यो निपृणाति
SF यद् पितृभ्यस् निपृणाति
अथ यत्प्रजामिच्छते
SF अथ यद् प्रजाम् इच्छते
तेन पितृणाम्
SF तेन पित्र्णाम्
अथ यन्मनुष्यान्वासयते
SF अथ यद् मनुष्यान् वासयते
यदेभ्योऽशनं ददाति
SF यद् एभ्यस् अशनम् ददाति
तेन मनुष्याणाम्
SF तेन मनुष्याणाम्
अथ यत्पशुभ्यस्तृणोदकं विन्दति
SF अथ यद् पशुभ्यस् तृणोदकम् विन्दति
तेन पशूनाम्
SF तेन पशूनाम्
यदस्य गृहेषु श्वापदा वयाꣳस्या पिपीलिकाभ्य उपजीवन्ति
SF यद् अस्य गृहेषु श्वापदास् वयाꣳसि आ
पिपीलिकाभ्यस् उपजीवन्ति
तेन तेषां लोको
SF तेन तेषाम् लोकस्
यथा ह वै स्वाय लोकायारिष्टिमिच्छेद्
SF यथा ह वै स्वाय लोकाय अरिष्टिम् इच्छेत्
एवꣳ हैवंविदे सर्वदा सर्वाणि भूतान्यरिष्टिमिच्छन्ति ।
SF एवम् ह एवंविदे सर्वदा सर्वाणि भूतानि अरिष्टिम्
इच्छन्ति
तद्वा एतद्विदितं मीमाꣳसितम् ॥१६ ॥
SF तद् वै एतद् विदितम् मीमाꣳसितम्

मन्त्र १७ [I.iv.17]

आत्मैवेदमग्र आसीद्
SF आत्मा एव इदम् अग्रे आसीत्
एक एव ।
SF एकस् एव
सोऽकामयत
SF सस् अकामयत
जाया मे स्याद्
SF जाया मे स्यात्
अथ प्रजायेयाथ वित्तं मे स्यात्
SF अथ प्रजायेय अथ वित्तम् मे स्यात्
अथ कर्म कुर्वीयेत्य्
SF अथ कर्म कुर्वीय इति
एतावान्वै कामो नेच्छꣳश्चनातो भूयो विन्देत्
SF एतावान् वै कामस् न इच्छन् चन अतस् भूयस्
विन्देत्
तस्मादप्येतर्ह्येकाकी कामयते
SF तस्माद् अपि एतर्हि एकाकी कामयते
जाया मे स्याद्
SF जाया मे स्यात्
अथ प्रजायेयाथ वित्तं मे स्याद्
SF अथ प्रजायेय अथ वित्तम् मे स्यात्
अथ कर्म कुर्वीयेति ।
SF अथ कर्म कुर्वीय इति
स यावदप्येतेषामेकैकं न प्राप्नोत्य्
SF स यावत् अपि एतेषाम् एकैकम् न प्राप्नोति
अकृत्स्न एव तावन् मन्यते ।
SF अकृत्स्नस् एव तावन्मन्यते
तस्यो कृत्स्नता ।
SF तस्य उ कृत्स्नता
मन एवास्याऽऽत्मा
SF मनस् एव अस्य आत्मा
वाग्जाया
SF वाक् जाया
प्राणः प्रजा
SF प्राणस् प्रजा
चक्षुर्मानुषं वित्तम्
SF चक्षुस् मानुषम् वित्तम्
चक्षुषा हि तद्विन्दते
SF चक्षुषा हि तद् विन्दति
श्रोत्रं दैवꣳ
SF श्रोत्रम् दैवम्
श्रोत्रेण हि तच्छृणोत्य्
SF श्रोत्रेण हि तद् शृणोति
आत्मैवास्य कर्माऽऽत्मना हि कर्म करोति ।
SF आत्मा एव अस्य कर्म आत्मना हि कर्म करोति
स एष पाङ्क्तो यज्ञः
SF सस् एष पाङ्क्तस् यज्ञस्
पाङ्क्तः पशुः
SF पाङ्क्तस् पशुस्
पाङ्क्तः पुरुषः
SF पाङ्क्तस् पुरुषस्
पाङ्क्तमिदꣳ सर्वं यदिदं किञ्च ।
SF पाङ्क्तम् इदम् सर्वम् यद् इदम् किञ्च
तदिदꣳ सर्वमाप्नोति

 SF तद् इदम् सर्वम् आप्नोति
य एवं वेद ॥१७ ॥ इति चतुर्थं ब्राह्मणम् ॥
 SF यस् एवम् वेद

पञ्चमं ब्राह्मणम् ।

मन्त्र १ [I.v.1]

यत्सप्तान्नानि मेधया
 SF यद् सप्त अन्नानि मेधया
तपसाऽऽजनयत्पिता ।
 SF तपसा अजनयत् पिता
एकमस्य साधारणम्
 SF एकम् अस्य साधारणम्
द्वे देवानभाजयत् ॥
 SF द्वे देवान् अभाजयत्
त्रीण्यात्मनेऽकुरुत
 SF त्रीणि आत्मने अकुरुत
पशुभ्य एकं प्रायच्छत्।
 SF पशुभ्यस् एकम् प्रायच्छत्
तस्मिन्त्सर्वं प्रतिष्ठितम्
 SF तस्मिन् सर्वम् प्रतिष्ठितम्
यच्च प्राणिति यच्च न ॥
 SF यच्च प्राणिति यच्च न
कस्मात्तानि न क्षीयन्ते
 SF कस्माद् तानि न क्षीयन्ते
ऽद्यमानानि सर्वदा ।
 SF अद्यमानानि सर्वदा
यो वै तामक्षितिं वेद
 SF यस् वै ताम् अक्षितिम् वेद
सोऽन्नमत्ति प्रतीकेन
 SF सस् अन्नम् अत्ति प्रतीकेन
स देवानपिगच्छति
 SF स देवान् अपिगच्छति
स ऊर्जमुपजीवतीति श्लोकाः ॥१ ॥
 SF सस् ऊऋजम् उपजीवति इति श्लोकास्

मन्त्र २ [I.v.1]

यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति
 SF यद् सप्त अन्नानि मेधया तपसा अजनयत् पिता इति
मेधया हि तपसाजनयत् पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नम्
 SF मेधया हि तपसा अजनयत् पिता एकम् अस्य साधारणम् इति इदम् एव अस्य तद् साधारणम् अन्नम्
यदिदमद्यते ।
 SF यद् इदम् अद्यते
स य एतदुपास्ते
 SF स यस् एतद् उपास्ते
न स पाप्मनो व्यावर्तते
 SF न स पाप्मनस् व्यावर्तते
मिश्रꣳ ह्येतत् ।
 SF मिश्रम् हि एतद्
द्वे देवानभाजयदिति
 SF द्वे देवानभाजयत् इति
हुतं च प्रहुतं च
 SF हुतम् च प्रहुतम् च
तस्माद् देवेभ्यो जुह्वति च प्र च जुह्वत्य्
 SF तस्माद् देवेभ्यस् जुह्वति च प्र च जुह्वति
अथो आहुर्
 SF अथ उ आहुः
दर्शपूर्णमासाविति ।
 SF दर्शपूर्णमासौ इति
तस्मान्नेष्टियाजुकः स्यात् ।
 SF तस्माद् न इष्टियाजुकस् स्यात्
पशुभ्य एकं प्रायच्छदिति
 SF पशुभ्यस् एकम् प्रायच्छत् इति
तत्पयः ।
 SF तद् पयस्
पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति ।
 SF पयस् हि एव अग्रे मनुष्यास् च पशवस् च उपजीवन्ति
तस्मात् कुमारं जातं घृतं वै वाग्रे प्रतिलेहयन्ति
 SF तस्माद् कुमारम् जातम् घृतम् वा एव अग्रे प्रतिलेहयन्ति
स्तनं वाऽनुधापयन्त्य्
 SF स्तनम् वा अनुधापयन्ति
अथ वत्सं जातमाहुर्
 SF अथ वत्सम् जातम् आहुः
अतृणाद इति ।
 SF अतृणादस् इति
तस्मिन्सर्वं प्रतिष्ठितं
 SF तस्मिन् सर्वम् प्रतिष्ठितम्
यच्च प्राणिति यच्च नेति
 SF यच्च प्राणिति यच्च न इति
पयसि हीदꣳ सर्वं प्रतिष्ठितम्
 SF पयसि हि इदम् सर्वम् प्रतिष्ठितम्
यच्च प्राणिति यच्च न ।
 SF यच्च प्राणिति यच्च न
तद्यदिदमाहुः
 SF तद् यद् इदम् आहुर्
संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति
 SF संवत्सरम् पयसा जुह्वत् अप पुनर्मृत्युम् जयति इति

न तथा विद्याद्
 SF न तथा विद्यात्
यदह्नेव जुहोति
 SF यद् अह्नेव जुहोति
तदहः पुनर्मृत्युमपजयत्येवं विद्वान्
 SF तद् अहर् पुनर्मृत्युम् अपजयति एवम् विद्वान्
सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति ।
 SF सर्वम् हि देवेभ्यस् अन्नाद्यम् प्रयच्छति
कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति
 SF कस्माद् तानि न क्षीयन्ते अद्यमानानि सर्वदा इति
पुरुषो वा अक्षितिः
 SF पुरुषस् वै अक्षितिस्
स हीदमन्नं पुनः पुनर्जनयते ।
 SF स हि इदम् अन्नम् पुनः पुनः जनयते
यो वै तामक्षितिं वेदेति
 SF यस् वै ताम् अक्षितिम् वेद इति
पुरुषो वा अक्षितिः ।
 SF पुरुषस् वै अक्षितिस्
स हीदमन्नं धिया धिया जनयते कर्मभिर्
 SF स हि इदम् अन्नम् धिया धिया जनयते कर्मभिस्
यद्धैतन्न कुर्यात्
 SF यद् ध एतद् न कुर्यात्
क्षीयेत ह ।
 SF क्षीयेत ह
सोऽन्नमत्ति प्रतीकेनेति
 SF सस् अन्नम् अत्ति प्रतीकेन इति
मुखं प्रतीकम्
 SF मुखम् प्रतीकम्
मुखेनेत्येतत्
 SF मुखेन इति एतद्
स देवानपिगच्छति
 SF स देवान् अपिगच्छति
स ऊर्जमुपजीवतीति प्रशꣳसा ॥ २ ॥
 SF सस् ऊर्जम् उपजीवति इति प्रशꣳसा

मन्त्र ३ [I.v.3]

त्रीण्यात्मनेऽकुरुतेति
 SF त्रीणि आत्मने अकुरुत इति
मनो वाचं प्राणम्
 SF मनस् वाचम् प्राणम्
तान्यात्मनेऽकुरुतान्यत्रमना अभूवम्
 SF तानि आत्मने अकुरुत अन्यत्रमनास् अभूवम्
नादर्शम्
 SF न अदर्शम्
अन्यत्रमना अभूवम्
 SF अन्यत्रमनास् अभूवम्
नाश्रौषमिति
 SF न अश्रौषम् इति
मनसा ह्येव पश्यति
 SF मनसा हि एव पश्यति
मनसा शृणोति ।
 SF मनसा शृणोति
कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ।
 SF कामस् सङ्कल्पस् विचिकित्सा श्रद्धा अश्रद्धा
 धृतिस् अधृतिस् ह्रीस् धीस् भीस् इति एतद्
 सर्वम् मनस् एव
तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति ।
 SF तस्माद् अपि पृष्ठतस् उपस्पृष्टस् मनसा विजानाति
यः कश्च शब्दो
 SF यस् कश्च शब्दस्
वागेव सैषा ह्यन्तमायत्तैषा हि न ।
 SF वाक् एव सा एषा हि अन्तम् आयत्ता एषा हि न
प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण
एवैतन्मयो वा अयमात्मा
 SF प्राणस् अपानस् व्यानस् उदानस् समानस् अनस् इति
 एतद् सर्वम् प्राणस् एव एतन्मयस् वै अयम् आत्मा
वाङ्मयो
 SF वाङ्मयस्
मनोमयः
 SF मनोमयस्
प्राणमयः ॥ ३ ॥
 SF प्राणमयस्

मन्त्र ४ [I.v.4]

त्रयो लोका एत एव
 SF त्रयस् लोकास् एते एव
वागेवायं लोको
 SF वाक् एव अयम् लोकस्
मनोऽन्तरिक्षलोकः
 SF मनस् अन्तरिक्षलोकस्
प्राणोऽसौ लोकः ॥ ४ ॥
 SF प्राणस् असौ लोकस्

मन्त्र ५ [I.v.5.]

त्रयो वेदा एत एव
 SF त्रयस् वेदास् एते एव
वागेवर्ग्वेदो
 SF वाक् एव ऋग्वेदस्

मनो यजुर्वेदः
 SF मनस् यजुर्वेदस्
प्राणः सामवेदः ॥ ५ ॥
 SF प्राणस् सामवेदस्

मन्त्र ६ [I.v.6]

देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनुष्याः ।
 SF देवास् पितरस् मनुष्यास् एते एव वाक् एव देवास्
 मनस् पितरस् प्राणस् मानुष्यास् ॥ ६ ॥

मन्त्र ७ [I.v.7]

पिता माता प्रजैत एव
 SF पिता माता प्रजा एते एव
मन एव पिता
 SF मनस् एव पिता
वाङ्माता
 SF वाक् माता
प्राणः प्रजा ॥ ७ ॥
 SF प्राणस् प्रजा

मन्त्र ८ [.I.v.8]

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव
 SF विज्ञातम् विजिज्ञास्यम् अविज्ञातम् एते एव
यत्किञ्च विज्ञातं वाचस्तद्रूपम्
 SF यद् किञ्च विज्ञातम् वाचस् तद् रूपम्
वाग्घि विज्ञाता
 SF वाक् हि विज्ञाता
वागेनं तद्भूत्वाऽवति ॥ ८ ॥
 SF वाक् एनम् तद् भूत्वा अवति

मन्त्र ९ [I.v.9]

यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपम्
 SF यद् किञ्च विजिज्ञास्यम् मनसस् तद् रूपम्
मनो हि विजिज्ञास्यम्
 SF मनस् हि विजिज्ञास्यम्
मन एनं तद्भूत्वाऽवति ॥ ९ ॥
 SF मनस् एनम् तद् भूत्वा अवति

मन्त्र १० [I.v.10]

यत्किञ्चाविज्ञातं प्राणस्य तद्रूपम्
 SF यद् किञ्च अविज्ञातम् प्राणस्य तद् रूपम्
प्राणो ह्यविज्ञातः
 SF प्राणस् हि अविज्ञातस्
प्राण एनं तद्भूत्वाऽवति ॥ १० ॥
 SF प्राणस् एनम् तद् भूत्वा अवति

मन्त्र ११ [I.v.11]

तस्यै वाचः पृथिवी शरीरम्
 SF तस्यै वाचस् पृथिवी शरीरम्
ज्योती रूपमयमग्निस्
 SF ज्योतिस् रूपम् अयम् अग्निः
तद्यावत्येव वाक्
 SF तद् यावती एव वाक्
तावती पृथिवी
 SF तावती पृथिवी
तावानयमग्निः ॥ ११ ॥
 SF तावान् अयम् अग्निस्

मन्त्र १२ [I.v.12]

अथैतस्य मनसो द्यौः शरीरम्
 SF अथ एतस्य मनसस् द्यौस् शरीरम्
ज्योतीरूपमसावादित्यस्
 SF ज्योतिस् रूपम् असौ आदित्यः
तद्यावदेव मनस्तावती द्यौस्
 SF तद् यावत् एव मनस् तावती द्यौः
तावानसावादित्यस्
 SF तावान् असौ आदित्यः
तौ मिथुनꣳ समैताम्
 SF तौ मिथुनम् समैताम्
ततः प्राणोऽजायत ।
 SF ततस् प्राणस् अजायत
स इन्द्रः
 SF सस् इन्द्रस्
स एषोऽसपत्नो
 SF सस् एषस् असपत्नस्
द्वितीयो वै सपत्नो
 SF द्वितीयस् वै सपत्नस्
नास्य सपत्नो भवति
 SF न अस्य सपत्नस् भवति
य एवं वेद ॥ १२ ॥
 SF यस् एवम् वेद

मन्त्र १३ [I.v.13]

अथैतस्य प्राणस्याऽऽपः शरीरम्
 SF अथ एतस्य प्राणस्य आपस् शरीरम्
ज्योतीरूपमसौ चन्द्रस्
 SF ज्योतिस् रूपम् असौ चन्द्रः
तद्यावानेव प्राणस्
 SF तद् यावान् एव प्राणः
तावत्य आपस्
 SF तावत्यस् आपः
तावानसौ चन्द्रः ।
 SF तावान् असौ चन्द्रस्
त एते सर्व एव समाः
 SF ते एते सर्वे एव समास्
सर्वेऽनन्ताः ।
 SF सर्वे अनन्तास्
स यो हैतानन्तवत उपास्ते
 SF स यस् ह एतान् अन्तवतस् उपास्ते
ऽन्तवन्तꣳ स लोकं जयत्य्
 SF अन्तवन्तम् स लोकम् जयति
अथ यो हैताननन्तानुपास्ते
 SF अथ यस् ह एतान् अनन्तान् उपास्ते
ऽनन्तꣳ स लोकं जयति ॥१३ ॥
 SF अनन्तम् स लोकम् जयति

मन्त्र १४ [I.v.14]

स एष संवत्सरः प्रजापतिः षोडशकलस्
 SF सस् एष संवत्सरस् प्रजापतिस् शोडशकलः
तस्य रात्रय एव पञ्चदश कला
 SF तस्य रात्रयस् एव पञ्चदश कलास्
ध्रुवैवास्य षोडशी कला ।
 SF ध्रुवा एव अस्य शोडशी कला
स रात्रिभिरेवाऽऽ च पूर्यते
 SF स रात्रिभिस् एव आ च पूर्यते
ऽप च क्षीयते ।
 SF अप च क्षीयते
सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य
 SF सस् अमावास्याम् रात्रिम् एतया शोडश्या कलया सर्वम् इदम् प्राणभृत् अनुप्रविश्य
ततः प्रातर्जायते ।
 SF ततस् प्रातर्जायते
तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥१४ ॥
 SF तस्माद् एताम् रात्रिम् प्राणभृतस् प्राणम् न विच्छिन्द्यात् अपि कृकलासस्य एतस्यास् एव देवतायास् अपचित्यै

मन्त्र १५ [I.v.15]

यो वै स संवत्सरः प्रजापतिः षोडशकलो
 SF यस् वै स संवत्सरस् प्रजापतिस् शोडशकालस्
ऽयमेव स योऽयमेवंवित्पुरुषस्
 SF अयम् एव स यस् अयम् एवंविद् पुरुषः
तस्य वित्तमेव पञ्चदश कला
 SF तस्य वित्तम् एव पञ्चदश कलास्
आत्मैवास्य षोडशी कला ।
 SF आत्मा एव अस्य शोडशी कला
स वित्तेनैवाऽऽ च पूर्यते
 SF स वित्तेन एव आ च पूर्यते
ऽप च क्षीयते ।
 SF अप च क्षीयते
तदेतन्नभ्यं यदयमात्मा
 SF तद् एतद् नभ्यम् यद् अयम् आत्मा
प्रधिर्वित्तम् ।
 SF प्रधिस् वित्तम्
तस्माद्यद्यपि सर्वज्यानिं जीयत
 SF तस्माद् यदि अपि सर्वज्यानिम् जीयते
आत्मना चेज्जीवति
 SF आत्मना चेद् जीवति
प्रधिनाऽगादित्येवाऽऽहुः ॥१५ ॥
 SF प्रधिना अगात् इति आहुर्

मन्त्र १६ [I.v.16]

अथ त्रयो वाव लोकाः
 SF अथ त्रयस् वाव लोकास्
मनुष्यलोका
 SF मनुष्यलोकस्
पितृलोको
 SF पितृलोकस्
देवलोक इति ।
 SF देवलोकस् इति
सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो
 SF सस् अयम् मनुष्यलोकस् पुत्रेण एव जय्यस्
नान्येन कर्मणा
 SF न अन्येन कर्मणा
कर्मणा पितृलोको
 SF कर्मणा पितृलोकस्
विद्यया देवलोको
 SF विद्यया देवलोकस्
देवलोको वै लोकानाꣳ श्रेष्ठस्
 SF देवलोकस् वै लोकानाम् श्रेष्ठः

तस्माद्विद्यां प्रशꣳसन्ति ॥१६ ॥
SF तस्माद् विद्याम् प्रशꣳसन्ति

मन्त्र १७ [I.v.17]

अथातः सम्प्रत्तिर्
SF अथ अतस् सम्प्रत्तिस्
यदा प्रैष्यन्मन्यते
SF यदा प्रैष्यन् मन्यते
ऽथ पुत्रमाह
SF अथ पुत्रम् आह
त्वं ब्रह्म
SF त्वम् ब्रह्म
त्वं यज्ञस्
SF त्वम् यज्ञः
त्वं लोक इति ।
SF त्वम् लोकस् इति
स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञो
SF स पुत्रस् प्रत्याह अहम् ब्रह्म अहम् यज्ञस्
ऽहम् लोक इति ।
SF अहम् लोकस् इति
यद्वै किञ्चानूक्तम्
SF यद् वै किञ्च अनूक्तम्
तस्य सर्वस्य ब्रह्मेत्येकता ।
SF तस्य सर्वस्य ब्रह्म इति एकता
ये वै के च यज्ञास्
SF ये वै केच यज्ञाः
तेषाꣳ सर्वेषां यज्ञ इत्येकता ।
SF तेषाम् सर्वेषाम् यज्ञस् इति एकता
ये वै केच लोकास्
SF ये वै केच लोकास्
तेषाꣳ सर्वेषां लोक इत्येकतैतावद्वा इदꣳ सर्वम्
SF तेषाम् सर्वेषाम् लोकस् इति एकता एतावत् वै इदम् सर्वम्
एतन्मा सर्वꣳ सन्नयमितोऽभुनजदिति ।
SF एतद् मा सर्वम् सन् अयम् इतस् भुनजत् इति
तस्मात् पुत्रमनुशिष्टं लोक्यमाहुस्
SF तस्माद् पुत्रम् अनुशिष्टम् लोक्यम् आहुर्
तस्मादेनमनुशासति ।
SF तस्माद् एनम् अनुशासति
स यदैवंविदस्माल्लोकात्प्रैत्य्
SF स यदा एवंविद् अस्माद् लोकाद् प्रैति
अथैभिरेव प्राणैः सह पुत्रमाविशति ।
SF अथ एभिस् एव प्राणैस् सह पुत्रम् आविशति
स यद्यनेन किञ्चिदक्ष्णयाऽकृतं भवति
SF स यदि अनेन किञ्चिद् अक्ष्णया कृतम् भवति
तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति ।
SF तस्माद् एनम् सर्वस्माद् पुत्रस् मुञ्चति
तस्मात् पुत्रो नाम ।
SF तस्माद् पुत्रस् नाम
स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठत्य्
SF स पुत्रेणा एव अस्मिन् लोके प्रतितिष्ठति
अथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥१७ ॥
SF अथ एनम् एते देवास् प्राणास् अमृतास् आविशन्ति

मन्त्र १८ [I.v.18]

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति ।
SF पृथिव्यै च एनम् अग्नेस् च दैवी वाक् आविशति
सा वै दैवी वाग्यया
SF सा वै दैवी वाक् यया
यद्यदेव वदति
SF यद् यद् एव वदति
तत्तद्भवति ॥१८ ॥
SF तत्स्तद् भवति

मन्त्र १९ [I.v.19]

दिवश्चैनमादित्याच्च दैवं मन आविशति ।
SF दिवस् च एनम् आदित्याद् च दैवम् मनस् आविशति
तद्वै दैवं मनो येनाऽऽनन्द्येव भवत्य्
SF तद् वै दैवम् मनस् येन आनन्दी एव भवति
अथो न शोचति ॥१९ ॥
SF अथ उ न शोचति

मन्त्र २०

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति ।
SF अद्भयस् च एनम् चन्द्रमसस् च दैवस् प्राणस् आविशति
स वै दैवः प्राणो यः संचरꣳश्चासंचरꣳश्च न
व्यथते
SF स वै दैवस् प्राणस् यस् संचरन् च असंचरन् च न व्यथते
ऽथो न रिष्यति ।
SF अथ उ न रिष्यति
स एवंवित्सर्वेषां भूतानामात्मा भवति ।
SF सस् एष एवंविद् सर्वेषाम् भूतानाम् आत्मा भवति
यथैषा देवतैवꣳ स
SF यथा एषा देवता एवम् स
यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्य्
SF यथा एताम् देवताम् सर्वाणि भूतानि अवन्ति

एव॑ हैवंविद॑ सर्वाणि भूतान्यवन्ति ।
SF एवम् ह एवंविदम् सर्वाणि भूतानि अवन्ति
यदु किञ्चेमाः प्रजाः शोचन्त्य्
SF यद् उ किञ्च इमास् प्रजास् शोचन्ति
अमैवाऽऽसां तद्भवति
SF अमा एव आसाम् तद् भवति
पुण्यमेवामुं गच्छति
SF पुण्यम् एव अमुम् गच्छति
न ह वै देवान्पापं गच्छति ॥ २० ॥
SF न ह वै देवान् पापम् गच्छति

मन्त्र २१ [I.v.21]

अथातो व्रतमीमा॑सा ।
SF अथ अतस् व्रतमीमा॑सा
प्रजापतिर्ह कर्माणि ससृजे ।
SF प्रजापतिस् ह कर्माणि ससृजे
तानि सृष्टान्यन्योऽन्येनास्पर्धन्त
SF तानि सृष्टानि अन्यस् अन्येन अस्पर्धन्त
वदिष्याम्येवाहमिति वाग्दध्रे
SF वदिष्यामि एव अहम् इति वाक् दध्रे
द्रक्ष्याम्यहमिति चक्षुः
SF द्रक्ष्यामि अहम् इति चक्षुस्
श्रोष्याम्यहमिति श्रोत्रम्।
SF श्रोष्यामि अहम् इति श्रोत्रम्
एवमन्यानि कर्माणि यथाकर्म ।
SF एवम् अन्यानि कर्माणि यथाकर्म
तानि मृत्युः श्रमो भूत्वोपयेमे
SF तानि मृत्युस् श्रमस् भूत्वा उपयेमे
तान्याप्नोत्
SF तानि आप्नोत्
तान्याप्त्वा मृत्युरवारुन्ध ।
SF तानि आप्त्वा मृत्युरवारुन्द्ध
तस्माच्छ्राम्यत्येव वाक्
SF तस्माद् श्राम्यति एव वाक्
श्राम्यति चक्षुः
SF श्राम्यति चक्षुस्
श्राम्यति श्रोत्रम्
SF श्राम्यति श्रोत्रम्
अथेममेव नाऽऽप्नोद्
SF अथ इमम् एव न आप्नोत्
योऽयं मध्यमः प्राणस्
SF यस् अयम् मध्यमस् प्राणस्
तानि ज्ञातुं दध्रिरे
SF तानि ज्ञातुम् दध्रिरे
ऽयं वै नः श्रेष्ठो यः संचर॑श्चासंचर॑श्च न
व्यथते
SF अयम् वै नस् श्रेष्ठस् यस् संचरन् च
असंचरन् च न व्यथते
ऽथो न रिष्यति ।
SF अथ उ न रिष्यति
हन्तास्यैव सर्वे रूपमसामेति ।
SF हन्त अस्य एव सर्वे रूपम् भवाम इति
त एतस्यैव सर्वे रूपमभव॑स्
SF ते एतस्य एव सर्वे रूपम् अभवन्
तस्मादेत एतेनाऽऽख्यायन्ते प्राणा इति ।
SF तस्माद् एते एतेन आख्यायन्ते प्राणास् इति
तेन ह वाव तत्कुलमाचक्षते
SF तेन ह वाव तद् कुलम् आचक्षते
यस्मिन्कुले भवति य एवं वेद ।
SF यस्मिन् कुले भवति यस् एवम् वेद
य उ हैवंविदा स्पर्धतेऽनुशुष्यत्य्
SF यस् उ ह एवंविदा स्पर्धतेk add. mark 1 अनुशुष्यति
अनुशुष्य हैवान्ततो म्रियत
SF अनुशुष्य ह एव अन्ततस् म्रियते
इत्यध्यात्मम् ॥ २१ ॥
SF इति अध्यात्मम्

मन्त्र २२ [I.v.22]

अथाधिदैवतम्
SF अथ अधिदेवतम्
ज्वलिष्याम्येवाहमित्यग्निर्दध्रे
SF ज्वलिष्यामि एव अहम् इति अग्निस् दध्रे
तप्स्याम्यहमित्यादित्यो
SF तप्स्यामि अहम् इति आदित्यस्
भास्याम्यहमिति चन्द्रमा
SF भास्यामि अहम् इति चन्द्रमास्
एवमन्या देवता यथादैवत॑ ।
SF एवम् अन्यास् देवतास् यथादेवतम्
स यथैषां प्राणानां मध्यमः प्राण
SF स यथा एषाम् प्राणानाम् मध्यमस् प्राणस्
एवमेतासां देवतानां वायुर्
SF एवम् एतासाम् देवतानाम् वायुस्
निम्लोचन्ति ह्यन्या देवता
SF म्लोचन्ति हि अन्यास् देवतास्
न वायुः ।
SF न वायुस्
सैषाऽनस्तमिता देवता यद्वायुः ॥ २२ ॥
SF सा एषा अनस्तमिता देवता यद् वायुस्

मन्त्र २३ [I.v.23]

अथैष श्लोको भवति
SF अथ एष श्लोकस् भवति
यतश्चोदेति सूर्यो
SF यतस् च उदेति सूर्यस्
ऽस्तं यत्र च गच्छतीति
SF अस्तम् यत्र च गच्छति इति
प्राणाद्वा एष उदेति
SF प्राणाद् वै एष उदेति
प्राणेऽस्तमेति
SF प्राणे अस्तम् एति
तं देवाश्चक्रिरे धर्मꣳ,
SF तम् देवास् चक्रिरे धर्मम्
स एवाद्य
SF सस् एव अद्य
स उ श्व इति ।
SF सस् उ श्वस् इति
यद्वा एतेऽमुर्ह्यध्रियन्त
SF यद् वै एते अमुर्हि अध्रियन्त
तदेवाप्यद्य कुर्वन्ति ।
SF तद् एव अपि अद्य कुर्वन्ति
तस्मादेकमेव व्रतं चरेत्
SF तस्माद् एकम् एव व्रतम् चरेत्
प्राण्याच्चैवापान्याच्च
SF प्राण्याद् च एव अपान्याद् च
नेन्मा पाप्मा मृत्युराप्नवदिति ।
SF नेद् मा पाप्मा मृत्युस् आप्नवत् इति
यद्यु चरेत्
SF यदि उ चरेत्
समापिपयिषेत्
SF समापिपयिषेत्
तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति ॥ २३ ॥ इति पञ्चमं ब्राह्मणम् ॥
SF तेन उ एतस्यै देवतायै सायुज्यम् सलोकताम् जयति

षष्ठं ब्राह्मणम् ।

मन्त्र १ [I.vi.1]

त्रयं वा इदम्
SF त्रयम् वै इदम्
नाम रूपं कर्म ।
SF नाम रूपम् कर्म
तेषां नाम्नां वागित्येतदेषामुक्थम्
SF तेषाम् नाम्नाम् वाक् इति एतद् एषाम् उक्थम्
अतो हि सर्वाणि नामान्युत्तिष्ठन्ति ।
SF अतस् हि सर्वाणि नामानि उत्तिष्ठन्ति
एतदेषाꣳ सामैतद्धि सर्वैर्नामभिः समम्
SF एतद् एषाम् साम एतद् धि सर्वैस् नामभिस् समम्
एतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥
SF एतद् एषाम् ब्रह्म एतद् धि सर्वाणि नामानि बिभर्ति

मन्त्र २ [I.vi.1]

अथ रूपाणां चक्षुरित्येतदेषामुक्थम्
SF अथ रूपाणाम् चक्षुस् इति एतद् एषाम् उक्थम्
अतो हि सर्वाणि रूपाण्युत्तिष्ठन्ति ।
SF अतस् हि सर्वाणि रूपाणि उत्तिष्ठन्ति
एतदेषाꣳ सामैतद्धि सर्वै रूपैः समम् ।
SF एतद् एषाम् साम एतद् धि सर्वैस् रूपैस् समम्
एतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥
SF एतद् एषाम् ब्रह्म एतद् धि सर्वाणि रूपाणि बिभर्ति

मन्त्र ३ [I.vi.3]

अथ कर्मणामात्मेत्येतदेषामुक्थम्
SF अथ कर्मणाम् आत्मा इति एतद् एषाम् उक्थम्
अतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्य्
SF अतस् हि सर्वाणि कर्माणि उत्तिष्ठन्ति
एतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः समम्
SF एतद् एषाम् साम एतद् धि सर्वैस् कर्मभिस् समम्
एतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति ।
SF एतद् एषाम् ब्रह्म एतद् धि सर्वाणि कर्माणि बिभर्ति
तदेतत्त्रयꣳ सदेकमयमात्माऽऽत्मो एकः सन्नेतत्त्रयम् ।
SF तद् एतद् त्रयम् सत् एकम् अयम् आत्मा आत्मा उ एकस् सन् एतद् त्रयम्
तदेतदमृतꣳ सत्येन छन्नम् ।
SF तद् एतद् अमृतम् सत्येन छन्नम्
प्राणो वा अमृतम्
SF प्राणस् वै अमृतम्
नामरूपे सत्यम्
SF नामरूपे सत्यम्
ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥
SF ताभ्याम् अयम् प्राणस् छन्नस्

इति बृहदारण्यकोपनिषदि प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ।

प्रथमं ब्राह्मणम्

मन्त्र १ [II.i.1]

ॐ दृप्तबालाकिर्हानूचानो गार्ग्य आस ।
 SF दृप्तबालाकिस् ह अनूचानस् गार्ग्यस् आस
स होवाचाजातशत्रुं काश्यम्
 SF स ह उवाच अजातशत्रुम् काश्यम्
ब्रह्म ते ब्रवाणीति ।
 SF ब्रह्म ते ब्रवाणि इति
स होवाचाजातशत्रुः
 SF स ह उवाच अजातशत्रुस्
सहस्रमेतस्यां वाचि दद्मो
 SF सहस्रम् एतस्याम् वाचि दद्मस्
जनको
 SF जनकस्
जनक इति वै जना धावन्तीति ॥१ ॥
 SF जनकस् इति वै जनास् धावन्ति इति

मन्त्र २ [II.i.2]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवासावादित्ये पुरुष
 SF यस् एव असौ आदित्ये पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
 SF मा मा एतस्मिन् संवदिष्ठास्
अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति ।
 SF अतिष्ठास् सर्वेषाम् भूतानाम् मूर्धा राज इति वै
 अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
ऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥२ ॥
 SF अतिष्ठास् सर्वेषाम् भूतानाम् मूर्धा राजा भवति

मन्त्र ३ [II.i.3]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवासौ चन्द्रे पुरुष
 SF यस् एव असौ चन्द्रे पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
 SF मा मा एतस्मिन् संवदिष्ठास्
बृहन् पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति ।
 SF बृहन् पाण्डरवासास् सोमस् राजा इति वै अहम् एतम्
 उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
ऽहरहर्ह सुतः प्रसुतो भवति
 SF अहर्स्अहर्ह सुतस् प्रसुतस् भवति
नास्यान्नं क्षीयते ॥३ ॥
 SF न अस्य अन्नम् क्षीयते

मन्त्र ४ [II.i.4]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवासौ विद्युति पुरुष
 SF यस् एव अयम् विद्युति पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठास्
 SF मा मा एतस्मिन् संवदिष्ठाः
तेजस्वीति वा अहमेतमुपास इति ।
 SF तेजस्वी इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
तेजस्वी ह भवति
 SF तेजस्वी ह भवति
तेजस्विनी हास्य प्रजा भवति ॥४ ॥
 SF तेजस्विनी ह अस्य प्रजा भवति

मन्त्र ५ [II.i.5]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवायमाकाशे पुरुष
 SF यस् एव अयम् आकाशे पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठाः ।

 SF मा मा एतस्मिन् संवदिष्ठास्
पूर्णमप्रवर्तीति वा अहमेतमुपास इति ।
 SF पूर्णम् अप्रवर्ति इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
पूर्यते प्रजया पशुभिर्
 SF पूर्यते प्रजया पशुभिस्
नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥
 SF न अस्य अस्माद् लोकाद् प्रजा उद्वर्तते

मन्त्र ६ [II.i.6]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवायं वायौ पुरुष
 SF यस् एव अयम् वायौ पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
 SF मा मा एतस्मिन् संवदिष्ठास्
इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति ।
 SF इन्द्रस् वैकुण्ठस् अपराजिता सेना इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥
 SF जिष्णुस् ह अपराजिष्णुस् भवति अन्यतस्त्यजायी

मन्त्र ७ [II.i.7]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवायमग्नौ पुरुष
 SF यस् एव अयम् अग्नौ पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
 SF मा मा एतस्मिन् संवदिष्ठास्
विषासहिरिति वा अहमेतमुपास इति ।
 SF विषासहिस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
विषासहिर्ह भवति
 SF विषासहिस् ह भवति
विषासहिर्हास्य प्रजा भवति ॥ ७ ॥
 SF विषासहिस् ह अस्य प्रजा भवति

मन्त्र ८ [II.i.8]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवायमप्सु पुरुष
 SF यस् एव अयम् अप्सु पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठाः ।
 SF मा मा एतस्मिन् संवदिष्ठास्
प्रतिरूप इति वा अहमेतमुपास इति ।
 SF प्रतिरूपस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
प्रतिरूपꣳ हैवैनमुपगच्छति
 SF प्रतिरूपम् ह एव एनम् उपगच्छति
नाप्रतिरूपम्
 SF न अप्रतिरूपम्
अथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥
 SF अथ उ प्रतिरुपस् अस्माद् जायते

मन्त्र ९ [II.i.9]

स होवाच गार्ग्यो
 SF स ह उवाच गार्ग्यस्
य एवायमादर्शे पुरुष
 SF यस् एव अयम् आदर्शे पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
 SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
 SF मा मा एतस्मिन् संवदिष्ठास्
रोचिष्णुरिति वा अहमेतमुपास इति ।
 SF रोचिष्णुस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
 SF स यस् एतम् एवम् उपास्ते
रोचिष्णुर्ह भवति
 SF रोचिष्णुस् ह भवति

रोचिष्णुर्हास्य प्रजा भवत्य्
SF रोचिष्णुस् ह अस्य प्रजा भवति
अथो यैः संनिगच्छति
SF अथ उ यैस् संनिगच्छति
सर्वाँस्तानतिरोचते ॥९ ॥
SF सर्वान् तान् अतिरोचते

मन्त्र १० [II.i.10]

स होवाच गार्ग्यो
SF स ह उवाच गार्ग्यस्
य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्य्
SF यस् एव अयम् यन्तम् पश्चाद् शब्दस् अनूदेति
एतमेवाहं ब्रह्मोपास इति ।
SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
SF मा मा एतस्मिन् संवदिष्ठास्
असुरिति वा अहमेतमुपास इति ।
SF असुस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
SF स यस् एतम् एवम् उपास्ते
सर्वँ हैवास्मिँल्लोक आयुरेति
SF सर्वम् ह एव अस्मिन् लोके आयुस् एति
नैनं पुरा कालात्प्राणो जहाति ॥१० ॥
SF न एनम् पुरा कालाद् प्राणस् जहाति

मन्त्र ११ [II.i.11]

स होवाच गार्ग्यो
SF स ह उवाच गार्ग्यस्
य एवायं दिक्षु पुरुष
SF यस् एव अयम् दिक्षु पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
SF मा मा एतस्मिन् संवदिष्ठास्
द्वितीयोऽनपग इति वा अहमेतमुपास इति ।
SF द्वितीयस् अनपगस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
SF स यस् एतम् एवम् उपास्ते
द्वितीयवान्ह भवति
SF द्वितीयवान् ह भवति
नास्माद् गणश्छिद्यते ॥११ ॥
SF न अस्माद् गणस् छिद्यते

मन्त्र १२ [II.i.12]

स होवाच गार्ग्यो
SF स ह उवाच गार्ग्यस्
य एवायं छायामयः पुरुष
SF यस् एव अयम् छायामयस् पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा ।
SF मा मा एतस्मिन् संवदिष्ठास्
मृत्युरिति वा अहमेतमुपास इति ।
SF मृत्युस् इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्ते
SF स यस् एतम् एवम् उपास्ते
सर्वँ हैवास्मिँल्लोक आयुरेति
SF सर्वम् ह एव अस्मिन् लोके आयुस् एति
नैनं पुरा कालान्मृत्युरागच्छति ॥१२ ॥
SF न एनम् पुरा कालाद् मृत्युस् आगच्छति

मन्त्र १३ [II.i.13]

स होवाच गार्ग्यो
SF स ह उवाच गार्ग्यस्
य एवायमात्मनि पुरुष
SF यस् एव अयम् आत्मनि पुरुषस्
एतमेवाहं ब्रह्मोपास इति ।
SF एतम् एव अहम् ब्रह्म उपासे इति
स होवाचाजातशत्रुर्
SF स ह उवाच अजातशत्रुस्
मा मैतस्मिन्संवदिष्ठा
SF मा मा एतस्मिन् संवदिष्ठास्
आत्मन्वीति वा अहमेतमुपास इति ।
SF आत्मन्वी इति वै अहम् एतम् उपासे इति
स य एतमेवमुपास्त
SF स यस् एतम् एवम् उपास्ते
आत्मन्वी ह भवत्य्
SF आत्मन्वी ह भवति
आत्मन्विनी हास्य प्रजा भवति ।
SF आत्मन्विनी ह अस्य प्रजा भवति
स ह तूष्णीमास गार्ग्यः ॥१३ ॥
SF स ह तूष्णीम् आस गार्ग्यस्

मन्त्र १४ [II.i.14]

स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
एतावन्नू ३ इत्य्
 SF एतावन् नु इति
एतावद्धीति ।
 SF एतावत् हि इति
नैतावता विदितं भवतीति ।
 SF न एतावता विदितम् भवति इति
स होवाच गार्ग्य
 SF स ह उवाच गार्ग्यस्
उप त्वा यानीति ॥१४ ॥
 SF उप त्वा अयानि इति

मन्त्र १५ [II.i.15]

स होवाचाजातशत्रुः
 SF स ह उवाच अजातशत्रुस्
प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्
 SF प्रतिलोमम् वै तद् यद् ब्राह्मणस् क्षत्रियम् उपेयात्
ब्रह्म मे वक्ष्यतीति ।
 SF ब्रह्म मे वक्ष्यति इति
व्येव त्वा ज्ञपयिष्यामीति ।
 SF वि एव त्वा ज्ञपयिष्यामि इति
तं पाणावादायोत्तस्थौ ।
 SF तम् पाणौ आदाय उत्तस्थौ
तौ ह पुरुषꣳ सुप्तमाजग्मतुस्
 SF तौ ह पुरुषम् सुप्तम् आजग्मतुः
तमेतैर्नामभिरामन्त्रयांचक्रे
 SF तम् एतैस् नामभिस् आमन्त्रयाम् चक्रे
बृहन्पाण्डरवासः
 SF बृहन् पाण्दरवासस्
सोम राजन्निति ।
 SF सोम राजन् इति
स नोत्तस्थौ ।
 SF स न उत्तस्थौ
तं पाणिनाऽऽपेषं बोधयांचकार ।
 SF तम् पाणिना आपेषम् बोधयाम् चकार
स होत्तस्थौ ॥१५ ॥
 SF स ह उत्तस्थौ

मन्त्र १६ [II.i.16]

स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
यत्रैष एतत् सुप्तोऽभूद्
 SF यत्र एषस् एतद् सुप्तस् अभूत्
य एष विज्ञानमयः पुरुषः
 SF यस् एष विज्ञानमयस् पुरुषस्
क्वैष तदाऽभूत्
 SF क्व एष तदा अभूत्
कुत एतदागादिति ।
 SF कुतस् एतद् आगात् इति
तदु ह न मेने गार्ग्यः ॥१६ ॥
 SF तद् उ ह न मेने गार्ग्यस्

मन्त्र १७ [II.i.17]

स होवाचाजातशत्रुर्
 SF स ह उवाच अजातशत्रुस्
यत्रैष एतत् सुप्तोऽभूद्
 SF यत्र एषस् एतद् सुप्तस् अभूत्
य एष विज्ञानमयः पुरुषस्
 SF यस् एष विज्ञानमयस् पुरुषः
तदेषां प्राणानां विज्ञानेन विज्ञानमादाय
 SF तद् एषाम् प्राणानाम् विज्ञानेन विज्न्नानम् आदाय
य एषोऽन्तर्हृदय आकाशस्
 SF यस् एषस् अन्तर्हृदये आकाशः
तस्मिञ्छेते ।
 SF तस्मिन् शेते
तानि यदा गृह्णाति
 SF तानि यदा गृह्णात्य्
अथ हैतत्पुरुषः स्वपिति नाम ।
 SF अथ ह एतद् पुरुषस् स्वपिति नाम
तद्गृहीत एव प्राणो भवति
 SF तद् गृहीतस् एव प्राणस् भवति
गृहीता वाग्
 SF गृहीता वाक्
गृहीतं चक्षुर्
 SF गृहीतम् चक्षुस्
गृहीतꣳ श्रोत्रं
 SF गृहीताम् श्रोत्रम्
गृहीतं मनः ॥१७ ॥
 SF गृहीतम् मनस्

मन्त्र १८ [II.i.18]

स यत्रैतत्स्वप्न्यया चरति
 SF स यत्र एतद् स्वप्न्यया चरति
ते हास्य लोकास्

 SF ते ह अस्य लोकाः
तदुतेव महाराजो भवत्य्
 SF तद् उत इव महाराजस् भवति
उतेव महाब्राह्मण
 SF उत इव महाब्राह्मणस्
उतेवोच्चावचं निगच्छति ।
 SF उत इव उच्चावचम् निगच्छति
स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥
 SF स यथा महाराजस् जानपदान् गृहीत्वा स्वे जनपदे
 यथाकामम् परिवर्तेत एवम् एव एषस् एतद् प्राणान् गृहीत्वा
 स्वे शरीरे यथाकामम् परिवर्तते

मन्त्र १९ [II.i.19]

अथ यदा सुषुप्तो भवति
 SF अथ यदा सुषुप्तस् भवति
यदा न कस्यचन वेद
 SF यदा न कस्य चन वेद
हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ।
 SF हितास् नाम नाड्यस् द्वासप्ततिस् सहस्राणि हृदयाद्
 पुरीततम् अभिप्रतिष्ठन्ते
ताभिः प्रत्यवसृप्य पुरीतति शेते ।
 SF ताभिस् प्रत्यवसृप्य पुरीतति शेते
स यथा कुमारो वा महाराजो
 SF स k OM यथा कुमारस् k add. वा महाराजस्
वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥ १९ ॥
 SF वा महाब्राह्मणस् वा अतिघ्नीम् आनन्दस्य गत्वा शयीत
 एवम् एव एषस् एतद् शेते

मन्त्र २० [II.i.20]

स यथोर्णभिस्तन्तुनोच्चरेद्
 SF स यथा ऊर्णवाभिस् तन्तुना उच्चरेत्
यथाऽग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्य्
 SF यथा अग्नेस् क्षुद्रास् विष्फुलिङ्गास् व्युच्चरन्ति
एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति ।
 SF एवम् एव अस्माद् आत्मनस् सर्वे प्राणास् सर्वे लोकास्
 सर्वे देवास् सर्वाणि भूतानि सर्वे एते आत्मनस् k OM सर्वे ॥।
 व्युच्चरन्ति

तस्योपनिषत्सत्यस्य सत्यमिति
 SF तस्य उपनिषद् सत्यस्य सत्यम् इति
प्राणा वै सत्यं
 SF प्राणास् वै सत्यम्
तेषामेष सत्यम् ॥ २० ॥ इति प्रथमं ब्राह्मणम् ॥
 SF तेषाम् एष सत्यम्

द्वितीयं ब्राह्मणम्

मन्त्र १ [II.ii.1]

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद
 SF यस् ह वै शिशुम् साधानम् सप्रत्याधानम्
 सस्थूणम् सदामम् वेद
सप्त ह द्विषतो भ्रातृव्यानवरुणद्ध्य्
 SF सप्त ह द्विषतस् भ्रातृव्यान् अवरुणद्धि
अयं वाव शिशुर्योऽयं मध्यमः प्राणस्
 SF अयम् वाव शिशुस् यस् अयम् मध्यमस् प्राणः
तस्येदमेवाऽऽधानम्
 SF तस्य इदम् एव आधानम्
इदं प्रत्याधानं
 SF इदम् प्रत्याधानम्
प्राणः स्थूणाऽन्नं दाम ॥ १ ॥
 SF प्राणस् स्थूणा अन्नम् दाम

मन्त्र २ [II.ii.2]

तमेताः सप्ताक्षितय उपतिष्ठन्ते
 SF तम् एतास् सप्त अक्षितयस् उपतिष्ठन्ते
तद्या इमा अक्षꣳल्लोहिन्यो राजयस्
 SF तद् यास् इमास् अक्षन् लोहिन्यस् राजयः
ताभिरेनꣳ रुद्रोऽन्वायत्तो
 SF ताभिस् एनम् रुद्रस् अन्वायत्तस्
ऽथ या अक्षन्नापस्
 SF अथ यास् अक्षन् आपः
ताभिः पर्जन्यो
 SF ताभिस् पर्जन्यस्
या कनीनका
 SF या कनीनका
तयाऽऽदित्यो
 SF तया आदित्यस्
यत्कृष्णं,
 SF यद् शुक्लम् कृष्णं
तेनाग्निर्
 SF तेन अग्निस्

यच्छुक्लं
 SF यद् कृष्णम् शुक्लं
तेनेन्द्रो
 SF तेन इन्द्रस्
ऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता
 SF अधरया एनम् वर्तन्या पृथिवी अन्वायत्ता
द्यौरुत्तरया ।
 SF द्यौस् उत्तरया
नास्यान्नं क्षीयते
 SF न अस्य अन्नम् क्षीयते
य एवं वेद ॥ २ ॥
 SF यस् एवम् वेद

मन्त्र ३ [II.ii.3]

तदेष श्लोको भवति ।
 SF तद् एष श्लोकस् भवति
अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्
 SF अर्वाग्बिलस् चमसस् ऊर्ध्वबुध्नः
तस्मिन्यशो निहितं विश्वरूपम् ।
 SF तस्मिन् यशस् निहितम् विश्वरूपम्ष्
तस्याऽऽसत ऋषयः सप्त तीरे
 SF तस्य आसते ऋषयस् सप्त तीरे
वागष्टमी ब्रह्मणा संविदानेति ।
 SF वाक् अष्टमी ब्रह्मणा संविदाना इति
अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिरः
 SF अर्वाग्बिलस् चमसस् ऊर्ध्वबुध्नस् इति इदम् तद् शरीरस्
एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः ।
 SF एष हि अर्वाग्बिलस् चमसस् ऊर्ध्वबुध्नः
तस्मिन्यशो निहितं विश्वरूपमिति
 SF तस्मिन् यशस् निहितम् विश्वरूपम् इति
प्राणा वै यशो निहितं विश्वरूपम्
 SF प्राणास् वै यशस् निहितम् विश्वरूपम्
प्राणानेतदाह ।
 SF प्राणान् एतद् आह
तस्याऽऽसत ऋषयः सप्त तीर इति
 SF तस्य आसते ऋषयस् सप्त तीरे इति
प्राणा वा ऋषयः
 SF प्राणास् वै ऋषयस्
प्राणाणेतदाह ।
 SF प्राणाण् एतद् आह
वागष्टमी ब्रह्मणा संविदानेति
 SF वाक् अष्टमी ब्रह्मणा संविदाना इति
वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥
 SF वाक् हि अष्टमी ब्रह्मणा संवित्ते

मन्त्र ४ [II.ii.4]

इमावेव गोतमभरद्वाजाव्
 SF इमौ एव गोतमभरद्वाजौ
अयमेव गोतमो
 SF अयम् एव गोतमस्
ऽयं भरद्वाज
 SF अयम् भरद्वाजस्
इमावेव विश्वामित्रजमदग्नी
 SF इमौ एव विश्वामित्रजमदग्नी
अयमेव विश्वामित्रो
 SF अयम् एव विश्वामित्रस्
ऽयं जमदग्निर्
 SF अयम् जमदग्निस्
इमावेव वसिष्ठकश्यपाव्
 SF इमौ एव वसिष्ठकश्यपौ
अयमेव वसिष्ठो
 SF अयम् एव वसिष्ठस्
ऽयं कश्यपो
 SF अयम् कश्यपस्
वागेवात्रिर्
 SF वाक् एव अत्रिस्
वाचा ह्यन्नमद्यते
 SF वाचा हि अन्नम् अद्यते
ऽत्तिर्ह वै नामैतद्यदत्रिरिति ।
 SF अत्तिस् ह वै नाम एतद् यद् अत्रिस् इति
सर्वस्यात्ता भवति
 SF सर्वस्य अत्ता भवति
सर्वमस्यान्नं भवति
 SF सर्वम् अस्य अन्नम् भवति
य एवं वेद ॥ ४ ॥ इति द्वितीयं ब्राह्मणम् ॥
 SF यस् एवम् वेद

तृतीयं ब्राह्मणम् ।

मन्त्र १ [II.iii.1]

द्वे वाव ब्रह्मणो रूपे
 SF द्वे वाव ब्रह्मणस् रूपे
मूर्तं चैवामूर्तं च
 SF मूर्तम् च एव अमूर्तम् च
मर्त्यं चामृतं च
 SF मर्त्यम् च अमृतम् च
स्थितं च यच्च
 SF स्थितम् च यत् च

सच्च त्यच्च ॥१ ॥
SF सत् च त्यम् च

मन्त्र २ [II.iii.2]

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यम्
SF तद् एतन् मूर्तम् यद् अन्यद् वायोस् च अन्तरिक्षाद् च एतद् मर्त्यम्
एतत्स्थितम्
SF एतद् स्थितम्
एतत्सत् ।
SF एतद् सत्
तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत
एष रसो य एष तपति
SF तस्य एतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सतस् एष रसस् यस् एष तपति
सतो ह्येष रसः ॥२ ॥
SF सतस् हि एष रसस्

मन्त्र ३ [II.iii.3]

अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतम्
SF अथ अमूर्तम् वायुस् च अन्तरिक्षस् च एतद् अमृतम्
एतद्यद्
SF एतद् यत्
एतत्त्यत्
SF एतद् त्यम्
तस्यैतस्यामूर्तस्यै
SF तस्य एतस्य अमूर्तस्य
तस्यामृतस्यैतस्य यत
SF तस्य अमृतस्य एतस्य यतस्
एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्
SF एतस्य त्यस्य एष रसस् यस् एषस् एतस्मिन् मण्डले पुरुषः
तस्य ह्येष रस ।
SF त्यस्य हि एष रसस्
इत्यधिदैवतम् ॥३ ॥
SF इति अधिदेवतम्

मन्त्र ४ [II.iii.4]

अथाध्यात्मम्
SF अथ अध्यात्मम्
इदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश
SF इदम् एव मूर्तम् यद् अन्यद् प्राणाद् च यस् च अयम् अन्तरात्मन् आकाशस्

एतन्मर्त्यम्
SF एतद् मर्त्यम्
एतत्स्थितम्
SF एतद् स्थितम्
एतत्सत्
SF एतद् सत्
तस्यैतस्य मूर्तस्यै
SF तस्य एतस्य मूर्तस्य
तस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः
SF एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सतस् एष रसस् यद् चक्षुस्
सतो ह्येष रसः ॥४ ॥
SF सतस् हि एष रसस्

मन्त्र ५ [II.iii.5]

अथामूर्तम्
SF अथ अमूर्तम्
प्राणश्च यश्चायमन्तरात्मन्नाकाश
SF प्राणस् च यस् च अयम् अन्तरात्मन् आकाशस्
एतदमृतम्
SF एतद् अमृतम्
एतद्यद्
SF एतद् यत्
एतत्त्यं
SF एतद् त्यम्
तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत
SF तस्य एतस्य अमूर्तस्य एतस्य अमृतस्य एतस्य यतस्
एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्
SF एतस्य त्यस्य एष रसस् यस् अयम् दक्षिणे अक्षन् पुरुषः
त्यस्य ह्येष रसः ॥५ ॥
SF त्यस्य हि एष रसस्

मन्त्र ६ [II.iii.6]

तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो
SF तस्य ह एतस्य पुरुषस्य रूपम् यथा माहारजनम् वासस्
यथा पाण्ड्वाविकम्
SF यथा पाण्ड्वाविकम्
यथेन्द्रगोपो
SF यथा इन्द्रगोपस्
यथाऽग्न्यर्चिर्
SF यथा अग्न्यर्चिस्
यथा पुण्डरीकम्

SF यथा पुण्डरीकम्
यथा सकृद्विद्युत्तः ।
SF यथा सकृद्विद्युत्तम्
सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति
SF सकृद्विद्युत्ता एव ह वै अस्य श्रीस् भवति
य एवं वेदा
SF यस् एवम् वेद
थात आदेशो
SF अथ अतस् आदेशस्
नेति नेति
SF न इति न इति
न ह्येतस्मादिति नेत्यन्यत् परमस्त्य्
SF न हि एतस्माद् इति न इति अन्यद् परम् अस्ति
अथ नामधेयः सत्यस्य सत्यमिति
SF अथ नामधेयम् सत्यस्य सत्यम् इति
प्राणा वै सत्यम्
SF प्राणास् वै सत्यम्
तेषामेष सत्यम् ॥ ६ ॥ इति तृतीयं ब्राह्मणम् ॥
SF तेषाम् एष सत्यम्

चतुर्थं ब्राह्मणम् ।

मन्त्र १ [II.iv.1]

मैत्रेयीति होवाच याज्ञवल्क्य
SF मैत्रेयि इति ह उवाच याज्ञवल्क्यस्
उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि ।
SF उद्यास्यन् वै अरे अहम् अस्माद् स्थानाद् अस्मि
हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ १ ॥
SF हन्त ते अनया कात्यायन्या अन्तम् करवाणि इति

मन्त्र २ [II.iv.1]

सा होवाच मैत्रेयी
SF सा ह उवाच मैत्रेयी
यन्नु म इयम्
SF यद् मे इयम्
भगोः
SF भगोस्
सर्वा पृथिवी वित्तेन पूर्णा स्यात्
SF सर्वा पृथिवी वित्तेन पूर्णा स्यात्
कथं तेनामृता स्यामिति ।
SF कथम् तेन अमृता स्याम् इति
नेति होवाच याज्ञवल्क्यो
SF न इति ह उवाच याज्ञवल्क्यस्
यथैवोपकरणवतां जीवितम्
SF यथा एव उपकरणवताम् जीवितम्
तथैव ते जीवितः स्याद्
SF तथा एव ते जीवितम् स्यात्
अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ २ ॥
SF अमृतत्वस्य तु न आशा अस्ति वित्तेन इति

मन्त्र ३ [II.iv.3]

सा होवाच मैत्रेयी
SF सा ह उवाच मैत्रेयी
येनाहं नामृता स्याम्
SF येन अहम् न अमृता स्याम्
किमहं तेन कुर्यां ।
SF किम् अहम् तेन कुर्याम्
यदेव भगवान्वेद
SF यद् एव भगवान् वेद
तदेव मे ब्रूहीति ॥ ३ ॥
SF तद् एव मे ब्रूहि इति

मन्त्र ४ [II.iv.4]

स होवाच याज्ञवल्क्यः
SF स ह उवाच याज्ञवल्क्यस्
प्रिया बतारे नः सती प्रियं भाषस
SF प्रिया वत अरे बत अरे नस् सती प्रियम् भाषसे
एह्य
SF एहि
आस्स्व
SF अस्व अस्स्व
व्याख्यास्यामि ते ।
SF व्याख्यास्यामि ते
व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥
SF व्याचक्षाणस्य तु मे निदिध्यासस्व इति

मन्त्र ५ [II.iv.5]

स होवाच
SF स ह उवाच याज्ञवल्क्यस्k OM.
न वा अरे पत्युः कामाय पतिः प्रियो भवत्य्
SF न वै अरे पत्युर् कामाय पतिस् प्रियस् भवति
आत्मनस्तु कामाय पतिः प्रियो भवति ।
SF आत्मनस् तु कामाय पतिस् प्रियस् भवति
न वा अरे जायायै कामाय जाया प्रिया भवत्य्
SF न वै अरे जायायै कामाय जाया प्रिया भवति
आत्मनस्तु कामाय जाया प्रिया भवति ।
SF आत्मनस् तु कामाय जाया प्रिया भवति

न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्य्
SF न वै अरे पुत्राणाम् कामाय पुत्रास् प्रियास् भवन्ति
आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।
SF आत्मनस् तु कामाय पुत्रास् प्रियास् भवन्ति
न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्य्
SF न वै अरे वित्तस्य कामाय वित्तम् प्रियम् भवति
आत्मनस्तु कामाय वित्तं प्रियं भवति ।
SF आत्मनस् तु कामाय वित्तम् प्रियम् भवति
न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्य्
SF न वै अरे ब्रह्मणस् कामाय ब्रह्म प्रियम् भवति
आत्मनस्तु कामाय ब्रह्म प्रियं भवति ।
SF आत्मनस् तु कामाय ब्रह्म प्रियम् भवति
न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्य्
SF न वै अरे क्षत्रस्य कामाय क्षत्रम् प्रियम् भवति
आत्मनस्तु कामाय क्षत्रं प्रियं भवति ।
SF आत्मनस् तु कामाय क्षत्रम् प्रियम् भवति
न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्य्
SF न वै अरे लोकानाम् कामाय लोकास् प्रियास् भवन्ति
आत्मनस्तु कामाय लोकाः प्रिया भवन्ति ।
SF आत्मनस् तु कामाय लोकास् प्रियास् भवन्ति
न वा अरे देवानां कामाय देवाः प्रिया भवन्त्य्
SF न वै अरे देवानाम् कामाय देवास् प्रियास् भवन्ति
आत्मनस्तु कामाय देवाः प्रिया भवन्ति ।
SF आत्मनस् तु कामाय देवास् प्रियास् भवन्ति
न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्य्
SF न वै अरे भूतानाम् कामाय भूतानि प्रियाणि भवन्ति
आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति ।
SF आत्मनस् तु कामाय भूतानि प्रियाणि भवन्ति
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्य्
SF न वै अरे सर्वस्य कामाय सर्वम् प्रियम् भवति
आत्मनस्तु कामाय सर्वं प्रियं भवत्य्
SF आत्मनस् तु कामाय सर्वम् प्रियम् भवति
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो ।
SF आत्मा वै अरे द्रष्टव्यस् श्रोतव्यस् मन्तव्यस्
निदिध्यासितव्यस्
मैत्रेय्य्
SF मैत्रेयि
आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं
विदितम् ॥ ५ ॥
SF आत्मनस् वै अरे दर्शनेन श्रवणेन मत्या विज्ञानेन
इदम् सर्वम् विदितम्

मन्त्र ६ [II.iv.6]

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद
SF ब्रह्म तम् परादात् यस् अन्यत्र आत्मनस् ब्रह्म वेद
क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद
SF क्षत्रम् तम् परादात् यस् अन्यत्र आत्मनस्
क्षत्रम् वेद
लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद
SF लोकास् तम् परादुर्यस् अन्यत्र आत्मनस् लोकान् वेद
देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद
SF देवास् तम् परादुर्यस् अन्यत्र आत्मनस् देवान् वेद
भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद
SF भूतानि तम् परादुर् यस् अन्यत्र आत्मनस् भूतानि वेद
सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं
क्षत्रम्
SF सर्वम् तम् परादात् यस् अन्यत्र आत्मनस् सर्वम्
वेद इदम् ब्रह्म इदम् क्षत्रम्
इमे लोका
SF इमे लोकास्
इमे देवा
SF इमे देवास्
इमानि भूतानीदꣳ सर्वम्
SF इमानि भूतानि इदम् सर्वम्
यदयमात्मा ॥ ६ ॥
SF यद् अयम् आत्मा

मन्त्र ७ [II.iv.7]

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्
ग्रहणाय
SF स यथा दुन्दुभेस् हन्यमानस्य न बाह्यान् शब्दान्
शक्नुयात् ग्रहणाय
दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥
SF दुन्दुभेस् तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दस्
गृहीतस्

मन्त्र ८ [II.iv.8]

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्
ग्रहणाय
SF स यथा षङ्खस्य ध्मायमानस्य न बाह्यान् शब्दान्
शक्नुयात् ग्रहणाय
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥
SF षङ्खस्य तु ग्रहणेन षङ्खध्मस्य वा शब्दस्
गृहीतस्

मन्त्र ९ [II.iv.9]

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्
ग्रहणाय

SF स यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान्
शक्नुयात् ग्रहणाय
वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥
SF वीणायै तु ग्रहणेन वीणावादस्य वा शब्दस् ग्हीतस्

मन्त्र १०

स यथाऽऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा
विनिश्चरन्त्य्
SF स यथा आर्द्रैधाग्नेस् अभ्याहितस्य अभ्याहिताद्
पृथक् धूमास् विनिश्चरन्ति
एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्
यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं
विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्य्
SF एव वै अरे अस्य महतस् भूतस्य निश्वसितम्
निःश्वसितम् एतद् यद् ऋग्वेदस् यजुर्वेदस्
सामवेदस्
अथर्वाङ्गिरसस् इतिहासस् पुराणम् विद्यास्
उपनिषदस्
श्लोकास् सूत्राणि अनुव्याख्यानानि व्याख्यानानि
अस्यैवैतानि निःश्वसितानि ॥ १० ॥
SF अस्य एव एतानि सर्वाणि निश्वसितानिk निःश्वसितानि

मन्त्र ११ [II.iv.11]

स यथा सर्वासामपाः समुद्र एकायनम्
SF स यथा सर्वासाम् अपाम् समुद्रस् एकायनम्
एवः सर्वेषाः स्पर्शानां त्वगेकायनम्
SF एवम् सर्वेषाम् स्पर्शानाम् त्वक् एकायनम्
एवः सर्वेषां गन्धानां नासिकैकायनम्
SF एवम् सर्वेषाम् गन्धानाम् नासिके एकायनम्
एवः सर्वेषाः रसानां जिह्वैकायनम्
SF एवम् सर्वेषाम् रसानाम् जिह्वा एकायनम्
एवः सर्वेषाः रूपाणां चक्षुरेकायनम्
SF एवम् सर्वेषाम् रूपाणाम् चक्षुस् एकायनम्
एवः सर्वेषाः शब्दानाः श्रोत्रमेकायनम्
SF एवम् सर्वेषम् शब्दानाम् श्रोत्रम् एकायनम्
एवः सर्वेषाः सङ्कल्पानां मन एकायनम्
SF एवम् सर्वेषाम् सङ्कल्पानाम् मनस् एकायनम्
एवः सर्वासां विद्यानाः हृदयमेकायनम्
SF एवम् सर्वासाम् विद्यानाम् हृदयम् एकायनम्
एवः सर्वेषां कर्मणाः हस्तावेकायनम्
SF एवम् सर्वेषाम् कर्मणाम् हस्तौ एकायनम्
एवः सर्वेषामानन्दानामुपस्थ एकायनम्
SF एवम् सर्वेषाम् आनन्दानाम् उपस्थस् एकायनम्
एवः सर्वेषां विसर्गाणां पायुरेकायनम्
SF एवम् सर्वेषाम् विसर्गाणाम् पायुस् एकायनम्
एवः सर्वेषामध्वनां पादावेकायनम्
SF एवम् सर्वेषाम् अध्वनाम् पादौ एकायनम्
एवः सर्वेषां वदानां वागेकायनम् ॥ ११ ॥
SF एवम् सर्वेषाम् वदानाम् वाक् एकायनम्

मन्त्र १२ [II.iv.12]

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत
SF स यथा सैन्धवखिल्यस् उदके प्रास्तस् उदकम् एव
अनुविलीयेत
न हास्योद्ग्रहणायेव न हास्योद्ग्रहणायैव स्याद्
SF न अह अस्य उद्ग्रहणाय एव न ह अस्य उद्ग्रहणाय एव स्यात्
यतो यतस्त्वाददीत लवणमेवैवं वा अर इदं महद्
भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय
SF यतोस्यतस् तु आददीत लवणम् एव एवम् वै अरे इदम्
महत् भूतम् अनन्तम् अपारम् विज्ञानघनस् एव
एतेभ्यस्
भूतेभ्यस् समुत्थाय
तान्येवानुविनश्यति
SF तानि एव अनुविनश्यति
न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥
SF न प्रेत्य संज्ञा अस्ति इति अरे ब्रवीमि इति ह उवाच
याज्ञवल्क्यस्

मन्त्र १३ [II.iv.13]

सा होवाच मैत्रेय्य्
SF सा ह उवाच मैत्रेयी
अत्रैव मा भगवानमूमुहद्
SF अत्र एव मा भगवान् अमूमुहन्
न प्रेत्य संज्ञाऽस्तीति ।
SF न प्रेत्य संज्ञा अस्ति इति
स होवाच
SF स ह उवाच याज्ञवल्क्यस्k OM.
न वा अरेऽहं मोहं ब्रवीम्य्
SF न वै अरे अहम् मोहम् ब्रवीमि
अलं वा अर इदं विज्ञानाय ॥ १३ ॥
SF अलम् वै अरे इदम् विज्ञानाय

मन्त्र १४ [II.iv.14]

यत्र हि द्वैतमिव भवति
SF यत्र हि द्वैतम् इव भवति
तदितर इतरं जिघ्रति

SF तद् इतरस् इतरम् जिघ्रति
तदितर इतरं पश्यति
SF तद् इतरस् इतरम् पश्यति
तदितर इतरꣳ शृणोति
SF तद् इतरस् इतरम् शृणोति
तदितर इतरमभिवदति
SF तद् इतरस् इतरम् अभिवदति
तदितर इतरं मनुते
SF तद् इतरस् इतरम् मनुते
तदितर इतरं विजानाति ।
SF तद् इतरस् इतरम् विजानाति
यत्र वा अस्य सर्वमात्मैवाभूत्
SF यत्र तु अस्य सर्वम् आत्मा एव अभूत्
तत्केन कं जिघ्रेत्
SF तद् केन कम् जिघ्रेत्
तत्केन कं पश्येत्
SF तद् केन कम् पश्येत्
तत्केन कꣳ शृणुयात्
SF तद् केन कम् शृणुयात्
तत्केन कमभिवदेत्
SF तद् केन कम् अभिवदेत्
तत्केन कं मन्वीत
SF तद् केन कम् मन्वीत
तत्केन कं विजानीयात् ।
SF तद् केन कम् विजानीयात्
येनेदꣳ सर्वं विजानाति
SF येन इदम् सर्वम् विजानाति
तं केन विजानीयाद्
SF तम् केन विजानीयात्
विज्ञातारमरे केन विजानीयादिति ॥१४ ॥ इति चतुर्थं ब्राह्मणम् ॥
SF विज्ञातारम् अरे केन विजानीयात् इति

पञ्चमं ब्राह्मणम्

मन्त्र १ [II.v.1]

इयं पृथिवी सर्वेषां भूतानां मध्व्
SF इयम् पृथिवी सर्वेषाम् भूतानाम् मधु
अस्यै पृथिव्यै सर्वाणि भूतानि मधु
SF अस्यै पृथिव्यै सर्वाणि भूतानि मधु
यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्याम् पृथिव्याम् तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषः
SF यस् च अयम् अध्यात्मम् शारीरस् तेजोमयस् अमृतमयस् पुरुषस्
अयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्म
SF इदम् ब्रह्म
एदꣳ सर्वम् ॥१ ॥
SF इदम् सर्वम्

मन्त्र २ [II.v.2]

इमा आपः सर्वेषां भूतानां मध्व्
SF इमास् आपस् सर्वेषाम् भूतानाम् मधु
असामपाꣳ सर्वाणि भूतानि मधु
SF असाम् अपाम् सर्वाणि भूतानि मधु
यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषः
SF यस् च अयम् आसु अप्सु तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मꣳ रैतसस्तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अध्यात्मम् रैतसस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्म
SF इदम् ब्रह्म
एदꣳ सर्वम् ॥२ ॥
SF इदम् सर्वम्

मन्त्र ३ [II.v.3]

अयमग्निः सर्वेषां भूतानां मध्व्
SF अयम् अग्निस् सर्वेषाम् भूतानाम् मधु
अस्याग्नेः सर्वाणि भूतानि मधु
SF अस्य अग्नेस् सर्वाणि भूतानि मधु
यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् अग्नौ तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अध्यात्मम् वाङ्मयस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्म
SF इदम् ब्रह्म
एदꣳ सर्वम् ॥३ ॥
SF इदम् सर्वम्

मन्त्र ४ [II.v.4]

अयं वायुः सर्वेषां भूतानां मध्व्
 SF अयम् वायुस् सर्वेषाम् भूतानाम् मधु
अस्य वायोः सर्वाणि भूतानि मधु
 SF अस्य वायोस् सर्वाणि भूतानि मधु
यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अस्मिन् वायौ तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अध्यात्मम् प्राणस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदं अमृतम्।
 SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ४ ॥
 SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ५ [II.v.5]

अयमादित्यः सर्वेषां भूतानां मध्व्
 SF अयम् आदित्यस् सर्वेषाम् भूतानाम् मधु
अस्याऽऽदित्यस्य सर्वाणि भूतानि मधु
 SF अस्य आदित्यस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अस्मिन् आदित्ये तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अध्यात्मम् चाक्षुषस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
 SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ५ ॥
 SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ६ [II.v.6]

इमा दिशः सर्वेषां भूतानां मध्व्
 SF इमास् दिशस् सर्वेषाम् भूतानाम् मधु
आसां दिशाꣳ सर्वाणि भूतानि मधु
 SF असाम् दिशाम् सर्वाणि भूतानि मधु
यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् आसु दिक्षु तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अध्यात्मम् श्रौत्रस् प्रातिश्रुत्कस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
 SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ६ ॥
 SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ७ [II.v.7]

अयं चन्द्रः सर्वेषां भूतानां मध्व्
 SF अयम् चन्द्रस् सर्वेषाम् भूतानाम् मधु
अस्य चन्द्रस्य सर्वाणि भूतानि मधु
 SF अस्य चन्द्रस्य सर्वाणि भूतानि मधु
यश्चायमस्मिंश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अस्मिन् चन्द्रे तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अध्यात्मम् मानसस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
 SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ७ ॥
 SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ८ [II.v.8]

इयं विद्युत्सर्वेषां भूतानं मध्व्
 SF इयम् विद्युत् सर्वेषाम् भूतानम् मधु
अस्यै विद्युतः सर्वाणि भूतानि मधु
 SF अस्यै विद्युतस् सर्वाणि भूतानि मधु
यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अस्याम् विद्युति तेजोमयस् अमृतमयस् पुरुषस्
यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषो
 SF यस् च अयम् अध्यात्मम् तैजसस् तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
 SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ८ ॥
 SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ९ [II.v.9]

अयꣳ स्तनयित्नुः सर्वेषां भूतानां मध्व्
 SF अयम् स्तनयित्नुस् सर्वेषाम् भुतानाम् मधु
अस्य स्तनयित्नोः सर्वाणि भूतानि मधु
 SF अस्य स्तनयित्नोस् सर्वाणि भूतानि मधु

यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् स्तनयित्नौ तेजोमयस्
अमृतमयस् पुरुषस्
यश्चायमध्यात्मꣳ शाब्दः सौवरस्तेजोमयोऽमृतमयः
पुरुषो
SF यस् च अयम् अध्यात्मम् शाब्दस् सौवरस्
तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ९ ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र १० [II.v.10]

अयमाकाशः सर्वेषां भूतानां मध्व्
SF अयम् आकाशस् सर्वेषाम् भूतानाम् मधु
अस्याऽऽकाशस्य सर्वाणि भूतानि मधु
SF अस्य आकाशस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् आकाशे तेजोमयस् अमृतमयस्
पुरुषस्
यश्चायमध्यात्मꣳ हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषः
SF यस् च अयम् अध्यात्मम् हृदि आकाशस् तेजोमयस्
अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ १० ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र ११ [II.v.11]

अयं धर्मः सर्वेषां भूतानां मध्व्
SF अयम् धर्मस् सर्वेषाम् भूतानाम् मधु
अस्य धर्मस्य सर्वाणि भूतानि मधु
SF अस्य धर्मस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् धर्मे तेजोमयस् अमृतमयस्
पुरुषस्
यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अध्यात्मम् धार्मस् तेजोमयस्
अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ ११ ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र १२ [II.v.12]

इदꣳ सत्यꣳ सर्वेषां भूतानां मध्व्
SF इदम् सत्यम् सर्वेषाम् भूतानाम् मधु
अस्य सत्यस्य सर्वाणि भूतानि मधु
SF अस्य सत्यस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् सत्ये तेजोमयस् अमृतमयस्
पुरुषस्
यश्चायमध्यात्मꣳ सात्यस्तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अध्यात्मम् सात्यस् तेजोमयस्
अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ १२ ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र १३ [II.v.13]

इदं मानुषꣳ सर्वेषां भूतानां मध्व्
SF इदम् मानुषम् सर्वेषाम् भूतानाम् मधु
अस्य मानुषस्य सर्वाणि भूतानि मधु
SF अस्य मानुषस्य सर्वाणि भूतानि मधु
यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् मानुषे तेजोमयस् अमृतमयस्
पुरुषस्
यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अध्यात्मम् मानुषस् तेजोमयस्
अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्
SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ १३ ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र १४ [II.v.14]

अयमात्मा सर्वेषां भूतानां मध्व्
SF अयम् आत्मा सर्वेषाम् भूतानाम् मधु
अस्याऽऽत्मनः सर्वाणि भूतानि मधु
SF अस्य आत्मनस् सर्वाणि भूतानि मधु
यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् अस्मिन् आत्मनि तेजोमयस् अमृतमयस्
पुरुषस्
यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषो
SF यस् च अयम् आत्मा तेजोमयस् अमृतमयस् पुरुषस्
ऽयमेव स योऽयमात्मेदममृतम्

SF अयम् एव स यस् अयम् आत्मा इदम् अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ॥ १४ ॥
SF इदम् ब्रह्म इदम् सर्वम्

मन्त्र १५ [II.v.15]

स वा अयमात्मा सर्वेषां भूतानामधिपतिः
SF स वै अयम् आत्मा सर्वेषाम् अधिपतिस्
सर्वेषां भूतानाꣳ राजा ।
SF सर्वेषाम् भूतानाम् राजा
तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता
SF तद् यथा रथनाभौ च रथनेमौ च अरास् सर्वे समर्पितास्
एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १५ ॥
SF एवम् एव अस्मिन् आत्मनि सर्वाणि भूतानि सर्वे देवास् सर्वे लोकास् सर्वे प्राणास् सर्वे एते आत्मानस् समर्पितास्

मन्त्र १६ [II.v.16]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
SF इदम् वै तद् मधु दध्यङ् अथर्वणस् आश्विभ्याम् उवाच
तदेतदृषिः पश्यन्नवोचत् ।
SF तद् एतद् ऋषिस् पश्यन् अवोचत्
तद्वाम्
SF तद् वां
नरा
SF नरा
सनये दꣳस उग्रम्
SF सनये दꣳसस् उग्रम्
आविष्कृणोमि
SF अविस् कृणोमि
तन्यतुर्न वृष्टिम् ।
SF तन्यतुस् न वृष्टिम्
दध्यङ् ह यन्मध्वाथर्वणो वाम्
SF दध्यङ् ह यद् मधु अथर्वणस् वाम्
अश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥ १६ ॥
SF अश्वस्य शीर्ष्णा प्र यद् ईम् उवाच इति

मन्त्र १७ [II.v.17]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
SF इदम् वै तद् मधु दध्यङ् अथर्वणस् आश्विभ्याम् उवाच
तदेतदृषिः पश्यन्नवोचत् ।
SF तद् एतद् ऋषिस् पश्यन् अवोचत्
आथर्वणायाश्विनौ दधीचेऽश्व्यꣳ शिरः प्रत्यैरयतम् ।
SF अथर्वणाय आश्विना दधीचे अश्व्यम् शिरस् प्रति ऐरयतम्
स वां मधु प्रवोचदृतायन्
SF स वाम् मधु प्र वोचत् ऋतायन्
त्वाष्ट्रं यद्
SF त्वाष्ट्रम् यद्
दस्राव्
SF दस्रौ
अपि कक्ष्यं वामिति ॥ १७ ॥
SF अपिकक्ष्यम् वाम् इति

मन्त्र १८ [II.v.18]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
SF इदम् वै तद् मधु दध्यङ् अथर्वणस् आश्विभ्याम् उवाच
तदेतदृषिः पश्यन्नवोचत्
SF तद् एतद् ऋषिस् पश्यन् अवोचत् ।
पुरश्चक्रे द्विपदः
SF पुरस् चक्रे द्विपदस्
पुरश्चक्रे चतुष्पदः ।
SF पुरस् चक्रे चतुष्पदस्
पुरः स
SF पुरस् स
पक्षी भूत्वा
SF पक्षी भुत्वा
पुरः पुरुष आविशदिति ।
SF पुरस् पुरुषस् आविशत् इति
स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो
SF स वै अयम् पुरुषस् सर्वासु पूर्षु पुरिशयस्
नैनेन किंचनानावृतम्
SF न एनेन किम् चन अनावृतम्
नैनेन किंचनासंवृतम् ॥ १८ ॥
SF न एनेन किम् चन असम्वृतम्

मन्त्र १९ [II.v.19]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।
SF इदम् वै तद् मधु दध्यङ् अथर्वणस् आश्विभ्याम् उवाच
तदेतदृषिः पश्यन्नवोचत् ।
SF तद् एतद् ऋषिस् पश्यन् अवोचत्
रूपꣳरूपं प्रतिरूपो बभूव
SF रूपꣳस्रूपम् प्रतिरूपस् बभूव

तदस्य रूपं प्रतिचक्षणाय ।
 SF तद् अस्य रूपम् प्रतिचक्ष्हणाय
इन्द्रो मायाभिः पुरुरूप ईयते
 SF इन्द्रस् मायाभिस् पुरुरूपस् ईयते
युक्ता ह्यस्य हरयः शता दशेतिय्
 SF युक्तास् हि अस्य हरयस् शता दश इति
अयं वै हरयो
 SF अयम् वै हरयस्
ऽयं वै दश च सहस्राणि बहूनि चानन्तानि च ।
 SF अयम् वै दश च सहस्राणि बहूनि च अनन्तानि च
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्
 SF तद् एतद् ब्रह्म अपूर्वम् अनपरम् अनन्तरम् अबाह्यम्
अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥१९ ॥ इति पञ्चमं ब्राह्मणम् ॥
 SF अयम् आत्मा ब्रह्म सर्वानुभूस्

षष्ठं ब्राह्मणम्

मन्त्र १ [II.vi.1]

अथ वꣳशः
 SF अथ वꣳशस्
पौतिमाष्यो गौपवनाद्
 SF पशुतिमाष्यस् गौपवनाद्
गौपवनः पौतिमाष्यात्
 SF गौपवनस् पशुतिमाष्याद्
पौतिमाष्यो गौपवनाद्
 SF पशुतिमाष्यस् गौपवनाद्
गौपवनः कौशिकात्
 SF गौपवनस् कौशिकाद्
कौशिकः कौण्डिन्यात्
 SF कौशिकस् कौण्डिन्याद्
कौण्डिन्यः शाण्डिल्याच्
 SF कौण्डिन्यस् ह्राण्डिल्याद्
छाण्डिल्यः कौशिकाच्च गौतमाच्च
 SF ह्राण्डिल्यस् कौशिकाद् च गौतमाद् च
गौतमः ॥१ ॥
 SF गौतमस्

मन्त्र २ [II.vi.2]

आग्निवेश्याद्
 SF अग्निवेश्याद्
अग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्च्
 SF अग्निवेश्यस् ह्राण्डिल्याद् च अनभिम्लाताद् च
आनभिम्लात आनभिम्लाताद्
 SF अनभिम्लातस् अनभिम्लाताद्
अनभिम्लात अनभिम्लाताद्
 SF अनभिम्लातस् अनभिम्लाताद्
अनभिम्लातो गौतमाद्
 SF अनभिम्लातस् गौतमाद्
गौतमः सैतवप्राचीनयोग्याभ्याꣳ,
 SF गौतमस् शैतवप्राचीनयोग्याभ्याम्
सैतवप्राचीनयोग्यौ पाराशर्यात्
 SF शैतवप्राचीनयोग्यौ पाराशर्याद्
पाराशर्यो भारद्वाजाद्
 SF पाराशर्यस् भारद्वाजाद्
भारद्वाजो भारद्वाजाच्च गौतमाच्च
 SF भारद्वाजस् भारद्वाजाद् च गौतमाद् च
गौतमो भारद्वाजाद्
 SF गौतमस् भारद्वाजाद्
भारद्वाजः पाराशर्यात्
 SF भारद्वाजस् पाराशर्याद्
पाराशर्यो वैजवापायनाद्
 SF पाराशर्यस् वैजवापायनाद्
वैजवापायनः कौशिकायनेः
 SF वैजवापायनस् कौशिकायनेस्
कौशिकायनिः ॥२ ॥
 SF कौशिकायनिस्

मन्त्र ३ [II.vi.3]

घृतकौशिकाद्
 SF घृतकौशिकाद्
घृतकौशिकः पाराशर्यायणात्
 SF घृतकौशिकस् प्राशर्यायणाद्
पारशर्यायणः पाराशर्यात्
 SF पारशर्यायणस् पाराशर्याद्
पाराशर्यो जातूकर्ण्याज्
 SF पाराशर्यस् जातूकर्ण्याद्
जातूकर्ण्य आसुरायणाच्च यास्काच्च्
 SF जातूकर्ण्यस् असुरायणाद् च यास्काद् च
ऽऽसुरायणस्त्रैवणेस्
 SF असुरायणस् त्रैवणेस्
त्रैवणिरौपजन्धनेर्
 SF त्रैवणिस् आउपजन्धनेस्
औपजन्धनिरासुरेर्
 SF औपजन्धनिस् असुरेस्
आसुरिर्भारद्वाजाद्
 SF असुरिस् भारद्वाजाद्
भारद्वाज आत्रेयाद्
 SF भारद्वाजस् अत्रेयाद्

अत्रेयो माण्टेर्
 SF अत्रेयस् माण्टेस्
माण्टिर्गौतमाद्
 SF माण्टिस् गौतमाद्
गौतमो गौतमाद्
 SF
गौतमो वात्स्याद्
 SF गौतमस् वात्स्याद्
वात्स्यः शाण्डिल्याच्
 SF वात्स्यस् हाण्डिल्याद्
छाण्डिल्यः कैशोर्यात्काप्यात्
 SF हाण्डिल्यस् कैशोर्याद् काप्याद्
कैशोर्यः काप्यः कुमारहारितात्
 SF कैशोर्यस् काप्यस् कुमारहारिताद्
कुमारहारितो गालवाद्
 SF कुमारहारितस् गालवाद्
गालवो विदर्भीकौण्डिन्याद्
 SF गालवस् विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्
 SF विदर्भीकौण्डिन्यस् वत्सनपातस् बाभ्रवाद्
वत्सनपाद्बाभ्रवः पथः सौभरात्
 SF वत्सनपाद् बाभ्रवस् पथस् शौभराद्
पन्थाः सौभरोऽयास्यादाङ्गिरसाद्
 SF पन्थास् शौभरस् आयास्याद् अङ्गिरसाद्
अयास्य आङ्गिरस आभूतेस्त्वाष्ट्राद्
 SF अयास्यस् अङ्गिरसस् अभूतेस् त्वाष्ट्राद्
आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्
 SF अभूतिस् त्वाष्ट्रस् विश्वरूपाद् त्वाष्ट्राद्
विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम्
 SF विश्वरूपस् त्वाष्ट्रस् आश्विभ्याम्
अश्विनौ दधीच आथर्वणाद्
 SF अश्विनौ दधीचस् अथर्वणाद्
दध्यङ्ङाथर्वणोऽथर्वणो दैवाद्
 SF दध्यङ् अथर्वणस् आथर्वणस् दैवाद्
अथर्वा दैवो मृत्योः प्राध्वꣳसनान्
 SF अथर्वा दैवस् मृत्योस् प्राध्वꣳसनाद्
मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्
 SF मृत्युस् प्राध्वꣳसनस् प्रध्वꣳसनाद्
प्रध्वꣳसन एकर्षेः
 SF प्रध्वꣳसनस् एकर्षेस्
एकर्षिर्विप्रचित्तेर्
 SF एकर्षिस् विप्रचित्तेस्
विप्रचित्तिर्व्यष्टेर्
 SF विप्रचित्तिस् व्यष्टेस्
व्यष्टिः सनारोः
 SF व्यष्टिस् शनारोस्

सनारुः सनातनात्
 SF शनारुस् शनातनाद्
सनातनः सनगात्
 SF शनातनस् शनगाद्
सनगः परमेष्ठिनः
 SF शनगस् परमेष्ठिनस्
परमेष्ठी ब्रह्मणो
 SF परमेष्ठी ब्रह्मणस्
ब्रह्म स्वयंभु
 SF ब्रह्म स्वयंभु
ब्रह्मणे नमः ॥ ३ ॥  इति षष्ठं ब्राह्मणम् ॥
 SF ब्रह्मणे नमस्

॥ इति बृहदारण्यकोपनिषदि द्वितीयोऽध्यायः ॥

अथ तृतीयोध्यायः ॥

प्रथमं ब्राह्मणम् ।

मन्त्र १ [III.i.1]

ॐ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे ।
 SF जनकस् ह वैदेहस् बहुदक्षिणेन यज्ञेन ईजे
तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्
 SF तत्र ह कुरुपञ्चालानाम् ब्राह्मणास् अभिसमेतास् बभूवुः
तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव
 SF तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव
कः स्विदेषां ब्राह्मणानामनूचानतम इति ।
 SF कस् स्विद् एषाम् ब्राह्मणानाम् अनूचानतमस् इति
स ह गवाꣳ सहस्रमवरुरोध
 SF स ह गवाम् सहस्रम् अवरुरोध
दशदश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥
 SF दशस्दश पादास् एकैकस्यास् शृङ्गयोस् आबद्धास्
 बभूवुः

मन्त्र २ [III.i.2]

तान्होवाच
 SF तान् ह उवाच
ब्राह्मणा भगवन्तो
 SF ब्राह्मणास् भगवन्तस्
यो वो ब्रह्मिष्ठः
 SF यस् वस् ब्रह्मिष्ठस्
स एता गा उदजतामिति ।

SF सस् एतास् गास् उदजताम् इति
ते ह ब्राह्मणा न दधृषुर्
SF ते ह ब्राह्मणास् न दधृषुर्
अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः
SF अथ ह याज्ञवल्क्यस् स्वम् एव ब्रह्मचारिणम् उवाच एतास्
सौम्योदज
SF सौम्य उदज
सामश्रवा३ इति ।
SF शामश्रव इति
ता होदाचकार ।
SF तास् ह उदाचकार
ते ह ब्राह्मणाश्चुक्रुधुः
SF ते ह ब्राह्मणास् चुक्रुधुर्
कथं नु नो ब्रह्मिष्ठो ब्रुवीतेत्य्
SF कथम् नु नस् ब्रह्मिष्ठस् ब्रुवीत इति
अथ ह जनकस्य वैदेहस्य होताऽश्वलो बभूव ।
SF अथ ह जनकस्य वैदेहस्य होता आश्वलस् बभूव
स हैनं पप्रच्छ
SF स ह एनम् पप्रच्छ
त्वं नु खलु नो
SF त्वम् नु खलु नस्
याज्ञवल्क्य
SF याज्ञवल्क्य
ब्रह्मिष्ठोऽसी३ इति ।
SF ब्रह्मिष्ठस् असि इति
स होवाच
SF स ह उवाच
नमो वयं ब्रह्मिष्ठाय कुर्मो
SF नमस् वयम् ब्रह्मिष्ठाय कुर्मस्
गोकामा एव वयꣳ स्म इति ।
SF गोकामास् एव वयम् स्मस् इति
तꣳ ह तत एव प्रष्टुं दध्रे होताऽश्वलः ॥ २ ॥
SF तम् ह ततस् एव प्रष्टुम् दध्रे होता आश्वलस्

मन्त्र ३ [III.i.3]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यदिदꣳ सर्वं मृत्युनाऽऽप्तꣳ,
SF यद् इदम् सर्वम् मृत्युना आप्तम्
सर्वं मृत्युनाऽभिपन्नं
SF सर्वम् मृत्युना अभिपन्नम्
केन यजमानो मृत्योराप्तिमतिमुच्यत इति ।
SF केन यजमानस् मृत्योस् आप्तिम् अतिमुच्यते इति
होत्रर्त्विजाऽग्निना वाचा
SF होत्रा ऋत्विजा अग्निना वाचा
वाग्वै यज्ञस्य होता ।
SF वाक् वै यज्ञस्य होता
तद्येयं वाक् सोऽयमग्निः स होता सा मुक्तिः साऽतिमुक्तिः ॥ ३ ॥
SF तद् या इयम् वाक् सस् अयम् अग्निस् स होता सा मुक्तिस् सा अतिमुक्तिः

मन्त्र ४ [III.i.4]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ,
SF यद् इदम् सर्वम् अहोरात्राभ्याम् आप्तम्
सर्वमहोरात्राभ्यामभिपन्नं
SF सर्वम् अहोरात्राभ्याम् अभिपन्नम्
केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्य्
SF केन यजमानस् अहोरात्रयोस् आप्तिम् अतिमुच्यते इति
अध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन
SF अध्वर्युणा ऋत्विजा चक्षुषा आदित्येन
चक्षुर्वै यज्ञस्याध्वर्युस्
SF चक्षुस् वै यज्ञस्य अध्वर्युः
तद्यदिदं चक्षुः
SF तद् यद् इदम् चक्षुस्
सोऽसावादित्यः
SF सस् असौ आदित्यस्
सोऽध्वर्युः सा मुक्तिः साऽतिमुक्तिः ॥ ४ ॥
SF सस् अध्वर्युस् सा मुक्तिस् सा अतिमुक्तिस्

मन्त्र ५ [III.i.5]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ,
SF यद् इदम् सर्वम् पूर्वपक्षापरपक्षाभ्याम् आप्तम्
सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं
SF सर्वम् पूर्वपक्षापरपक्षाभ्याम् अभिपन्नम्
केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्य्
SF केन यजमानस् पूर्वपक्षापरपक्षयोस् आप्तिम् अतिमुच्यते इति
उद्गात्रर्त्विजा वायुना प्राणेन
SF ब्रह्मणा ऋत्विजा मनसा चन्द्रेण
प्राणो वै यज्ञस्योद्गाता ।
SF मनस् वै यज्ञस्य ब्रह्मा
तद्योऽयं प्राणः
SF तद् यद् इदम् मनस्
स वायुः स उद्गाता सा मुक्तिः साऽतिमुक्तिः ॥ ५ ॥

SF सस् असौ चन्द्रस् स ब्रह्मा सा मुक्तिस् सा अतिमुक्तिस्

मन्त्र ६ [III.i.6]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह् उवाच
यदिदमन्तरिक्षमनारम्बणमिव
SF यद् इदम् अन्तरिक्षम् अनारम्बणम् इव
केनाऽऽक्रमेन यजमानः स्वर्गं लोकमाक्रमत इति
SF केन आक्रमेण यजमानस् स्वर्गम् लोकम् आक्रमते इति
ब्रह्मणर्त्विजा मनसा चन्द्रेण
SF उद्गात्रा ऋत्विजा वयुना प्राणेन
मनो वै यज्ञस्य ब्रह्मा ।
SF प्राणस् वै यज्ञस्य उद्गाता
तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा सा मुक्तिः सातिमुक्तिर्
SF तद् यस् अयम् प्राणस् स वायुस् सस् उद्गाता सा मुक्तिस् सा अतिमुक्तिस्
इत्यतिमोक्षा
SF इति अतिमोक्षास्
अथ संपदः ॥ ६ ॥
SF अथ संपदस्

मन्त्र ७ [III.i.7]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह् उवाच
कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति ।
SF कतिभिस् अयम् अद्य ऋग्भिस् होता अस्मिन् यज्ञे करिष्यति इति
तिसृभिरिति ।
SF तिसृभिस् इति
कतमास्तास्तिस्र इति ।
SF कतमास् तास् तिस्रस् इति
पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।
SF पुरोनुवाक्या च याज्या च शस्या एव तृतीया
किं ताभिर्जयतीति ।
SF किम् ताभिस् जयति इति
यत् किञ्चेदं प्राणभृद् इति ॥ ७ ॥
SF यद् किञ्च इदम् प्राणभृत् इति

मन्त्र ८ [III.i.8]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह् उवाच
कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति ।
SF कति अयम् अद्य अध्वर्युस् अस्मिन् यज्ञ आहुतीस् होष्यति इति
तिस्र इति ।
SF तिस्रस् इति
कतमास्तास्तिस्र इति ।
SF कतमास् तास् तिस्रस् इति
या हुता उज्ज्वलन्ति
SF यास् हुतास् उज्ज्वलन्ति
या हुता अतिनेदन्ते
SF यास् हुतास् अतिनेदन्ति
या हुता अधिशेरते ।
SF यास् हुतास् अधिशेरते
किं ताभिर्जयतीति ।
SF किम् ताभिस् जयति इति
या हुता उज्ज्वलन्ति
SF यास् हुतास् उज्ज्वलन्ति
देवलोकमेव ताभिर्जयति
SF देवलोकम् एव ताभिस् जयति
दीप्यत इव हि देवलोको ।
SF दीप्यते इव हि देवलोकस्
या हुता अतिनेदन्ते
SF यास् हुतास् अतिनेदन्ति
पितृलोकमेव ताभिर्जयत्य्
SF मनुष्यलोकम् पितृलोकम् एव ताभिस् जयति
अतीव हि पितृलोको ।
SF अति इव हि मनुष्यलोकस् पितृलोकस्
या हुता अधिशेरते
SF यास् हुतास् अधिशेरते
मनुष्यलोकमेव ताभिर्जयत्य्
SF पितृलोकम् मनुष्यलोकम् एव ताभिस् जयति
अध इव हि मनुष्यलोकः ॥ ८ ॥
SF अधस् इव हि पितृलोकस् मनुष्यलोकस्

मन्त्र ९ [III.i.9]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह् उवाच
कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्य्
SF कतिभिस् अयम् अद्य ब्रह्मा यज्ञम् दक्षिणतस् देवताभिस् गोपायिष्यति इति गोपायति इति
एकयेति ।
SF एकया इति
कतमा सैकेति ।
SF कतमा सा एका इति
मन एवेत्य्
SF मनस् एव इति

अनन्तं वै मनो
 SF अनन्तम् वै मनस्

अन्ता विश्वे देवा
 SF अनन्तास् विश्वे देवास्
अनन्तमेव स तेन लोकं जयति ॥९ ॥
 SF अनन्तम् एव स तेन लोकम् जयति

मन्त्र १० [III.i.10]

याज्ञवल्क्येति होवाच
 SF याज्ञवल्क्य इति ह उवाच
कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति ।
SF
कति अयम् अद्य उद्गाता अस्मिन् यज्ञे स्तोत्रियास् स्तोष्यति इति
तिस्र इति ।
 SF तिस्रस् इति
कतमास्तास्तिस्र इति ।
 SF कतमास् तास् तिस्रस् इति
पुरोनुवाक्या च याज्या च शस्यैव तृतीया
 SF पुरोनुवाक्या च याज्या च शस्या एव तृतीया अधिदेवतम्
कतमास्ता या अध्यात्ममिति ।
 SF कतमास् तास् यास् अध्यात्मम् इति
प्राण एव पुरोनुवाक्याऽपानो याज्या
 SF प्राणस् एव पुरोनुवाक्या अपानस् याज्या
व्यानः शस्या ।
 SF व्यानस् शस्या
किं ताभिर्जयतीति ।
 SF किम् ताभिस् जयति इति
पृथिवीलोकमेव पुरोनुवाक्यया जयत्य्
 SF पृथिवीलोकम् एव पुरोनुवाक्यया जयति
अन्तरिक्षलोकं याज्यया
 SF अन्तरिक्षलोकम् याज्यया
द्युलोकꣳ शस्यया
 SF द्युलोकम् शस्यया
ततो ह होताऽश्वल उपरराम ॥१० ॥इति प्रथमं ब्राह्मणम् ॥
 SF ततस् ह होता आश्वलस् उपरराम

द्वितीयं ब्राह्मणम् ।

मन्त्र १ [III.ii.1]

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ ।
 SF अथ ह एनम् जारत्कारवस् आर्तभागस् पप्रच्छ
याज्ञवल्क्येति होवाच
 SF याज्ञवल्क्य इति ह उवाच
कति ग्रहाः
 SF कति ग्रहास्
कत्यतिग्रहा इत्य्
 SF कति अतिग्रहास् इति
अष्टौ ग्रहा
 SF अष्टौ ग्रहास्
अष्टावतिग्रहा इति
 SF अष्टौ अतिग्रहास् इति
ये तेऽष्टौ ग्रहा
 SF ये ते अष्टौ ग्रहास्
अष्टावतिग्रहाः
 SF अष्टौ अतिग्रहास्
कतमे त इति ॥१ ॥
 SF कतमे ते इति

मन्त्र २ [III.ii.2]

प्राणो वै ग्रहः ।
 SF प्राणस् वै ग्रहस्
सोऽपानेनातिग्राहेण गृहीतो
 SF सस् अपानेन अतिग्रहेण स गन्धेन अतिग्रहेन गृहीतस्
ऽपानेन हि गन्धाञ्जिघ्रति ॥२ ॥
 SF अपानेन प्राणेन हि गन्धान् जिघ्रति

मन्त्र ३ [III.ii.3]

वाग्वै ग्रहः ।
 SF वाक् वै ग्रहस्
स नाम्नातिग्राहेण गृहीतो
 SF स नाम्ना अतिग्रहेण गृहीतस्
वाचा हि नामान्यभिवदति ॥३ ॥
 SF वाचा हि नामानि अभिवदति

मन्त्र ४ [III.ii.4]

जिह्वा वै ग्रहः ।
 SF जिह्वा वै ग्रहस्
स रसेनातिग्राहेण गृहीतो
 SF स रसेन अतिग्रहेण गृहीतस्
जिह्वया हि रसान्विजानाति ॥४ ॥
 SF जिह्वया हि रसान् विजानाति

मन्त्र ५ शIII.ii.5]

चक्षुर्वै ग्रहः ।
 SF चक्षुस् वै ग्रहस्
स रूपेणातिग्राहेण गृहीतश्

SF स रूपेण अतिग्रहेण गृहीतस्
चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥
SF चक्षुषा हि रूपाणि पश्यति

मन्त्र ६ [III.ii.6]

श्रोत्रं वै ग्रहः ।
SF श्रोत्रम् वै ग्रहस्
स शब्देनातिग्राहेण गृहीतः
SF स शब्देन अतिग्रहेण गृहीतस्
श्रोत्रेण हि शब्दाञ्शृणोति ।
SF श्रोत्रेण हि शब्दान् शृणोति

मन्त्र ७ [III.ii.7]

मनो वै ग्रहः ।
SF मनस् वै ग्रहस्
स कामेनातिग्राहेण गृहीतो
SF स कामेन अतिग्रहेण गृहीतस्
मनसा हि कामान्कामयते ॥ ७ ॥
SF मनसा हि कामान् कामयते

मन्त्र ८ [III.ii.8]

हस्तौ वै ग्रहः ।
SF हस्तौ वै ग्रहस्
स कर्मणाऽतिग्राहेण गृहीतो
SF स कर्मणा अतिग्रहेण गृहीतस्
हस्ताभ्याꣳ हि कर्म करोति ॥ ८ ॥
SF हस्ताभ्याम् हि कर्म करोति

मन्त्र ९ [II.ii.9]

त्वग्वै ग्रहः ।
SF त्वक् वै ग्रहस्
स स्पर्शेनातिग्राहेण गृहीतस्
SF स स्पर्शेन अतिग्रहेण गृहीतः
त्वचा हि स्पर्शान्वेदयत ।
SF त्वचा हि स्पर्शान् वेदयते
इत्येतेऽष्टौ ग्रहा
SF इति अष्टौ ग्रहास्
अष्टावतिग्रहाः ॥ ९ ॥
SF अष्टौ अतिग्रहास्

मन्त्र १० [III.ii.10]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यदिदꣳ सर्वं मृत्योरन्नं
SF यद् इदम् सर्वम् मृत्योस् अन्नम्
का स्वित्सा देवता
SF का स्वित् सा देवता
यस्या मृत्युरन्नमित्य्
SF यस्यास् मृत्युस् अन्नम् इति
अग्निर्वै मृत्युः
SF अग्निस् वै मृत्युस्
सोऽपामन्नम्
SF सस् अपाम् अन्नम्
अप पुनर्मृत्युं जयति ॥ १० ॥
SF अप पुनर्मृत्युम् जयति

मन्त्र ११ [III.ii.11]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यत्रायं पुरुषो म्रियत
SF यत्र अयम् पुरुषस् म्रियते
उदस्मात्प्राणाः क्रामन्त्य्
SF उद् अस्माद् प्राणास् क्रामन्ति
अहो३ नेति
SF अहो न इति
नेति होवाच याज्ञवल्क्यो
SF न इति ह उवाच याज्ञवल्क्यस्
ऽत्रैव समवनीयन्ते
SF अत्र एव समवनीयन्ते
स उच्छ्वयत्य्
SF स उच्छ्वयति
आध्मायति
SF अध्मायति
आध्मातो मृतः शेते ॥ ११ ॥
SF अध्मातस् मृतस् शेते

मन्त्र १२ शIII.ii.12]

याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यत्रायं पुरुषो म्रियते
SF यत्र अयम् पुरुषस् म्रियते
किमेनं न जहातीति ।
SF किम् एनम् न जहाति इति
नामेत्य्
SF नाम इति

अनन्तं वै नामानन्ता विश्वे देवा
 SF अनन्तम् वै नाम अनन्तास् विश्वे देवास्
अनन्तमेव स तेन लोकं जयति ॥१२ ॥
 SF अनन्तम् एव स तेन लोकम् जयति

मन्त्र १३ [III.ii.13]

याज्ञवल्क्येति होवाच
 SF याज्ञवल्क्य इति ह उवाच
यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति
 SF यत्र अस्य पुरुषस्य मृतस्य अग्निम्
वातं प्राणश्
 SF वाक् अप्येति वातम् प्राणस्
चक्षुरादित्यम्
 SF चक्षुस् आदित्यम्
मनश्चन्द्रं
 SF मनस् चन्द्रम्
दिशः श्रोत्रम्
 SF दिशस् श्रोत्रम्
पृथिवीꣳ शरीरम्
 SF पृथिवीम् शरीरम्
आकाशमात्मौषधीर्लोमानि
 SF अकाशम् आत्मा ओषधीस् लोमानि
वनस्पतीन्केशा
 SF वनस्पतीन् केशास्
अप्सु लोहितं च रेतश्च निधीयते
 SF अप्सु लोहितम् च रेतस् च निधीयते
क्वायं तदा पुरुषो भवतीत्य्
 SF क्व अयम् तदा पुरुषस् भवति इति
अहर
 SF अहर
सौम्य
 SF सौम्य
हस्तम्
 SF हस्तम्
आर्तभागेति होवाऽऽचावामेवैतस्य वेदिष्यावो
 SF अर्तभाग इति ह उवाचk OM. इति ह उवाच अवाम् एव
  एतद् k एव एतस्य वेदिष्यावस्
न नावेतत्सजन इति ।
 SF न नौ एतद् सजन इति
तौ होत्क्रम्य मन्त्रयां चक्राते
 SF तौ ह उत्क्रम्य मन्त्रयाम् चक्रतुस् k चक्राते
तौ ह यदूचतुः
 SF तौ ह यद् ऊचतुर्
कर्म हैव तदूचतुर्
 SF कर्म ह एव तद् ऊचतुर्

अथ ह यत्प्रशꣳसतुः
 SF अथ ह यद् प्रशꣳसतुर्
कर्म हैव तत् प्रशꣳसतुः
 SF कर्म ह एव तद् प्रशꣳसतुर्
पुण्यो वै पुण्येन कर्मणा भवति
 SF पुण्यस् वै पुण्येन कर्मणा भवति
पापः पापेनेति ।
 SF पापस् पापेन इति
ततो ह जारत्कारव आर्तभाग उपरराम ॥१३ ॥इति द्वितीयं राह्मणम् ॥
 SF ततस् ह जारत्कारवस् आर्तभागस् उपरराम

तृतीयं ब्राह्मणम् ।

मन्त्र १ [III.iii.1]

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ।
 SF अथ ह एनम् भुज्युस् लाह्यायनिस् पप्रच्छ
याज्ञवल्क्येति होवाच
 SF याज्ञवल्क्य इति ह उवाच
मद्रेषु चरकाः पर्यव्रजाम
 SF मद्रेषु चरकास् पर्यव्रजाम
ते पतञ्चलस्य काप्यस्य गृहानैम ।
 SF ते पतञ्चलस्य काप्यस्य गृहान् ऐम
तस्याऽऽसीद् दुहिता गन्धर्वगृहीता
 SF तस्य आसीत् दुहिता गन्धर्वगृहीता
तमपृच्छाम
 SF तम् अपृच्छाम
कोऽसीति ।
 SF कस् असि इति
सोऽब्रवीत्
 SF सस् अब्रवीत्
सुधन्वाऽऽङ्गिरस इति ।
 SF शुधन्वा अङ्गिरसस् इति
तं यदा लोकानामन्तानपृच्छामाथैतदथैनमब्रूम
 SF तम् यदा लोकानाम् अन्तान् अपृच्छाम अथ एतद् अथ
  एनम् अब्रूम
क्व पारिक्षिता अभवन्निति
 SF क्व पारिक्षितास् अभवन् इति
क्व पारिक्षिता अभवन्
 SF क्व पारिक्षितास् अभवन् इति k अभवन्
स त्वा पृच्छामि
 SF तद् स त्वा पृच्छामि
याज्ञवल्क्य
 SF याज्ञवल्क्य
क्व पारिक्षिता अभवन्निति ॥१ ॥

SF क्व पारिक्षितास् अभवन् इति

मन्त्र २ [III.iii.2]

स होवाचोवाच वै सो
SF स ह् उवाच उवाच वै स तद्
ऽगच्छन्वै ते तद्
SF अगच्छन् वै ते तत्र
यत्राश्वमेधयाजिनो गच्छन्तीति ।
SF यत्र अश्वमेधयाजिनस् गच्छन्ति इति
क्व न्वश्वमेधयाजिनो गच्छन्तीति ।
SF क्व नु अश्वमेधयाजिनस् गच्छन्ति इति
द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकस्
SF द्वात्रिंशत वै देवरथाह्न्यानि अयम् लोकः
तं समन्तं पृथिवी द्विस्तावत्पर्येति
SF तम् समन्तम् लोकम् द्विस्तावत् पृथिवी समन्तम् पृथिवी द्विस्तावत् पर्येति
तां समन्तं पृथिवी द्विस्तावत्समुद्रः पर्येति ।
SF ताम् ताम् समन्तम् पृथिवीम् द्विस्तावत् समुद्रस् पर्येति
तद्यावती क्षुरस्य धारा
SF तद् यावती क्षुरस्य धारा
यावद्वा मक्षिकायाः पत्रं
SF यावत् वा मक्षिकायास् पत्त्रम्
तावानन्तरेणाऽऽकाशस्
SF तावान् अन्तरेण आकाशः
तान् इन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्
SF तान् ९न्द्रस् सुपर्णस् भूत्वा वायवे प्रायच्छत्
तान् वायुरात्मनि धित्वा तत्रागमयद्यत्र अश्वमेधयाजिनोऽभवन्नित्य्
SF तान् वायुस् आत्मनि धित्वा तत्र अगमयत् यत्र परिक्षितास् अश्वमेधयाजिनस् अभवन् इति
एवमिव वै स वायुमेव प्रशशंस
SF एवम् इव वै स वायुम् एव प्रशशंस
तस्माद्वायुरेव व्यष्टिर्
SF तस्माद् वायुस् एव व्यष्टिस्
वायुः समष्टिर्
SF वायुस् समष्टिस्
अप पुनर्मृत्युं जयति
SF अप पुनर्मृत्युम् जयति
य एवं वेद ।
SF यस् एवम् वेद
ततो ह् भुज्युर्लाह्यायनिरुपरराम ॥२ ॥इति तृतीयं ब्राह्मणम् ॥
SF ततस् ह् भुज्युस् लाह्यायनिस् उपरराम

चतुर्थं ब्रह्मणम् ।

मन्त्र १ [III.iv.1]

अथ हैनमूषस्तश्चाक्रायणः पप्रच्छ ।
SF अथ ह् एनम् ऊषस्तस् चाक्रायणस् पप्रच्छ
याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह् उवाच
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्
SF यद् साक्षाद् अपरोक्षाद् ब्रह्म यस् आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेत्य्
SF तम् मे व्याचक्ष्व इति
एष त आत्मा सर्वान्तरः ।
SF एष ते आत्मा सर्वान्तरस्
कतमो
SF कतमस्
याज्ञवल्क्य
SF याज्ञवल्क्य
सर्वान्तरो ।
SF सर्वान्तरस्
यः प्राणेन प्राणिति
SF यस् प्राणेन प्राणिति
स त आत्मा सर्वान्तरो
SF स ते आत्मा सर्वान्तरस्
योऽपानेनापानिति
SF यस् अपानेन अपानिति
स त आत्मा सर्वान्तरो
SF स ते आत्मा सर्वान्तरस्
यो व्यानेन व्यानिति
SF यस् व्यानेन व्यनिति
स त आत्मा सर्वान्तरो
SF स ते आत्मा सर्वान्तरस्
य उदानेनोदानिति
SF यस् उदानेन उदनिति
स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥१ ॥
SF स ते आत्मा सर्वान्तरस्

मन्त्र २ [III.iv.2]

स होवाचोषस्तश्चाक्रायणः
SF स ह् उवाच ऊषस्तस् चाक्रायणस्
यथा विब्रूयादसौ गौर्
SF यथा वै ब्रूयात् असौ गौस्
असावश्व इत्य्
SF असौ अश्वस् इति
एवमेवैतद्व्यपदिष्टं भवति ।

SF एवम् एव एतद् व्यपदिष्टम् भवति
यदेव साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः
SF यद् एव साक्षाद् अपरोक्षाद् ब्रह्म यस् आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेति ।
SF तम् मे व्याचक्ष्व इति
एष त आत्मा सर्वान्तरः ।
SF एष ते आत्मा सर्वान्तरस्
कतमो
SF कतमस्
याज्ञवल्क्य
SF याज्ञवल्क्य
सर्वान्तरो ।
SF सर्वान्तरस्
न दृष्टेर्द्रष्टारं पश्येर्
SF न दृष्टेस् द्रष्टारम् पश्येस्
न श्रुतेः श्रोतारꣳ शृणुया
SF न श्रुतेस् श्रोतारम् शृणुयास्
न मतेर्मन्तारं मन्वीथा
SF न मतेस् मन्तारम् मन्वीथास्
न विज्ञातेर्विज्ञातारं विजानीया
SF न विज्ञातेस् विज्ञातारम् विजानीयास्
एष त आत्मा सर्वान्तरो
SF एष ते आत्मा सर्वान्तरस्
ऽतोऽन्यदार्तं
SF अतस् अन्यद् आर्तम्
ततो होषस्तस्चाक्रायण उपरराम ॥२ ॥ इति चतुर्थं ब्राह्मणम् ॥
SF ततस् ह ऊषस्तस् चाक्रायण उपरराम

पञ्चमं ब्राह्मणम् ।

मन्त्र १ [III.v.1]

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ
SF अथ ह एनम् कहोडस् कहोलस् कौषीतकेयस्
पप्रच्छ
याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति ह उवाच
यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्
SF यद्k add. mark 1 एव साक्षाद् अपरोक्षाद् ब्रह्म यस् आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेत्य्
SF तम् मे व्याचक्ष्व इति
एष त आत्मा सर्वान्तरः ।
SF एष ते आत्मा सर्वान्तरस्
कतमो
SF कतमस्
याज्ञवल्क्य
SF याज्ञवल्क्य
सर्वान्तरो ।
SF सर्वान्तरस्
योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्य्
SF यस् अशनायापिपासे शोकम् मोहम् जराम् मृत्युम् अत्येति
एतं वै तमात्मानं विदित्वा
SF एतम् वै तम् आत्मानम् विदित्वा
ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च
व्युत्थायाथ भिक्षाचर्यं चरन्ति ।
SF ब्राह्मणास् पुत्रैषणायास् च वित्तैषणायास् च लोकैषणायास् च व्युत्थाय अथ भिक्षाचर्यम् चरन्ति
या ह्येव पुत्रैषणा सा वित्तैषणा
SF या हि एव पुत्रैषणा सा वित्तैषणा
या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतस्
SF या वित्तैषणा सा लोकैषणा उभे हि एते एषणे एव भवतः
तस्माद्ब्राह्मणः
SF तस्माद् पण्डितस् ब्रामणस्
पाण्डित्यं निर्विद्य
SF पाण्डित्यम् निर्विद्य
बाल्येन तिष्ठासेत्।
SF बाल्येन तिष्ठासेत्
बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिर्
SF बाल्यम् च पाण्डित्यम् च निर्विद्य अथ मुनिस्
अमौनं च मौनं च निर्विद्याथ ब्राह्मणः ।
SF अमौनम् च मौनम् च निर्विद्य अथ ब्राह्मणस्
स ब्राह्मणः केन स्याद्
SF स ब्राह्मणस् केन स्यात्
येन स्यात्
SF येन स्यात्
तेनेदृश एवातोऽन्यदार्तम् ।
SF तेन ईदृश एव भवति
य एवं वेद एवातोऽन्यदार्तं ।
SF यस् एवम् वेद एव अतस् अन्यद् आर्तम्
ततो ह कहोलः कौषीतकेय उपरराम ॥१ ॥ इति पञ्चमं ब्राह्मणम् ॥
SF ततस् ह कहोडस् कहोलस् कौषीतकेयस् उपरराम

षष्ठं ब्राह्मणम् ।

मन्त्र १ [III.vi.1]

अथ हैनं गार्गी वाचक्नवी पप्रच्छ

SF अथ हैनं गार्गी वाचक्नवी पप्रच्छ
याज्ञवल्क्येति होवाच
SF याज्ञवल्क्य इति होवाच
यदिदꣳ सर्वमप्स्वोतं च प्रोतं च
SF यद् इदम् सर्वम् अप्सु ओतम् च प्रोतम् च
कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु नु खलु अपस् ओतास् च प्रोतास् च इति
वायौ
SF वायौ
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्य्
SF कस्मिन् नु नु खलु वायुस् ओतस् च प्रोतस् च इति
अन्तरिक्षलोकेषु
SF अकाशे एव अन्तरिक्षलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु आकाशस् नु खलु अन्तरिक्षलोकास् ओतस् च प्रोतस् च इति
गन्धर्वलोकेषु
SF अन्तरिक्षलोकेषु गन्धर्वलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु गन्धर्वलोका ओताश्च प्रोताश्चेत्य्
SF कस्मिन् नु खलु अन्तरिक्षलोकास् गन्धर्वलोकास् ओतास् च प्रोतास् च इति
आदित्यलोकेषु
SF अदित्यलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन् नु खल्वादित्यलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु आदित्यलोकास् ओतास् च प्रोतास् च इति
चन्द्रलोकेषु
SF चन्द्रलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु चन्द्रलोकास् ओतास् च प्रोतास् च इति
नक्षत्रलोकेषु
SF नक्षत्रलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु नक्षत्रलोकास् ओतास् च प्रोतास् च इति
देवलोकेषु
SF देवलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेति
SF कस्मिन् नु खलु देवलोकास् ओतास् च प्रोतास् च इति
इन्द्रलोकेषु
SF गन्धर्वलोकेषु इन्द्रलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु गन्धर्वलोकास् इन्द्रलोकास् ओतास् च प्रोतास् च इति
प्रजापतिलोकेषु
SF प्रजापतिलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु प्रजापतिलोकास् ओतास् च प्रोतास् च इति
ब्रह्मलोकेषु
SF ब्रह्मलोकेषु
गार्गीति ।
SF गार्गि इति
कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति ।
SF कस्मिन् नु खलु ब्रह्मलोकास् ओतास् च प्रोतास् च इति
स होवाच
SF स होवाच
गार्गि
SF गार्गि
मातिप्राक्षीर्
SF मा अतिप्राक्षीस्
मा ते मूर्धा व्यपप्तद्
SF मा ते मूर्धा व्यपप्तत् विपप्तत्
अनतिप्रश्न्यां वै देवतामतिपृच्छसि ।
SF अनतिप्रश्न्याम् वै देवताम् अतिपृच्छसि
गार्गि
SF गार्गि
माऽतिप्राक्षीरिति ।
SF मा अतिप्राक्षीस् इति
ततो ह गार्गी वाचक्नव्युपरराम ॥१॥ इति षष्ठं ब्राह्मणम् ॥
SF ततस् ह गार्गी वाचक्नवी उपरराम

सप्तमं ब्राह्मणम् ।

मन्त्र १ [III.vii.1]

अथ हैनमूद्दालक आरुणिः पप्रच्छ
 SF अथ एनम् ऊद्दालकस् आरुणिस् पप्रच्छ
याज्ञवल्क्येति होवाच
 SF याज्ञवल्क्य इति ह उवाच
मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु
 SF मद्रेषु अवसाम पतञ्चलस्य काप्यस्य गृहेषु
यज्ञमधीयानास्
 SF यज्ञम् अधीयानाः
तस्याऽऽसीद्भार्या गन्धर्वगृहीता ।
 SF तस्य आसीत् भार्या गन्धर्वगृहीता
तमपृच्छाम
 SF तम् अपृच्छाम
कोऽसीति ।
 SF कस् असि इति
सोऽब्रवीत्
 SF सस् अब्रवीत्
कबन्ध आथर्वण इति ।
 SF कबन्धस् अथर्वणस् इति
सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च
 SF सस् अब्रवीत् पतञ्चलम् काप्यम् याज्ञिकान् च
वेत्थ नु त्वम्
 SF वेत्थ नु त्वम्
काप्य
 SF काप्य
तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च
भूतानि संदृब्धानि भवन्तीति ।
 SF तद् सूत्रम् यस्मिन् अयम् च लोकस् परस् च
 लोकस् सर्वाणि च भूतानि संदृब्धानि भवन्ति इति
सोऽब्रवीत्पतञ्चलः काप्यो
 SF सस् अब्रवीत् पतञ्चलस् काप्यस्
नाहं तद्
 SF न अहम् तद्
भगवन्
 SF भगवन्
वेदेति ।
 SF वेद इति
सोऽब्रवीत् पतञ्चलं काप्यं याज्ञिकाꣳश्चः
 SF सस् अब्रवीत् पतञ्चलम् काप्यम् याज्ञिकान् च
वेत्थ नु त्वम्
 SF वेत्थ नु त्वम्
काप्य
 SF काप्य
तमन्तर्यामिणम्
 SF तम् अन्तर्यामिणम्
य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतानि योऽन्तरो
यमयतीति ।
 SF यस् इमम् च लोकम् परम् च लोकम् सर्वाणि च
 भूतानि अन्तरस् यमयति इति
सोऽब्रवीत् पतञ्चलः काप्यो
 SF सस् अब्रवीत् पतञ्चलस् काप्यस्
नाहं तं
 SF न अहम् तम्
भगवन्
 SF भगवन्
वेदेति ।
 SF वेद इति
सोऽब्रवीत् पतञ्चलं काप्यं याज्ञिकाꣳश्च
 SF सस् अब्रवीत् पतञ्चलम् काप्यम् याज्ञिकान् च
यो वै तत्
 SF यस् वै तद्
काप्य
 SF काप्य
सूत्रं विद्यात्तं चान्तर्यामिणमिति
 SF सूत्रम् विद्यात् तम् च अन्तर्यामिणम्
स ब्रह्मवित्
 SF स ब्रह्मविद्
स लोकवित्
 SF स लोकविद्
स देववित्
 SF स देवविद्
स वेदवित्
 SF स वेदविद्
स भूतवित्
 SF स भूतविद्
स आत्मवित्
 SF स आत्मविद्
स सर्वविदिति तेभ्योऽब्रवीत्
 SF स सर्वविद् इति तेभ्यस् अब्रवीत्
तदहं वेद ।
 SF तद् अहम् वेद
तच्चेत्त्वम्
 SF तद् चेद् त्वम्
याज्ञवल्क्य
 SF याज्ञवल्क्य
सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे
 SF सूत्रम् अविद्वान् तम् च अन्तर्यामिणम् ब्रह्मगवीस्
 उदजसे
मूर्धा ते विपतिष्यतीति ।
 SF मूर्धा ते विपतिष्यति इति
वेद वा अहम्
 SF वेद वै अहम्
गौतम

SF गौतम
तत्सूत्रं तं चान्तर्यामिणमिति ।
SF तद् सूत्रम् तम् च अन्तर्यामिणम् इति
यो वा इदं कश्चिद्ब्रूयात्
SF यस् वै इदम् कश्च ब्रूयात्
वेद वेदेति ।
SF वेद वेद इति
यथा वेत्थ
SF यथा वेत्थ
तथा ब्रूहीति ॥१ ॥
SF तथा ब्रूहि इति

मन्त्र २ [III.vii.2]

स होवाच वायुर्वै
SF स होवच वायुस् वै
गौतम
SF गौतम
तत्सूत्रम्
SF तद् सूत्रम्
वायुना वै
SF वायुना वै
गौतम
SF गौतम
सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि
संदृब्धानि भवन्ति ।
SF सूत्रेण अयम् च लोकस् परस् च लोकस् सर्वाणि च भूतानि संदृब्धानि भवन्ति
तस्माद्वै
SF तस्माद् वै
गौतम
SF गौतम
पुरुषं प्रेतमाहुर्
SF पुरुषम् प्रेतम् आहुर्
व्यस्रꣳसिषतास्याङ्गानीति
SF व्यस्रꣳसिषत अस्य अङ्गानि इति
वायुना हि
SF वायुना हि
गौतम
SF गौतम
सूत्रेण संदृब्धानि भवन्तीत्य्
SF सूत्रेण सम्दृब्धानि भवन्ति इति
एवमेवैतद्
SF एवम् एवk OM. एतद्
याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ॥२ ॥
SF याज्ञवल्क्य अन्तर्यामिणम् ब्रूहि इति

मन्त्र ३ [III.vii.3]

यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो
SF यस् पृथिव्याम् तिष्ठन् पृथिव्यास् अन्तरस्
यं पृथिवी न वेद
SF यम् पृथिवी न वेद
यस्य पृथिवी शरीरं
SF यस्य पृथिवी शरीरम्
यः पृथिवीमन्तरो यमयत्य्
SF यस् पृथिवीम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥३ ॥
SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ४ [III.vii.4]

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो
SF यस् अप्सु तिष्ठन् अद्भ्यस् अन्तरस्
यमापो न विदुः
SF यम् आपस् न विदुर्
यस्यापः शरीरम्
SF यस्याऽऽपस् शरीरम्
योऽपोऽन्तरो यमयत्य्
SF यस् अपस् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥४ ॥
SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ५ [III.vii.5]

योऽग्नौ तिष्ठन्नग्नेरन्तरो
SF यस् अग्नौ तिष्ठन् अग्नेस् अन्तरस्
यमग्निर्न वेद
SF यम् अग्निस् न वेद
यस्याग्निः शरीरम्
SF यस्य अग्निस् शरीरम्
योऽग्निमन्तरो यमयति
SF यस् अग्निम् अन्तरस् यमयति
एष त आत्मान्तर्याम्यमृतः ॥५ ॥
SF सk एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ६ [III.vii.6]

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो
SF यस् अन्तरिक्षे तिष्ठन् अन्तरिक्षाद् अन्तरस्
यमन्तरिक्षं न वेद
SF यम् अन्तरिक्षम् न वेद

यस्यान्तरिक्षꣳ शरीरं
 SF यस्य अन्तरिक्षम् शरीरम्
योऽन्तरिक्षमन्तरो यमयत्य्
 SF यस् अन्तरिक्षम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥६ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ७ [III.vii.7]

यो वायौ तिष्ठन्वायोरन्तरो
 SF यस् वायौ तिष्ठन् वायोस् अन्तरस्
यं वायुर्न वेद
 SF यम् वायुस् न वेद
यस्य वायुः शरीरं
 SF यस्य वायुस् शरीरम्
यो वायुमन्तरो यमयत्य्
 SF यस् वायुम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥७ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ८ [III.vii.8]

यो दिवि तिष्ठन्दिवोऽन्तरो
 SF यस् दिवि तिष्ठन् दिवस् अन्तरस्
यं द्यौर्न वेद
 SF यम् द्यौस् न वेद
यस्य द्यौः शरीरं
 SF यस्य द्यौस् शरीरम्
यो दिवमन्तरो यमयत्य्
 SF यस् दिवम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥८ ॥
 SF एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ९ [III.vii.9]

य आदित्ये तिष्ठन्नादित्यादन्तरो
 SF यस् आदित्ये तिष्ठन् आदित्याद् अन्तरस्
यमादित्यो न वेद
 SF यम् आदित्यस् न वेद
यस्याऽऽदित्यः शरीरम्
 SF यस्य आदित्यस् शरीरम्
य आदित्यमन्तरो यमयत्य्
 SF यस् आदित्यम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥९ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १० [III.vii.10]

यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो
 SF यस् दिक्षु तिष्ठन् दिग्भ्यस् अन्तरस्
यं दिशो न विदुर्
 SF यम् दिशस् न विदुः
यस्य दिशः शरीरं
 SF यस्य दिशस् शरीरम्
यो दिशोऽन्तरो यमयत्य्
 SF यस् दिशस् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥१० ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र ११ [III.vii.11]

यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो
 SF यस् चन्द्रतारके तिष्ठन् चन्द्रतारकाद् अन्तरस्
यं चन्द्रतारकं न वेद
 SF यम् चन्द्रतारकम् न वेद
यस्य चन्द्रतारकꣳ शरीरं
 SF यस्य चन्द्रतारकम् शरीरम्
यश्चन्द्रतारकमन्तरो यमयत्य्
 SF यस् चन्द्रतारकम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥११ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १२ [III.vii.12]

य आकाशे तिष्ठन्नाकाशादन्तरो
 SF यस् आकाशे तिष्ठन् आकाशाद् अन्तरस्
यमाकाशो न वेद
 SF यम् आकाशस् न वेद
यस्याऽऽकाशः शरीरं
 SF यस्य आकाशस् शरीरम्
य आकाशमन्तरो यमयत्य्
 SF यस् आकाशम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥१२ ॥
 SF एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १३ [III.vii.13]

यस्तमसि तिष्ठꣳस्तमसोऽन्तरो
 SF यस् तमसि तिष्ठन् तमसस् अन्तरो
यं तमो न वेद
 SF यम् तमस् न वेद
यस्य तमः शरीरं

 SF यस्य तमस् शरीरम्
यस्तमोऽन्तरो यमयत्य्
 SF यस् तमस् अन्तरस् यमयति
एष त आत्मान्तर्याम्यमृतः ॥१३ ॥
 SF स k एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १४ [III.vii.14]

यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो
 SF यस् तेजसि तिष्ठन् तेजसः अन्तरः
यं तेजो न वेद
 SF यम् तेजस् न वेद
यस्य तेजः शरीरम्
 SF यस्य तेजः शरीरम्
यस्तेजोऽन्तरो यमयत्य्
SF यस् तेजः अन्तरः यमयति
स एष त आत्माऽन्तर्याम्यमृत
 SF स एष त आत्मा अन्तर्यामी अमृतस्
इत्यधिदैवतम्
 SF
अथाधिभूतम् ॥१४ ॥
 SF

मन्त्र १५ [III.vii.15]

यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो
 SF यस् सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यस्
 भूतेभ्यस् अन्तरस्
यꣳ सर्वाणि भूतानि न विदुर्
 SF यम् सर्वाणि भूतानि न विदुः
यस्य सर्वाणि भुतानि शरीरं
 SF यस्य सर्वाणि भुतानि शरीरम्
यः सर्वाणि भूतान्यन्तरो यमयत्य्
 SF यस् सर्वाणि भूतानि अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृत
 SF स एष ते आत्मा अन्तर्यामी अमृतस्
इत्यधिभूतम्
 SF इति उ एव अधिभूतम्k OM. उ एव
अथाध्यात्मम् ॥१५ ॥
 SF अथ अध्यात्मम्

मन्त्र १६ [III.vii.16]

यः प्राणे तिष्ठन्प्राणादन्तरो
 SF यस् प्राणे तिष्ठन् प्राणाद् अन्तरस्
यं प्राणो न वेद
 SF यम् प्राणस् न वेद
यस्य प्राणः शरीरं
 SF यस्य प्राणस् शरीरम्
यः प्राणमन्तरो यमयत्य्
 SF यस् प्राणम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥१६ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १७ [III.vii.17]

यो वाचि तिष्ठन्वाचोऽन्तरो
 SF यस् वाचि तिष्ठन् वाचस् अन्तरस्
यं वाङ्ग वेद
 SF यम् वाक् न वेद
यस्य वाक् शरीरं
 SF यस्य वाक् शरीरम्
यो वाचमन्तरो यमयत्य्
 SF यस् वाचम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥१७ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १८ [III.vii.18]

यश्चक्षुषि तिष्ठꣳश्चक्षुषोऽन्तरो
 SF यस् चक्षुषि तिष्ठन् चक्षुषस् अन्तरस्
यं चक्षुर्न वेद
 SF यम् चक्षुस् न वेद
यस्य चक्षुः शरीरं
 SF यस्य चक्षुस् शरीरम्
यश्चक्षुरन्तरो यमयत्य्
 SF यस् चक्षुस् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥१८ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र १९ [III.vii.19]

यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो
 SF यस् श्रोत्रे तिष्ठन् श्रोत्राद् अन्तरस्
यꣳ श्रोत्रं न वेद
 SF यम् श्रोत्रम् न वेद
यस्य श्रोत्रꣳ शरीरं
 SF यस्य श्रोत्रम् शरीरम्
यः श्रोत्रमन्तरो यमयत्य्
 SF यस् श्रोत्रम् अन्तरस् यमयति
स एष त आत्माऽन्तर्याम्यमृतः ॥१९ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र २० [III.vii.20]

यो मनसि तिष्ठन्मनसोऽन्तरो
 SF यस् मनसि तिष्ठन् मनसस् अन्तरस्
यं मनो न वेद
 SF यम् मनस् न वेद
यस्य मनः शरीरम्
 SF यस्य मनस् शरीरं
यो मनोऽन्तरो यमयत्य्
 SF यस् मनस् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥ २० ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र २१ [III.vii.21]

यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो
 SF यस् त्वचि तिष्ठन् त्वचस् अन्तरस्
यं त्वङ्ग वेद
 SF यम् त्वक् न वेद
यस्य त्वक् शरीरम्
 SF यस्य त्वक् शरीरम्
यस्त्वचमन्तरो यमयत्य्
 SF यस् त्वचम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥ २१ ॥
 SF स एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र २२ [III.vii.22]

यो विज्ञाने तिष्ठन्विज्ञानादन्तरो
 SF यस् विज्ञाने तिष्ठन् विज्ञानाद् अन्तरस्
यꣳ विज्ञानं न वेद
 SF यम् विज्ञानम् न वेद
यस्य विज्ञानꣳ शरीरं
 SF यस्य विज्ञानम् शरीरम्
यो विज्ञानमन्तरो यमयत्य्
 SF यस् विज्ञानम् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतः ॥ २२ ॥
 SF एष ते आत्मा अन्तर्यामी अमृतस्

मन्त्र २३ [III.vii.23]

यो रेतसि तिष्ठन् रेतसोऽन्तरो
 SF यस् रेतसि तिष्ठन् रेतसस् अन्तरस्
यꣳ रेतो न वेद
 SF यम् रेतस् न वेद
यस्य रेतः शरीरम्
 SF यस्य रेतस् शरीरं
यो रेतोऽन्तरो यमयत्य्
 SF यस् रेतस् अन्तरस् यमयति
एष त आत्माऽन्तर्याम्यमृतो
 SF स k एष ते आत्मा अन्तर्यामी अमृतस्
ऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञतो विज्ञाता ।
 SF अदृष्टस् द्रष्टा अश्रुतस् श्रोता अमतस् मन्ता
 अविज्ञतस् विज्ञाता
नान्योऽतोऽस्ति द्रष्टा
 SF न अन्यस् अतस् अस्ति द्रष्टा
नान्योऽतोऽस्ति श्रोता
 SF न अन्यस् अतस् अस्ति श्रोता
नान्योऽतोऽस्ति मन्ता
 SF न अन्यस् अतस् अस्ति मन्ता
नान्योऽतोऽस्ति विज्ञातैष त आत्माऽन्तर्याम्यमृतो
 SF न अन्यस् अतस् अस्ति विज्ञाता एष ते आत्मा अन्तर्यामी
 अमृतस्
ऽतोऽन्यदार्तं
 SF अतस् अन्यद् आर्तम्
ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥ इति सप्तमं ब्राह्मणम् ॥
 SF ततस् ह ऊद्दालकस् आरुणिस् उपरराम

अष्टमं ब्राह्मणम् ।

मन्त्र १ [III.viii.1]

अथ ह वाचक्नव्युवाच
 SF अथ ह वाचक्नवी उवाच
ब्राह्मणा भगवन्तो
 SF ब्राह्मणास् भगवन्तस्
हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि
 SF हन्त अहम् इमम् याज्ञवल्क्यम्k OM. द्वौ प्रश्नौ
 प्रक्ष्यामि
तौ चेन्मे वक्ष्यति
 SF तौ चेद् मे विवक्ष्यति k om. वि
न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।
 SF न वैk OM. जातु युष्माकम् इमम् कश्चिद्
पृच्छ गार्गीति ॥ १ ॥
 SF पृच्छ गार्गि इति

मन्त्र २ [III.viii.2]

सा होवाचाहं वै त्वा याज्ञवल्क्य
 SF सा ह उवाच अहम् वै त्वा याज्ञवल्क्य
यथा काश्यो वा वैदेहो वोग्रपुत्र

SF यथा काश्यस् वा वैदेहस् वा ऊग्रपुत्रस्
उज्ज्यं धनुरधिज्यं कृत्वा
SF उज्ज्यम् धनुस् अधिज्यम् कृत्वा
द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेद्
SF द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वा उपोत्तिष्ठेद्
एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां ।
SF एवम् एव अहम् त्वा द्वाभ्याम् प्रश्नाभ्याम् उपोदस्थाम्
तौ मे ब्रूहीति ।
SF तौ मे ब्रूहि इति
पृच्छ गार्गीति ॥ २ ॥
SF पृच्छ गार्गि इति

मन्त्र ३ [III.viii.3]

सा होवाच
SF सा ह उवाच
यदूर्ध्वम्
SF यद् ऊर्ध्वम्
याज्ञवल्क्य
SF याज्ञवल्क्य
दिवो
SF दिवस्
यदवाक्पृथिव्या
SF यद् अवाक् पृथिव्यास्
यदन्तरा द्यावापृथिवी इमे
SF यद् अन्तरा द्यावापृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते
SF यद् भूतम् च भवत् च भविष्यत् च इति आचक्षते
कस्मिꣳस्तदोतं च प्रोतं चेति ॥ ३ ॥
SF कस्मिन् तद् ओतम् च प्रोतम् च इति

मन्त्र ४ [III.viii.4]

स होवाच
SF स ह उवाच
यदूर्ध्वम्
SF यद् ऊर्ध्वम्
गार्गि
SF गार्गि
दिवो
SF दिवस्
यदवाक्पृथिव्या
SF यद् अवाक् पृथिव्यास्
यदन्तरा द्यावापृथिवी इमे
SF यद् अन्तरा द्यावापृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत
SF यद् भूतम् च भवत् च भविष्यत् च इति आचक्षते
आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥
SF अकाशे तद् ओतम् च प्रोतम् च इति

मन्त्र ५ [III.viii.5]

सा होवाच
SF सा ह उवच
नमस्तेऽस्तु
SF नमस् तेk add. mark 1 अस्तु
याज्ञवल्क्य
SF याज्ञवल्क्य
यो म एतं व्यवोचो
SF यस् मे एतम् व्यवोचस्
ऽपरस्मै धारयस्वेति ।
SF अपरस्मै धारयस्व इति
पृच्छ गार्गीति ॥ ५ ॥
SF पृच्छ गार्गि इति

मन्त्र ६ [III.viii.6]

सा होवाच
SF सा ह उवाच
यदूर्ध्वम्
SF यद् ऊर्ध्वम्
याज्ञवल्क्य
SF याज्ञवल्क्य
दिवो
SF दिवस्
यदवाक् पृथिव्याः
SF यद् अवाक् पृथिव्यास्
यदन्तरा द्यावापृथिवी इमे
SF यद् अन्तरा द्यावापृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते
SF यद् भूतम् च भवत् च भविष्यत् च इति
आचक्षते
कस्मिꣳस्तदोतं च प्रोतं चेति ॥ ६ ॥
SF कस्मिन् तद् ओतम् च प्रोतम् च इति

मन्त्र ७ [III.viii.7]

स होवाच
SF स ह उवाच

यदूर्ध्वम्
 SF यद् ऊर्ध्वम्
गार्गि
 SF गार्गि
दिवो
 SF दिवस्
यदवाक्पृथिव्या
 SF यद् अवाक् पृथिव्यास्
यदन्तरा द्यावापृथिवी इमे
 SF यद् अन्तरा द्यावापृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत
 SF यद् भूतम् च भवत् च भविष्यत् च इति
 आचक्षते
आकाश एव तदोतं च प्रोतं चेति ।
 SF अकाशे एव तद् ओतम् च प्रोतम् च इति
कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥
 SF कस्मिन् नु खलु आकाशस् ओतस् च प्रोतस् च इति

मन्त्र ८ [III.viii.8]

स होवाचैतद्वै तदक्षरऽ
 SF स ह उवाच एतद् वै तद् अक्षरम्
गार्गि
 SF गार्गि
ब्राह्मणा अभिवदन्त्य्
 SF ब्राह्मणास् अभिवदन्ति
अस्थूलमनण्व्
 SF अस्थूलम् अनणु
अह्रस्वमदीर्घम्
 SF अह्रस्वम् अदीर्घम्
अलोहितमस्नेहम्
 SF अलोहितम् अस्नेहम्
अच्छायमतमो
 SF अच्छायम् अतमस्
ऽवाय्वनाकाशम्
 SF अवायु अनाकाशम्
असङ्गम्
 SF असङ्गम्
अचक्षुष्कम्
 SF अचक्षुष्कम्
अश्रोत्रम्
 SF अश्रोत्रम्
अवाग्
 SF अवाग्
अमनो
 SF अमनस्
ऽतेजस्कम्
 SF अतेजस्कम्
अप्राणम्
 SF अप्राणम्
अमुखम्
 SF अमुखम्
अमात्रम्
 SF अमात्रम्
अनन्तरम्
 SF अनन्तरम्
अबाह्यं
 SF अबाह्यम्
न तदश्नाति किं चन
 SF न तद् अश्नोतिk अश्नाति कम् चन k किम् चन
न तदश्नाति कश्चन ।
 SF न तद् अश्नोति k अश्नाति कस् चन

मन्त्र ९ [III.viii.9]

एतस्य वा अक्षरस्य प्रशासने
 SF एतस्य वै अक्षरस्य प्रशासने
गार्गि
 SF गार्गि
सूर्याचन्द्रमसौ विधृतौ तिष्ठत
 SF सूर्यचन्द्रमसौ विधृतौ तिष्ठतस्
एतस्य वा अक्षरस्य प्रशासने गार्गि
 SF एतस्य वै अक्षरस्य प्रशासने
द्यावापृथिव्यौ विधृते तिष्ठत
 SF द्यावापृथिवी विधृते तिष्ठतस्
एतस्य वा अक्षरस्य प्रशासने
 SF एतस्य वै अक्षरस्य प्रशासने
गार्गि
 SF गार्गि
निमेषा मुहूर्ता अहोरात्राण्यर्धमासा
मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्य्
 SF निमेषा मुहूर्ता अहोरात्राणि अर्धम्सा मासा ऋतवः
 संवत्सरा इति विधृतास् तिष्ठन्ति
एतस्य वा अक्षरस्य प्रशासने
 SF एतस्य वै अक्षरस्य प्रशासने
गार्गि
 SF गार्गि
प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः
 SF प्राच्यस् अन्यास् नद्यस् स्यन्दन्ते श्वेतेभ्यस्
 पर्वतेभ्यस्
प्रतीच्योऽन्या
 SF प्रतीच्यस् अन्यास्

यां यां च दिशमन्व्
 SF यांयाम् च दिशम्k add. mark 1  अनु
एतस्य वा अक्षरस्य प्रशासने
 SF एतस्य वै अक्षरस्य प्रशासने
गार्गि
 SF गार्गि
ददतो मनुष्याः प्रशꣳसन्ति
 SF ददतम् क ददतस् मनुष्यास् प्रशसन्ति
यजमानं देवा
 SF यजमानं देवास्
दर्वीं पितरोऽन्वायत्ताः ॥९ ॥
 SF दर्व्यम् k  दर्वीम् पितरस् अन्वायत्तास्

मन्त्र १० [III.viii.10]

यो वा एतदक्षरं
 SF यस् वै एतद् अक्षरम् अविदित्वा
गार्ग्यविदित्वा
 SF गार्गि k  गार्गि अविदित्वा
ऽस्मिꣳल्लोके जुहोति
 SF अस्मिन् लोके जुहोति
यजते
 SF ददातिk  यजते
तपस्तप्यते बहूनि वर्षसहस्राण्य्
अन्तवदेवास्य तद्भवति
 SF तपस्यति अपिk तपस् तप्यते बहूनि वर्षसहस्राणि
  अन्तवन् k अन्तवद् एवास्य स लोको k तद् प्रो स
लोको भवति
यो वा एतदक्षरम्
 SF यस् वै एतद् अक्षरम् अविदित्वा
गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति
 SF गार्गि k  गार्गि अविदित्वा अस्माद् लोकाद् प्रैति
स कृपणो
 SF स कृपणस्
ऽथ य एतदक्षरं
 SF अथ यस् एतद् अक्षरम्
गार्गि
 SF गार्गि
विदित्वाऽस्माल्लोकात्प्रैति
 SF विदित्वा अस्माद् लोकाद् प्रैति
स ब्राह्मणः ॥१० ॥
 SF स ब्राह्मणस्

मन्त्र ११ [III.viii.11]

तद्वा एतदक्षरं
 SF तद् वै एतद् अक्षरम्
गार्ग्य्
 SF गार्गि
अदृष्टं द्रष्टृश्रुतꣳ श्रोत्रमतं मन्त्रविज्ञातं
विज्ञातृ
 SF अदृष्टम् द्रष्टृ अश्रुतम् श्रोतृ अमतम्
  मन्तृ अविज्ञातम् विज्ञातृ
नान्यदतोऽस्ति द्रष्टृ
 SF न अन्यद्k add. mark 1  अतस् अस्ति द्रष्टृ
नान्यदतोऽस्ति श्रोतृ
 SF न अन्यद्k add. mark 1  अतस् अस्ति श्रोतृ
नान्यदतोऽस्ति मन्तृ
 SF न अन्यद्k add. mark 1  अतस् अस्ति मन्तृ
नान्यदतोऽस्ति विज्ञात्र्
 SF न अन्यद्k add. mark 1  अतस् अस्ति विज्ञातृ
एतस्मिन्नु खल्वक्षरे गार्ग्य्
 SF यस्मिन् k  विज्ञतृ एतस्मिन् नु खलु अक्षरे गार्गि
आकाश ओतश्च प्रोतश्चेति ॥११ ॥
 SF अकाशस् ओतस् च प्रोतस् च

मन्त्र १२ [III.viii.12]

सा होवाच
 SF सा ह उवाच
ब्राह्मणा भगवन्तस्
 SF ब्राह्मणास् भगवन्तः
तदेव बहु मन्येध्वम्
 SF तद् एव बहु मन्यध्वम्
यदस्मान्नमस्कारेण मुच्येध्वम्
 SF यद् अस्मान् नमस्कारेण मुच्याध्वं k  मुचेध्वम्
न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति
 SF न वै जातु युष्माकम् इमं कश्चिद् ब्रह्मोद्यं जेतेति ।
ततो ह वाचक्नव्युपरराम ॥१२ ॥ इत्यष्टमं ब्राह्मणम् ॥
 SF ततस् ह वाचक्नवी उपरराम

नवमं ब्राह्मणम्

मन्त्र १ [III.ix.1]

अथ हैनं विदग्धः शाकल्यः पप्रच्छ
 SF अथ ह एनं विदग्धस् हाकल्यस् पप्रच्छ
कति देवा
 SF कति देवास्
याज्ञवल्क्येति ।
 SF याज्ञवल्क्य इति
स हैतयैव निविदा प्रतिपेदे

SF स ह् एतया एव निविदा प्रतिपेदे
यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च
शता त्रयश्च त्री च सहस्रेत्य्
SF यावन्तस् वैश्वदेवस्य निविदि उच्यन्ते त्रयस् च
त्रि च शता त्रयस् च त्री च सहस्र इति
ओमिति होवाच
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येति ।
SF याज्ञवल्क्य इति
त्रयस्त्रिꣳशदित्य्
SF त्रयस्त्रिꣳशद् इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येति ।
SF याज्ञवल्क्य इति
षडित्य्
SF षट् इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येति ।
SF याज्ञवल्क्य इति
त्रय इत्य्
SF त्रयस् इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येत्य्
SF याज्ञवल्क्य इति
द्वावित्य्
SF द्वौ इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येत्य्
SF याज्ञवल्क्य इति
अध्यर्ध इत्य्
SF अध्यर्धस् इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कत्येव देवा
SF कति एव देवास्
याज्ञवल्क्येत्य्
SF याज्ञवल्क्य इति
एक इत्य्
SF एकस् इति
ओमिति होवाच ।
SF ओम् इति ह् उवाच
कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥१
॥
SF कतमे ते त्रयस् च त्री च शता त्रयस् च त्री च
सहस्र इति

मन्त्र २ [III.ix.2]

स होवाच
SF स ह् उवाच
महिमान एवैषामेते
SF महिमानस् एव एषाम् एते
त्रयस्त्रिꣳशत्त्वेव देवा इति
SF त्रयस्त्रिंशद् तु एव देवास् इति
कतमे ते त्रयस्त्रिꣳशदित्य्
SF कतमे ते त्रयस्त्रिꣳशद् इति
अष्टौ वसव
SF अष्टौ वसवस्
एकादश रुद्रा
SF एकादश रुद्रास्
द्वादशाऽऽदित्यास्
SF द्वादश अदित्याः
ते एकत्रिꣳशद्
SF ते एकत्रिंशद्
इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥२ ॥
SF ९न्द्रस् च एव प्रजापतिस् च त्रयस्त्रिंशौ इति

मन्त्र ३ [III.ix.3]

कतमे वसव इत्य्
SF कतमे वसवस् इति
अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च
द्यौश्च
चन्द्रमाश्च नक्षत्राणि चैते वसव
SF अग्निस् च पृथिवी च वायुस् च आन्तरिक्षम् च
अदित्यस् च द्यौस् च चन्द्रमास् च नक्षत्राणि च एते
वसवस्
एतेषु हीदं वसु सर्वꣳ हितमिति

SF एतेषु हि इदम् सर्वम् वसु k OM हितम्k add इति
तस्माद्वसव इति ॥३ ॥
SF तस्माद् वसवस् इति

मन्त्र ४ [III.ix.4]

कतमे रुद्रा इति ।
SF कतमे रुद्रास् इति
दशेमे पुरुषे प्राणा
SF दश इमे पुरुषे प्राणास्
आत्मैकादशस्
SF आत्मा एकादशः
ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्य्
SF ते यदा अस्माद् मर्त्याद् शरीराद् शरीराद् मर्त्याद् उत्क्रामन्ति
अथ रोदयन्ति
SF अथ रोदयन्ति
तद्यद्रोदयन्ति
SF तद् यद् रोदयन्ति
तस्माद्रुद्रा इति ॥४ ॥
SF तस्माद् रुद्रास् इति

मन्त्र ५ [III.ix.5]

कतम आदित्या इति ।
SF कतमे अदित्यास् इति
द्वादश वै मासाः संवत्सरस्यैत आदित्या
SF द्वादशk add. mark 1 वै मासास् संवत्सरस्य एते अदित्यास्
एते हीदꣳ सर्वमाददाना यन्ति
SF एते हि इदम् सर्वम् आददानास् यन्ति
ते यदिदꣳ सर्वमाददाना यन्ति
SF तद् ते यद् इदम् सर्वम् आददानास् यन्ति
तस्मादादित्या इति ॥५ ॥
SF तस्माद् अदित्यास् इति

मन्त्र ६ [III.ix.6]

कतम इन्द्रः
SF कतमस् ९न्द्रस्
कतमः प्रजापतिरिति ।
SF कतमस् प्रजापतिस् इति
स्तनयित्नुरेवेन्द्रो
SF स्तनयित्नुस् एव ९न्द्रस्
यज्ञः प्रजापतिरिति ।
SF यज्ञस् प्रजापतिस् इति
कतमः स्तनयित्नुरित्य्
SF कतमस् स्तनयित्नुस् इति
अशनिरिति ।
SF अशनिस् इति
कतमो यज्ञ इति ।
SF कतमस् यज्ञस् इति
पशव इति ॥६ ॥
SF पशवस् इति

मन्त्र ७ [III.ix.7]

कतमे षडित्य्
SF कतमे षड् इति
अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च
द्यौश्चैते षड्
SF अग्निस् च पृथिवी च वायुस् च आन्तरिक्षस् च अदित्यस् च द्यौस् च एते षट् इतिk OM. इति
एते हीदꣳ सर्वं षडिति ॥७ ॥
SF एते हि एव इदम् हि इदम् सर्वम् षट् इति

मन्त्र ८ [III.ix.8]

कतमे ते त्रयो देवा इति
SF कतमे ते त्रयस् देवास् इति
इम एव त्रयो लोका
SF इमे एव त्रयस् लोकास्
एषु हीमे सर्वे देवा इति ।
SF एषु हि इमे सर्वे देवास् इति
कतमौ तौ द्वौ देवावित्य्
SF कतमौk add. mark 1 तौ द्वौ देवौ इति
अन्नं चैव प्राणश्चेति ।
SF अन्नम् च एव प्राणस् च इति
कतमोऽध्यर्ध इति ।
SF कतमस् अध्यर्धस् इति
योऽयं पवत इति ॥८ ॥
SF यस् अयम् पवते इति

मन्त्र ९ [III.ix.9]

तदाहुर्
SF तद् आहुर्
यदयमेक एव एक इवैव पवते
SF यद् अयम् एकस्k add. mark 1 इव एव पवते
ऽअथ कथमध्यर्ध इति ।
SF अथ कथम् अध्यर्धस् इति
यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्

SF यद् अस्मिन् इदम् सर्वम् अध्यार्ध्नोत्
तेनाध्यर्ध इति ।
SF तेन अध्यर्धस् इति
कतम एको देव इति ।
SF कतमस् एकस् देवस् इति
प्राण इति स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥
SF प्राणस् इति स ब्रह्म त्यद् इति आचक्षते

मन्त्र १० [III.ix.10]

पृथिव्येव यस्याऽऽयतनम्
SF पृथिवी एव यस्य आयतनम्
अग्निर्लोको
SF चक्षुस् अग्निस् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायꣳ शारीरः पुरुषः
SF यस् एव अयम् शारीरस् पुरुषस्
स एष ।
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF ह्याकल्य
तस्य का देवतेत्य्
SF तस्य का देवता इति
अमृतम्
SF स्त्रियस् अमृतम्
इति होवाच ॥ १० ॥
SF इति ह उवाच

मन्त्र ११ [III.ix.11]

काम एव यस्याऽऽयतनꣳ
SF कामस् एव यस्य आयतनम्
हृदयं लोको
SF चक्षुस् हृदयम् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायं काममयः पुरुषः
SF यस् एव असौ चन्द्रे एव अयम् काममयस् पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF ह्याकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
स्त्रिय इति होवाच ॥ ११ ॥
SF मनस् स्त्रियस् इति ह उवाच

मन्त्र १२ [III.ix.12]

रूपाण्येव यस्याऽऽयतनम्
SF रूपाणि एव यस्य आयतनम्
चक्षुर्लोको
SF चक्षुस् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्

SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवासावादित्ये पुरुषः
SF यस् एव असौ आदित्ये पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
सत्यमिति होवाच ॥१२ ॥
SF चक्षुस् सत्यम् इति ह उवाच

मन्त्र १३ [III.ix.13]

आकाश एव यस्याऽऽयतनꣳ
SF अकशस् एव यस्य आयतनम्
श्रोत्रं लोको
SF चक्षुस् श्रोत्रम् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः
SF यस् एव अयम् वायौ श्रौतस् प्रातिश्रुतस् पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
दिश इति होवाच ॥१३ ॥
SF प्राणस् दिशस् इति होवच

मन्त्र १४ [III.ix.14]

तम एव यस्याऽऽयतनꣳ
SF तमस् एव यस्य आयतनम्
हृदयं लोको
SF चक्षुस् हृदयम् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायं छायामयः पुरुषः
SF यस् एव अयम् छायामयस् पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
मृत्युरिति होवाच ॥१४ ॥
SF मृत्युस् इति ह उवाच

मन्त्र १५ [III.ix.15]

रूपाण्येव यस्याऽऽयतनम्
SF रूपाणि एव यस्य आयतनम्
चक्षुर्लोको
SF चक्षुस् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,

SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायमादर्शे पुरुषः
SF यस् एव असौ आदित्ये पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेत्य्
SF तस्य का देवता इति
असुरिति होवाच ॥१५ ॥
SF चक्षुस् सत्यम् इति ह उवाच

मन्त्र १६ [III.ix.16]

आप एव यस्याऽऽयतनꣳ
SF अपस् एव यस्य आयतनम्
हृदयं लोको
SF चक्षुस् हृदयम् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायमप्सु पुरुषः
SF यस् एव अयम् अप्सु पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
वरुण इति होवाच ॥१६ ॥
SF वरुणस् इति ह उवाच

मन्त्र १७ [III.ix.17]

रेत एव यस्याऽऽयतनꣳ
SF रेतस् एव यस्य आयतनम्
हृदयं लोको
SF चक्षुस् हृदयम् लोकस्
मनो ज्योतिर्
SF मनस् ज्योतिस्
यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ,
SF यस् वै तम् पुरुषम् विद्यात् सर्वस्य आत्मनस्
परायणम्
स वै वेदिता स्याद्
SF स वै वेदिता स्यात्
याज्ञवल्क्य ।
SF याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम्
SF वेद वै अहम् तम् पुरुषम् सर्वस्य आत्मनस्
परायणम्
यमात्थ
SF यम् आत्थ
य एवायं पुत्रमयः पुरुषः
SF यस् एव अयम् पुत्रमयस् पुरुषस्
स एष
SF सस् एष
वदैव
SF वद एव
शाकल्य
SF हाकल्य
तस्य का देवतेति ।
SF तस्य का देवता इति
प्रजापतिरिति होवाच ॥१७ ॥
SF प्रजापतिस् इति ह उवाच

मन्त्र १८ [III.ix.18]

शाकल्येति होवाच याज्ञवल्क्यस्
SF हाकल्य इति ह् उवाच याज्ञवल्क्यः
त्वाॅं स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥१८ ॥
SF त्वाम् स्विद् इमे ब्राह्मणास् अङ्गारावक्षयणम् अक्रत इति

मन्त्र १९ [III.ix.19]

याज्ञवल्क्येति होवाच शाकल्यो
SF याज्ञवल्क्य इति ह् उवाच हाकल्यस्
यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः
SF यद् इदम् कुरुपञ्चालानाम् ब्राह्मनान् अत्यवादीस्
किं ब्रह्म विद्वानिति ।
SF किम् ब्रह्म विद्वान् इति
दिशो वेद सदेवाः सप्रतिष्ठा इति ।
SF दिशस् वेद सदेवास् सप्रतिष्ठास् इति
यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥१९ ॥
SF यद् दिशस् वेत्थ सदेवास् सप्रतिष्ठास्

मन्त्र २० [III.ix.20]

किंदेवतोऽस्यां प्राच्यां दिश्यसीत्य्
SF किंदेवतस् अस्याम् प्राच्याम् दिशि असि इति
आदित्यदेवत इति ।
SF आदित्यदेवतस् इति
स आदित्यः कस्मिन्प्रतिष्ठित इति ।
SF सस् आदित्यस् कस्मिन् प्रतिष्ठितस् इति
चक्षुषीति ।
SF चक्षुषि इति
कस्मिन्नु चक्षुः प्रतिष्ठितमिति।
SF कस्मिन् नु चक्षुस् प्रतिष्ठितम् भवतिk OM.
भवति इति
रूपेष्विति
SF रूपेषु इति
चक्षुषा हि रूपाणि पश्यति ।
SF चक्षुषा हि रूपाणि पश्यति
कस्मिन्नु रूपाणि प्रतिष्ठितानीति ।
SF कस्मिन् नु रूपाणि प्रतिष्ठितानि भवन्तिk OM. भवन्ति
इति
हृदय इति होवाच
SF हृदये इति ह उवाच
हृदयेन हि रूपाणि जानाति
SF हृदयेन हि रूपाणि जानाति
हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्य्
SF हृदये हि एव रूपाणि प्रतिष्ठितानि भवन्ति इति
एवमेवैतद्
SF एवम् एव एतद्
याज्ञवल्क्य ॥२० ॥
SF याज्ञवल्क्य

मन्त्र २१ [III.ix.21]

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति ।
SF किंदेवतस् अस्याम् दक्षिणायाम् दिशि असि इति
यमदेवत इति ।
SF यमदेवतस् इति
स यमः कस्मिन्प्रतिष्ठित इति ।
SF स यमस् कस्मिन् प्रतिष्ठितस् इति
यज्ञ इति ।
SF k add. mark 1 यज्ञे इति
कस्मिन्नु यज्ञः प्रतिष्ठित इति।
SF कस्मिन् नु यज्ञस् प्रतिष्ठितस् इति
दक्षिणायामिति ।
SF दक्षिणायाम् इति
कस्मिन्नु दक्षिणा प्रतिष्ठितेति
SF कस्मिन् नु दक्षिणा प्रतिष्ठिता भवतिk OM. भवति इति
श्रद्धायामिति
SF श्रद्धायाम् इति
यदा ह्येव श्रद्धत्ते
SF यदा हि एव श्रद्धत्ते
ऽथ दक्षिणां ददाति
SF अथ दक्षिणाम् ददाति
श्रद्धायाॅं ह्येव दक्षिणा प्रतिष्ठितेति
SF श्रद्धायाम् हि एव दक्षिणा प्रतिष्ठिता भवतिk OM.
भवति इति
कस्मिन्नु श्रद्धा प्रतिष्ठितेति
SF कस्मिन् नु श्रद्धा प्रतिष्ठिता भवतिk OM. भवति इति
हृदय इति होवाच
SF हृदये इति ह उवाच
हृदयेन हि श्रद्धां जानाति
SF हृदयेन हि श्रद्धत्ते श्रद्धाम् जानाति
हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्य्
SF हृदये हि एव श्रद्धा प्रतिष्ठिता भवति इति
एवमेवैतद्
SF एवम् एव एतद्
याज्ञवल्क्य ॥२१ ॥
SF याज्ञवल्क्य

मन्त्र २२ [III.ix.22]

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति ।
SF किंदेवतस् अस्याम् प्रतीच्याम् दिशि असि इति
वरुणदेवत इति ।

SF वरुणदेवतस् इति
स वरुणः कस्मिन् प्रतिष्ठित इत्य्
SF स वरुणस् कस्मिन् प्रतिष्ठितस् इति
अप्स्विति ।
SF अप्सु इति
कस्मिन्नवापः प्रतिष्ठितेति
SF कस्मिन् नु आपस् प्रतिष्ठितास् भवन्तिk OM. भवन्ति इति
रेतसीति ।
SF रेतसि इति
कस्मिन्नु रेतः प्रतिष्ठितेति
SF कस्मिन् नु रेतस् प्रतिष्ठितम् भवतिk OM. भवन्ति इति
हृदय
SF हृदये
इति
SF इतिk add. mark 1 ह उवाच
तस्मादपि प्रतिरूपं जातमाहुर्
SF तस्माद् अपि प्रतिरूपम् जातम् आहुर्
हृदयादिव सृप्तो
SF हृदयाद् इव सृप्तस्
हृदयादिव निर्मित इति
SF हृदयाद् इव निर्मितस् इति
हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्य्
SF हृदये हि एव रेतस् प्रतिष्ठितम् भवति इति
एवमेवैतद्
SF एवम् एव एतद्
याज्ञवल्क्य ॥ २२ ॥
SF याज्ञवल्क्य

मन्त्र २३ [III.ix.23]

किंदेवतोऽस्यामुदीच्यां दिश्यसीति ।
SF किंदेवतस् अस्याम् उदीच्याम् दिशि असि इति
सोमदेवत इति ।
SF सोमदेवतस् इति
स सोमः कस्मिन्प्रतिष्ठित इति ।
SF स सोमस् कस्मिन् प्रतिष्ठितस् इति
दीक्षायामिति ।
SF दीक्षायाम् इति
कस्मिन्नु दीक्षा प्रतिष्ठितेति
SF कस्मिन् नु दिक्षा प्रतिष्ठिता भवतिk OM. भवति इति
सत्य इति
SF सत्ये इति
तस्मादपि दीक्षितमाहुः
SF तस्माद् अपि दीक्षितम् आहुर्
सत्यं वदेति
SF सत्यम् वद इति
सत्ये ह्येव दीक्षा प्रतिष्ठितेति
SF सत्ये हि एव दीक्षा प्रतिष्ठिता भवतिk OM. भवति इति
कस्मिन्नु सत्यं प्रतिष्ठितमिति
SF कस्मिन् नु सत्यम् प्रतिष्ठितम् भवतिk OM. भवति इति
हृदय इति होवाच
SF हृदये इतिk add. mark 1 ह उवाच
हृदयेन हि सत्यं जानाति
SF हृदयेन हि सत्यम् जानाति
हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्य्
SF हृदये हि एव सत्यम् प्रतिष्ठितम् भवति इति
एवमेवैतद्
SF एवम् एव एतद्
याज्ञवल्क्य ॥ २३ ॥
SF याज्ञवल्क्य

मन्त्र २४ [III.ix.24]

किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्य्
SF किंदेवतस् अस्याम् ध्रुवायाम् दिशि असि इति
अग्निदेवत इति ।
SF अग्निदेवतस् इति
सोऽग्निः कस्मिन्प्रतिष्ठित इति
SF सस् अग्निस् कस्मिन् प्रतिष्ठितस् भवतिk OM. भवति इति
वाचीति ।
SF वाचि इति
कस्मिन्नु वाक्प्रतिष्ठितेति
SF कस्मिन् नु वाक् प्रतिष्ठिता भवतिk OM. भवति इति
हृदय इति ।
SF मनसि इति हृदये इति ॥ २४ ॥
कस्मिन्नु हृदयं प्रतिष्ठितमिति
SF कस्मिन् नु मनस् हृदयम् प्रतिष्ठितम् भवति k om. भवति इति

मन्त्र २५ [III.ix.25]

अहल्लिकेति होवाच याज्ञवल्क्यो
SF अहल्लिक इति ह उवाच याज्ञवल्क्यस्
यत्रैतदन्यत्रास्मन्मन्यासै ।
SF यत्र एतद् अन्यत्र अस्मद् मन्यासै
यद्ध्येतदन्यत्रास्मत्स्याच्
SF यत्र एतद् यद् धि एतद् अन्यत्र अस्मद् स्यात्
छ्वानो वैनदद्युर्

SF श्वानस् वा एनद् अद्युः
वयाꣳसि वैनद्विमथ्नीरन्निति ॥२५ ॥
SF वयाꣳसि वा एनद् विमथ्नीरन् इति

मन्त्र २६ [III.ix.26]

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति ।
SF कस्मिन् नु त्वम् च आत्मा च प्रतिष्ठितौ स्थस् इति
प्राण इति ।
SF प्राणे इति
कस्मिन्नु प्राणः प्रतिष्ठित इत्य्
SF कस्मिन् नु प्राणस् प्रतिष्ठितस् इति
अपान इति ।
SF अपाने इति
कस्मिन्नवपानः प्रतिष्ठित इति ।
SF कस्मिन् नु अपानस् प्रतिष्ठितस् इति
व्यान इति ।
SF व्याने इति
कस्मिन्नु व्यानः प्रतिष्ठित इत्य्
SF कस्मिन् नु व्यानस् प्रतिष्ठितस् इति
उदान इति ।
SF उदाने इति
कस्मिन्नूदानः प्रतिष्ठित इति ।
SF कस्मिन् नु उदानस् प्रतिष्ठितस् इति
समान इति ।
SF समाने इति
स एष
SF सस् एष
नेति
SF न इति
नेत्यात्माऽगृह्यो
SF न इति आत्मा अगृह्यस्
न हि गृह्यते
SF न हि गृह्यते
ऽशीर्यो
SF अशीर्यस्
न हि शीर्यते
SF न हि शीर्यते
ऽसङ्गो न हि सज्यते
SF असङ्गस् असितस् न सज्यते
ऽसितो न व्यथते
SF असितस् न व्यथते
न रिष्यत्य्
SF न रिष्यति
एतान्यष्टावायतनान्य्
SF एतानि अष्टौ आयतनानि
अष्टौ लोका
SF अष्टौ लोकास्
अष्टौ देवा
SF k add. अष्टौ देवास्
अष्टौ पुरुषाः ।
SF अष्टौ पुरुषास्
स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्
SF स यस् तान् पुरुषान् व्युदुह्य निरुह्य प्रत्युह्य अत्यक्रामीत्
तं त्वौपनिषदं पुरुषं पृच्छामि ।
SF तम् त्वा औपनिषदम् पुरुषम् पृच्छामि
तं चेन्मे न विवक्ष्यसि
SF तम् चेद् मे न विवक्ष्यसि
मूर्धा ते विपतिष्यतीति ।
SF मूर्धा ते विपतिष्यति इति
तꣳ ह न मेने शाकल्यस्
SF तम् ह हाकल्यस् न मेने तम् ह न मेने हाकल्यस्
तस्य ह मूर्धा विपपात
SF तस्य ह मूर्धा विपपात
अपि हास्य परिमोषिणोऽस्थीन्यपजह्रुर्
SF तस्य ह अपि अन्यद् मन्यमानास् परिमोषिणस् अस्थीनि
अपजह्रुर् k अपि ह अस्य परिमोषिणस् अस्थीनि
अन्यन्मन्यमानाः ॥२६ ॥
SF अपजह्रुर् अन्यद् मन्यमानास्

मन्त्र २७ [III.ix.27]

अथ होवाच
SF अथ याज्ञवल्क्यस् ह उवाच ह उवाच याज्ञवल्क्यस्
ब्राह्मणा भगवन्तो
SF ब्राह्मणास् भगवन्तस्
यो वः कामयते
SF यस् वस् कामयते
स मा पृच्छतु
SF स मा पृच्छतु
सर्वे वा मा पृच्छत
SF सर्वे वा मा पृच्छत
यो वः कामयते
SF यस् वस् कामयते
तं वः पृच्छामि
SF तम् वस् पृच्छामि
सर्वान्वा वः पृच्छामीति ।
SF सर्वान् वा वस् पृच्छामि इति
ते ह ब्राह्मणा न दधृषुः ॥२७ ॥
SF ते ह ब्राह्मणास् न दधृषुर्

मन्त्र २८ [III.ix.28]

तान्हैतैः श्लोकैः पप्रच्छ
 SF तान् ह एतैस् श्लोकैस् पप्रच्छ
यथा वृक्षो वनस्पतिस्
 SF यथा वृक्षस् वनस्पतिः
तथैव पुरुषोऽमृषा
 SF तथा एव पुरुषस् अमृषा
तस्य लोमानि पर्णानि
 SF तस्य पर्णानि लोमानि लोमानि पर्णानि
त्वगस्योत्पाटिका बहिः ॥१ ॥
 SF त्वक् अस्य उत्पाटिका बहिः
त्वच एवास्य रुधिरं
 SF त्वचस् एव अस्य रुधिरम्
प्रस्यन्दि त्वच उत्पटः
 SF प्रस्यन्दि त्वचस् उत्पटः
तस्मात्तदतृण्णात्प्रैति
 SF तस्माद् तद् अतुन्नाद् अतृण्णाद् प्रैति
रसो वृक्षादिवाऽऽहतात् ॥२ ॥
 SF रसस् वृक्षाद् इव आहताद्
माꣳसान्यस्य शकराणि
 SF माꣳसानि अस्य शकराणि
किनाटꣳ स्नाव
 SF किनाटम् स्नाव
तत्स्थिरम्।
 SF तद् स्थिरम्
अस्थीन्यन्तरतो दारूणि
 SF अस्थीनि अन्तरतस् दारुणि
मज्जा मज्जोपमा कृता ॥३ ॥
 SF मज्जा मज्जोपमा कृता
यद्वृक्षो वृक्णो रोहति
 SF यद् वृक्षस् वृक्णस् रोहति
मूलान्नवतरः पुनः
 SF मूलाद् नवतरस् पुनः
मर्त्यः स्विन्मृत्युना वृक्णः
 SF मर्त्यस् स्विद् मृत्युना वृक्णस्
कस्मान्मूलात्प्ररोहति ॥४ ॥
 SF कस्माद् मूलाद् प्ररोहति
रेतस इति मा वोचत
 SF रेतसस् इति मा वोचत
जीवतस्तत्प्रजायते
 SF जीवतस् तद् प्रजायते
धानारुह इव वै वृक्षो
 SF धानारुहk add. mark 1 इव वै वृक्षस्
ऽञ्जसा प्रेत्य सम्भवः ॥५ ॥
 SF अन्यतस्k अञ्जसा प्रेत्य सम्भवस्
यत्समूलमावृहेयुर्
 SF यद् समूलम् उद्वृहेयुर् अवृहेयुर्
वृक्षम्
 SF वृक्षम्
न पुनराभवेत्।
 SF न पुनराभवेत्
मर्त्यः स्विन्मृत्युना वृक्णः
 SF मर्त्यस् स्विन् मृत्युना वृक्णस्
कस्मान्मूलात्प्ररोहति ॥६ ॥
 SF कस्माद् मूलाद् प्ररोहति
जात एव न जायते
 SF जातस् एव न जायते
को न्वेनं जनयेत्पुनः
 SF कस् नु एनम् जनयेत् पुनः
विज्ञानमानन्दं ब्रह्म
 SF विज्ञानम् आनन्दम् ब्रह्म
रातिर्दातुः
 SF रातेस्k रातिस् दातुर्
परायणम्
 SF परायणम्
तिष्ठमानस्य तद्विद इति ॥७ ॥ ॥२८ ॥ इति नवमं ब्राह्मणम् ॥
 SF तिष्ठमानस्य तद्विदस् इति

इति बृहदारण्यकोपनिषदि तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः ।

प्रथमं ब्राह्मणम्

मन्त्र १ [IV.i.1]

ॐ जनको ह वैदेह आसां चक्रे
 SF जनकस् ह वैदेहस् आसाम् चक्रे
ऽथ ह याज्ञवल्क्य आवव्राज ।
 SF अथ ह याज्ञवल्क्य आवव्राज
तꣳ होवाच
 SF स ह उवाच जनकस् वैदेहस् तम् ह उवाच
याज्ञवल्क्य
 SF याज्ञवल्क्य
किमर्थमचारीः
 SF किम् अर्थम् अचारीस्
पशूनिच्छन्नण्वन्तानित्य्
 SF पशून् इच्छन् अण्वन्तानि इति
उभयमेव
 SF उभयम् एव

सम्राड्
 SF सꣳराट्
इति होवाच ॥१ ॥
 SF इति ह उवाच

मन्त्र २ [IV.i.2]

यत्ते कश्चिदब्रवीत्
 SF k add. mark 1 यद् ते कश्चिद् अब्रवीत्
तच्छृणवामेत्य्
 SF तद् शृणवामेति
अब्रवीन् मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति ।
 SF अब्रवीत् मे जित्वा हैलिनस् हैलिनिर्वाक् वै ब्रह्म इति
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
 SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तच्छैलिरब्रवीद्
 SF तथा तद् हैलिनस् :ऐलिनिस् अब्रवीत्
वाग्वै ब्रह्मेत्य्
 SF वाक् वै ब्रह्म इति
अवदतो हि किꣳ स्यादित्य्
 SF अवदतस् हि किम् स्यात् इति
अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
 SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
 SF न मे अब्रवीत् इति
एकपाद्वा एतत्
 SF एकपाद् वै एतद्
सम्राड्
 SF सम्राट्
इति ।
 SF इति
स वै नो ब्रूहि
 SF स वै नस् ब्रूहि
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
वागेवाऽऽयतनम्
 SF वाक् एव आयतनम्
आकाशः प्रतिष्ठा
 SF अकाशस् प्रतिष्ठा
प्रज्ञेत्येनदुपासीत ।
 SF प्रज्ञा इति एनद् उपासीत
का प्रज्ञता
 SF का प्रज्ञता
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
वागेव
 SF वाक् एव
सम्राड्
 SF सम्राट्
इति होवाच
 SF इति ह उवाच
वाचा वै
 SF वाचा वै
सम्राड्
 SF सम्राट्
 बन्धुः प्रज्ञायत
 SF बन्धुस् प्रज्ञायते
ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः
सर्वाणि च भूतानि वाचैव
 SF ऋग्वेदस् यजुर्वेदस् सामवेदस् अथर्वाङ्गिरसस्
 इतिहासस् पुराणम् विद्या उपनिषदस् श्लोकास् सूत्राणि
 अनुव्याख्यानानि व्याख्यानानिk add. mark 1 इष्टम् हुतम्
 आशितम् पायितम् अयम् च लोकस् परस् च लोकस्
सर्वाणि
 च भूतानि वाचा एव
सम्राट्
 SF संराट्
 प्रज्ञायन्ते
 SF प्रज्ञायन्ते
वाग्वै
 SF वाक् वै
सम्राट्
 SF सम्राट्
 परमं ब्रह्म
 SF परमम् ब्रह्म
नैनं वाग्जहाति
 SF न एनम् वाक् जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति ।
 SF सर्वाणि एनम् भूतानि अभिक्षरन्ति
देवो भूत्वा देवानप्येति
 SF देवस् भूत्वा देवान् अप्येति
य एवं विद्वानेतदुपास्ते ।
 SF यस् एवम् विद्वान् एतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
 SF हस्त्यृषभम् सहस्रम् ददामि इति ह उवाच जनकस्
 वैदेहस्
स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत
 SF पिता मे अमन्यत

नाननुशिष्य ह्‌रेतेति ॥२ ॥
 SF न अननुशिष्य ह्‌रेत इति

मन्त्र ३ [IV.i.3]

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्य्
 SF k add. यद् एव ते कश्चिद् अब्रवीत् तद् शृणवाम इति
अब्रवीन्म ऊदङ्कः शौल्बायनः
 SF अब्रवीत् मे ऊदङ्कस् हौल्वायनस् हौल्बायनः
प्राणो वै ब्रह्मेति ।
 SF प्राणस् वै ब्रह्म इति
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
 SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तच्छौल्वायनोऽब्रवीत्
 SF तथा तद् हौल्वायनस् ःऔल्बायनस् अब्रवीत्
प्राणो वै ब्रह्मेत्य्
 SF प्राणस् वै ब्रह्म इति
अप्राणतो हि किꣳ स्यादित्य्
 SF अप्राणतस् हि किम् स्यात् इति
अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
 SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
 SF न मे अब्रवीत् इति
एकपाद्वा एतत्
 SF एकपाद् वै एतद्
सम्राड्
 SF सम्राट्
इति ।
 SF इति
स वै नो ब्रूहि
 SF स वै नस् ब्रूहि
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
प्राण एवाऽऽयतनम्
 SF sk प्राणस् एव आयतनम्
आकाशः प्रतिष्ठा
 SF अकाशस् प्रतिष्ठा
प्रियमित्येनदुपासीत ।
 SF प्रियम् इति एनद् उपासीत
का प्रियता
 SF का प्रियता
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
प्राण एव
 SF प्राणस् एव
सम्राड्
 SF सम्राट्
इति होवाच
 SF इति ह उवाच
प्राणस्य वै
 SF प्राणस्य वै
सम्राट्
 SF सम्राट्
कामायायाज्यं याजयत्य्
 SF कामाय आयाज्यम् याजयति
अप्रतिगृह्यस्य प्रतिगृह्णात्य्
 SF अप्रतिगृह्यस्य प्रतिगृह्णाति
अपि तत्र वधाशङ्कं भवति
 SF अपि तत्र वधाषङ्का वधाषङ्का भवति
यां दिशमेति प्राणस्यैव
 SF याम् दिशम् एति प्राणस्य एव
सम्राट्
 SF सम्राट्
कामाय
 SF कामाय
प्राणो वै
 SF प्राणस् वै
सम्राट्
 SF सम्राट्
परमं ब्रह्म ।
 SF परमम् ब्रह्म
नैनं प्राणो जहाति
 SF न एनम् प्राणस् जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति ।
 SF सर्वाणि एनम् भूतानि अभिक्षरन्ति
देवो भूत्वा देवानप्येति
 SF देवस् भूत्वा देवान् अप्येति
य एवं विद्वानेतदुपास्ते ।
 SF यस् एवम् विद्वान् एतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
 SF हस्त्यृषभम् सहस्रम् ददामि इति ह उवाच जनकस् वैदेहस्
स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत
 SF पिता मे अमन्यत
नाननुशिष्य ह्‌रेतेति ॥३ ॥
 SF न अननुशिष्य ह्‌रेत इति

मन्त्र ४ [IV.i.4]

यदेव ते कश्चिदब्रवीत्
 SF k add. mark 1 यद् एव ते कश्चिद् अब्रवीत्
तच्छृणवामेत्य्
 SF तद् शृणवाम इति
अब्रवीन्मे बर्कुर्वार्ष्णश्
 SF अब्रवीत् मे बर्कुस् वार्ष्णस्
चक्षुर्वै ब्रह्मेति ।
 SF चक्षुस् वै ब्रह्म इति
यथा मातृमान्पितृमानाचार्यवान् ब्रूयात्
 SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तद्वार्ष्णोऽब्रवीत्च्
 SF तथा तद् वार्ष्णस् अब्रवीत्
चक्षुर्वै ब्रह्मेत्य्
 SF चक्षुस् वै ब्रह्म इति
अपश्यतो हि किꣳ स्यादित्य्
 SF अपश्यतस् हि किम् स्यात् इति
अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
 SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
 SF न मे अब्रवीत् इति
एकपाद्वा एतत्
 SF एकपाद् वै एतद्
सम्राड्
 SF सम्राट्
इति ।
 SF इति
स वै नो ब्रूहि
 SF स वै नस् ब्रूहि
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
चक्षुरेवाऽऽयतनम्
 SF चक्षुस् एव आयतनम्
आकाशः प्रतिष्ठा
 SF अकाशस् प्रतिष्ठा
सत्यमित्येतदुपासीत ।
 SF सत्यम् इति एतद् उपासीत
का सत्यता
 SF का सत्यता
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
चक्षुरेव
 SF चक्षुस् एव
सम्राड्
 SF सम्राट्
इति होवाच
 SF इति ह उवाच
चक्षुषा वै
 SF चक्षुषा वै
सम्राट्
 SF सम्राट्
पश्यन्तमाहुर्
 SF पश्यन्तम् आहुर्
अद्राक्षीरिति ।
 SF अद्राक्षीस् इति
स आहाद्राक्षमिति
 SF सस् आह अद्राक्षम् इति
तत्सत्यं भवति
 SF तद् सत्यम् भवति
चक्षुर्वै
 SF चक्षुस् वै
सम्राट्
 SF सम्राट्
परमं ब्रह्म
 SF परमम् ब्रह्म
नैनं चक्षुर्जहाति
 SF न एनम् चक्षुस् जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति ।
 SF सर्वाणि एनम् भूतानि अभिक्षरन्ति
देवो भूत्वा देवानप्येति
 SF देवस् भूत्वा देवान् अप्येति
य एवं विद्वानेतदुपास्ते ।
 SF यस् एवम् विद्वान् एतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
 SF हस्त्यृषभम् सहस्रम् ददामि इति ह उवाच जनकस् वैदेहस्
स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत
 SF पिता मे अमन्यत
नाननुशिष्य हरेतेति ॥४ ॥
 SF न अननुशिष्य हरेत इति

मन्त्र ५ [IV.i.5]

यदेव ते कश्चिदब्रवीत्
 SF k add. mark 1 यद् एव ते कश्चिद् अब्रवीत्
तच्छृणवामेत्य्
 SF तद् शृणवाम इति
अब्रवीन्मे गर्दभीविपीतो भारद्वाजः
 SF अब्रवीत् मे गर्दभीविपीतस् भारद्वाजस्
श्रोत्रं वै ब्रह्मेति
 SF श्रोत्रम् वै ब्रह्म इति

यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
 SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तद्भारद्वाजोऽब्रवीच्
 SF तथा तद् भारद्वाजस् अब्रवीत्
छ्रोत्रं वै ब्रह्मेत्य्
 SF श्रोत्रम् वै ब्रह्म इति
अशृण्वतो हि किꣳ स्यादित्य्
 SF अशृण्वतस् हि किम् स्यात् इति
अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
 SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
 SF न मे अब्रवीत् इति
एकपाद्वा एतत्
 SF एकपाद् वै एतद्
सम्राड्
 SF सम्राट्
इति ।
 SF इति
स वै नो ब्रूहि
 SF स वै नस् ब्रूहि
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
श्रोत्रमेवाऽऽयतनम्
 SF श्रोत्रम् एव आयतनम्
आकाशः प्रतिष्ठाऽनन्तमित्येनदुपासीत ।
 SF अकाशस् प्रतिष्ठा अनन्तम् इति एनद् उपासीत
काऽनन्तता
 SF का अनन्तता
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
दिश एव
 SF दिशस् एव
सम्राड्
 SF सम्राट्
इति होवाच
 SF इति ह उवाच
तस्माद्वै
 SF तस्माद् वै
सम्राड्
 SF सम्राट्
अपि यां काञ्च दिशं गच्छति नैवास्या अन्तं गच्छत्य्
 sN k add. अपि याम् काञ्च दिशम् गच्छति न एव अस्यास् अन्तम् गच्छति
अनन्ता हि दिशो
 SF अनन्तास् हि दिशस्
दिशो वै
 SF श्रोत्रम् हि दिशस् k दिशस् वै
सम्राट्
 SF सम्राट्
श्रोत्रꣳश्रोत्रं वै
 SF श्रोत्रम्श्रोत्रम् वै
सम्राट्
 SF सम्राट्
परमं ब्रह्म ।
 SF परमम् ब्रह्म
नैनꣳ श्रोत्रं जहाति
 SF न एनम् श्रोत्रम् जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति ।
 SF सर्वाणि एनम् भूतानि अभिक्षरन्ति
देवो भूत्वा देवानप्येति
 SF देवस् भूत्वा देवान् अप्येति
य एवं विद्वानेतदुपास्ते ।
 SF यस् एवम् विद्वान् एतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति
 SF हस्त्य्षभम् सहस्रम् ददामि इति
होवाच जनको वैदेहः ।
 SF ह उवाच जनकस् वैदेहस्
स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत
 SF पिता मे अमन्यत
नाननुशिष्य हरेतेति ॥५ ॥
 SF न अननुशिष्य हरेत इति

मन्त्र ६ [IV.i.6]

यदेव ते कश्चिदब्रवीत्
 SF k add. mark 1 यद् एव ते कश्चिद् अब्रवीत्
तच्छृणवामेत्य्
 SF तद् शृणवाम इति
अब्रवीन्मे सत्यकामो जाबालो
 SF अब्रवीत् मे शत्यकामस् जाबालस्
मनो वै ब्रह्मेति
 SF मनस् वै ब्रह्म इति
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
 SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तज्जाबालो अब्रवीन्
 SF तथा तद् जाबालो अब्रवीत्
मनो वै ब्रह्मेत्य्
 SF मनस् वै ब्रह्म इति
अमनसो हि किꣳ स्यादित्य्
 SF अमनसस् हि किम् स्यात् इति

अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
SF न मे अब्रवीत् इति
एकपाद्वा एतत्
SF एकपाद् वै एतद्
सम्राड्
SF सम्राट्
इति ।
SF इति
स वै नो ब्रूहि
SF स वै नस् ब्रूहि
याज्ञवल्क्य ।
SF याज्ञावल्क्य
मन एवाऽऽयतनम्
SF मनस् एव आयतनम्
आकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत ।
SF अकाशस् प्रतिष्ठा आनन्दस् इति एनद् उपासीत
काऽऽनन्दता
SF का आनन्दता
याज्ञवल्क्य ।
SF याज्ञवल्क्य
मन एव
SF मनस् एव
सम्राड्
SF सम्राट्
इति होवाच
SF इति ह उवाच
मनसा वै
SF मनसा वै
सम्राट्
SF सम्राट्
स्त्रियमभिहार्यते
SF स्त्रियम् अभिहर्यति अभिहार्यते
तस्यां प्रतिरूपः पुत्रो जायते
SF तस्याम् प्रतिरूपस् पुत्रस् जायते
स आनन्दो ।
SF सस् आनन्दस्
मनो वै
SF मनस् वै
सम्राट्
SF सम्राट्
परमं ब्रह्म
SF परमम् ब्रह्म
नैनं मनो जहाति
SF न एनम् मनस् जहाति

सर्वाण्येनं भूतान्यभिक्षरन्ति ।
SF सर्वाणि एनम् भूतानि अभिक्षरन्ति
देवो भूत्वा देवानप्येति
SF देवस् भूत्वा देवानप्येति
य एवं विद्वानेतदुपास्ते ।
SF यस् एवम् विद्वानेतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
SF हस्त्यृषभम् सहस्रम् ददामि इति ह उवाच जनकस् वैदेहस्
स होवाच याज्ञवल्क्यः
SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत
SF पिता मे अमन्यत
नाननुशिष्य हरेतेति ॥ ६ ॥
SF न अननुशिष्य हरेत इति

मन्त्र ७ [IV.i.7]

यदेव ते कश्चिदब्रवीत्
SF k add. mark 1 यद् एव ते कश्चिद् अब्रवीत्
तच्छ्रृणवामेत्य्
SF तद् शृणवाम इति
अब्रवीन्मे विदग्धः शाकल्यो
SF अब्रवीत् मे विदग्धस् हाकल्यस्
हृदयं वै ब्रह्मेति
SF हृदयम् वै ब्रह्म इति
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
SF यथा मातृमान् पितृमान् आचार्यवान् ब्रूयात्
तथा तच्छाकल्योऽब्रवीद्
SF तथा तद् हाकल्यस् अब्रवीत्
धृदयं वै ब्रह्मेत्य्
SF हृदयम् वै ब्रह्म इति
अहृदयस्य हि किꣳ स्यादित्य्
SF अहृदयस्य हि किम् स्यात् इति
अब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां ।
SF अब्रवीत् तु ते तस्य आयतनम् प्रतिष्ठाम्
न मेऽब्रवीदित्य्
SF न मे अब्रवीत् इति
एकपाद्वा एतत्
SF एकपाद् वै एतद्
सम्राड्
SF सम्राट्
इति ।
SF इति
स वै नो ब्रूहि
SF स वै नस् ब्रूहि

याज्ञवल्क्य ।
 SF याज्ञवल्क्य
हृदयमेवाऽऽयतनम्
 SF हृदयम् एव आयतनम्
आकाशः प्रतिष्ठा
 SF अकाशस् प्रतिष्ठा
स्थितिरित्येनदुपासीत ।
 SF स्थितिस् इति एनद् उपासीत
का स्थितिता
 SF का स्थितिता
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
हृदयमेव
 SF हृदयम् एव
सम्राड्
 SF सम्राट्
इति होवाच
 SF इति ह उवाच
हृदयं वै
 SF हृदयम् वै
सम्राट्
 SF सम्राट्
सर्वेषां भूतानामायतनꣳ
 SF सर्वेषाम् भूतानाम् आयतनꣳ
हृदयं वै
 SF हृदयम् वै
सम्राट्,
 SF सम्राट्
सर्वेषां भूतानां प्रतिष्ठा
 SF सर्वेषाम् भूतानाम् प्रतिष्ठा
हृदये ह्येव
 SF हृदये हि एव
सम्राट्
 SF सम्राट्
सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति
 SF सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति
हृदयं वै
 SF हृदयम् वै
सम्राट्
 SF सम्राट्
परमं ब्रह्म
 SF परमम् ब्रह्म
नैनꣳ हृदयं जहाति
 SF न एनम् हृदयम् जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति ।
 SF सर्वाणि एनम् भूतानि अभिक्षरन्ति देवस् भूत्वा देवान्
 अप्येति
देवो भूत्वा देवानप्येति
 SF देवस् भूत्वा देवान् अप्येति
य एवं विद्वानेतदुपास्ते ।
 SF यस् एवम् विद्वाएतद् उपास्ते
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
 SF हस्त्यृषभम् सहस्रम् ददामि इति ह उवाच जनकस्
 वैदेहस्
स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥ इति प्रथमं
ब्राह्मणम् ॥
 SF पिता मे अमन्यत न अननुशिष्य हरेत इति

द्वितीयं ब्राह्मणम् ।

मन्त्र १ [IV.ii.1]

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच
 SF अथ ह जनकस् जनकस् ह वैदेहस् कूर्चाद्
 उपावसर्पन् उवाच
नमस्तेऽस्तु
 SF नमस् तेk add. mark 1 अस्तु
याज्ञवल्क्यानु मा शाधीति ।
 SF याज्ञवल्क्य अनु मा शाधि इति
स होवाच
 SF स ह उवाच
यथा वै
 SF यथा वै
सम्राण्
 SF सम्राट्
महान्तमध्वानमेष्यन्रथं वा नावं वा
समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽस्य्
 SF महान्तम् अध्वानम् एष्यन् रथम् वा नावम् वा
 समाददीत एवम् एव एताभिस् उपनिषद्भिस् समाहितात्मा
असि
एवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो
विमुच्यमानः क्व गमिष्यसीति ।
 SF एवम् वृन्दारकस् आढ्यस् सन् अधीतवेदस्
 उक्तोपनिषत्कस् इतस् विमुच्यमानस् क्व गमिष्यसि इति
नाहं तद्
 SF न अहम् तद्
भगवन्
 SF भगवन्
वेद यत्र गमिष्यामीत्य्

 SF वेद यत्र गमिष्यामि इति
अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ।
 SF अथ वै ते अहम् तद् वक्ष्यामि यत्र गमिष्यसि इति
ब्रवीतु भगवानिति ॥१ ॥
 SF ब्रवीतु भगवान् इति

मन्त्र २ [IV.ii.2]

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्
 SF इन्धस् ह वै नाम एष यस् अयम् दक्षिणे अक्षन्
 पुरुषः
तं वा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव
 SF तम् वै एतम् इन्धम् सन्तम् इन्द्रस् इति आचक्षते
 परोक्षेण एव
परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥२ ॥
 SF परोक्षप्रियास् इव हि देवास् प्रत्यक्षद्विषस्

मन्त्र ३ [IV.ii.3]

अथैतद्वामेऽक्षणि पुरुषरूपम्
 SF अथ एतद् वामे अक्षिणि अक्षन् पुरुषरूपम्
एषाऽस्य पत्नी विराट्
 SF एषा अस्य पत्नी विराट्
तयोरेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशो
 SF तयोस् एष सꣳस्तावस् यस् एषस् अन्तर्हृदये
 आकाशस्
ऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डो
 SF अथ एनयोस् एतद् अन्नम् यस् एषस् अन्तर्हृदये
 लोहितपिण्डस्
ऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये
जालकमिवाथैनयोरेषा सृतिः संचरणी यैषा
हृदयादूर्ध्वा नाड्युच्चरति ।
 SF अथ एनयोस् एतद् प्रावरणम् यद् एतद् अन्तर्हृदये
यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम
नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्य्
 SF तास् वै अस्य एतास् हितास् नाम नाड्यस् यथ केशस्
 सहस्रधा भिन्नस् यथा केशस् सहस्रधा भिन्नस्
एवम् अस्य
 एतास् हितास् नाम नाड्यस् अन्तर्हृदये प्रतिष्ठितास्
भवन्ति
एताभिर्वा एतदास्रवदास्रवति
 SF एताभिस् वै एतम् एतद् अस्रवत् आस्रवति
तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः
॥३ ॥
 SF तस्माद् एष प्रविविक्ताहारतरस् इव भवति अस्माद्
 शारीराद् आत्मनस्

मन्त्र ४ [IV.ii.4]

तस्य प्राची दिक्प्राञ्चः प्राणाः
 SF तस्य वै एतस्य पुरुषस्यk OM. वै ॥।प्राची दिक्
 प्राञ्चस् प्राणास्
दक्षिणा दिग्दक्षिणे प्राणाः
 SF दक्षिणा दिक् दक्षिणास् प्राणास्
प्रतीची दिक्प्रत्यञ्चः प्राणा
 SF प्रतीची दिक् प्रत्यञ्चस् प्राणास्
उदीची दिगुदञ्चः प्राणाः
 SF उदीची दिक् उदञ्चस् प्राणास्
ऊर्ध्वा दिगूर्ध्वाः प्राणाः
 SF ऊर्ध्वा दिक् ऊर्ध्वास् प्राणास्
अवाची दिगवाञ्चः प्राणाः
 SF अवाची दिक् अवाञ्चस् प्राणास्
सर्वा दिशः सर्वे प्राणाः ।
 SF सर्वास् दिशस् सर्वे प्राणास्
स एष नेति नेत्याऽत्मागृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यते
ऽसङ्गो न हि सज्यतेऽसितो न
व्यथते न रिष्यत्य्
 SF सस् एष न इति न इति आत्मा अगृह्यस् न हि गृह्यते
 अशीर्यस् न हि शीर्यते असङ्गस् असितस् न सज्यते न
व्यथते
 असङ्गस् न हि सज्यते असितस् न व्यथते न रिष्यति
अभयं वै
 SF अभयम् वै
जनक
 SF जनक
प्राप्तोऽसीति होवाच याज्ञवल्क्यः ।
 SF प्राप्तस् असि इति ह उवाच याज्ञवल्क्यस्
स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्
 SF स ह उवाच जनकस् वैदेहस् अभयम् त्वा आगच्छतात्
याज्ञवल्क्य
 SF याज्ञवल्क्य
यो नो
 SF यस् नस्
भगवन्न्
 SF भगवन्
अभयं वेदयसे
 SF अभयम् वेदयसे
नमस्तेऽस्त्व्
 SF नमस् ते अस्तु
इमे विदेहा अयमहमस्मि ॥४ ॥ इति द्वितीयं ब्राह्मणम् ॥
 SF इमे विदेहास् अयम् अहम् अस्मि इति

तृतीयं ब्राह्मणम् ।

मन्त्र १ [IV.iii.1]

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम
 SF जनकम् ह वैदेहम् याज्ञवल्क्यस् जगाम
स मेने न वदिष्य इति स मेने न वदिष्य इत्य्
 SF सम् एनेन वदिष्ये इति स मेने न वदिष्ये इति
अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे
समूदाते
 SF अथ ह यद् जनकस् च वैदेहस् याज्ञवल्क्यस् च
 अग्निहोत्रे समूदतुर् समूदाते
तस्मै ह याज्ञवल्क्यो वरं ददौ ।
 SF तस्मै ह याज्ञवल्क्यस् वरम् ददौ
स ह कामप्रश्नमेव वव्रे ।
 SF स ह कामप्रश्नम् एव वव्रे
तꣳ हास्मै ददौ ।
 SF तम् ह अस्मै ददौ
तꣳ ह सम्राडेव पूर्वं पप्रच्छ ॥१ ॥
 SF तम् ह सम्राट् एव पूर्वस् पप्रच्छ

मन्त्र २ [IV.iii.2]

याज्ञवल्क्य
 SF याज्ञवल्क्य
किंज्योतिरयं पुरुष इत्य्
 SF किंज्योतिस् अयम् पुरुषस् इति
आदित्यज्योतिः
 SF आदित्यज्योतिस्
सम्राड्
 SF सम्राट्
इति होवाचाऽऽदित्येनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते
विपल्येतीत्य्
 SF इति ह उवाच आदित्येन एव अयम् ज्योतिषा आस्ते पल्ययते
 कर्म कुरुते विपर्येति इति
एवमेवैतद्
 SF एवम् एव एतद्
याज्ञवल्क्य ॥ २ ॥
 SF याज्ञवल्क्य

मन्त्र ३ [IV.iii.3]

अस्तमित आदित्ये
 SF अस्तमिते आदित्ये
याज्ञवल्क्य
 SF याज्ञवल्क्य
किंज्योतिरेवायं पुरुष इति ।
 SF किंज्योतिस् एव अयम् पुरुषस् इति
चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं
ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्य्
 SF चन्द्रेण एव अयम् चन्द्रमास् एव अस्य ज्योतिस् भवति
 चन्द्रमसा एव अयम् ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते
 विपर्येति इति
एवमेवैतद्
 SF एवम् एव एतद्
याज्ञवल्क्य ॥ ३ ॥
 SF याज्ञवल्क्य

मन्त्र ४ [IV.iii.4]

अस्तमित आदित्ये
 SF अस्तमिते आदित्ये
याज्ञवल्क्य
 SF याज्ञवल्क्य
चन्द्रमस्यस्तमिते
 SF चन्द्रमसि अस्तमिते
किंज्योतिरेवायं पुरुष इत्य्
 SF किंज्योतिस् एव अयम् पुरुषस् इति
अग्निरेवास्य ज्योतिर्भवत्य्
 SF इति ह उवाच अग्निस् एव अस्य ज्योतिस् भवति
अग्निनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्य्
 SF अग्निन एव ज्योतिषा आस्ते पल्ययते कर्म कुरुते विपर्येति इति
एवमेवैतद्
 SF एवम् एव एतद्
याज्ञवल्क्य ॥ ४ ॥
 SF याज्ञवल्क्य

मन्त्र ५ [IV.iii.5]

अस्तमित आदित्ये
 SF अस्तमिते आदित्ये
याज्ञवल्क्य
 SF याज्ञवल्क्य
चन्द्रमस्यस्तमिते
 SF चन्द्रमसि अस्तमिते
शान्तेऽग्नौ
 SF शान्ते अग्नौ
किंज्योतिरेवायं पुरुष इति ।
 SF किंज्योतिस् एव अयम् पुरुषस् इति
वागेवास्य ज्योतिर्भवतीति
 SF इति ह उवाच वाक् एव अस्य ज्योतिस् भवति
वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ।

SF वाचा एव अयम् ज्योतिषा आस्ते पल्ययते कर्म कुरुते
विपर्येति
तस्माद्वै
SF तस्माद् वै
सम्राड्
SF सम्राट्
अपि यत्र स्वः पाणिर्न विनिर्ज्ञायते
SF अपि यत्र स्वस् पाणिस् न विनिर्ज्ञायते
ऽथ यत्र वागुच्चरत्य्
SF अथ यत्र वाक् उच्चरति
उपैव तत्र न्येतीत्य्
SF उप एव तत्र न्येति इति
एवमेवैतद्
SF एवम् एव एतद्
याज्ञवल्क्य ॥ ५ ॥
SF याज्ञवल्क्य

मन्त्र ६ [IV.iii.6]

अस्तमित आदित्ये
SF अस्तमिते आदित्ये
याज्ञवल्क्य
SF याज्ञवल्क्य
चन्द्रमस्यस्तमिते
SF चन्द्रमसि अस्तमिते
शान्तेऽग्नौ
SF शान्ते अग्नौ
शान्तायां वाचि
SF शान्तायाम् वाचि
किंज्योतिरेवायं पुरुष इत्य्
SF किंज्योतिस् एव अयम् पुरुषस् इति
आत्मैवास्य ज्योतिर्भवत्य्
SF इति ह उवाच आत्मा एव अस्य ज्योतिस् भवति
आत्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥
SF आत्मना एव अयम् ज्योतिषा आस्ते पल्ययते कर्म कुरुते
विपर्येति इति

मन्त्र ७ [IV.iii.7]

कतम आत्मेति ।
SF कतमस् आत्मा इति
योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः
विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः
SF यस् अयम् विज्ञानमयस् पुरुषस् प्राणेषु हृदि
अन्तर्ज्योतिस् विज्ञानमयस् प्राणेषु हृदि अन्तर्ज्योतिस्
पुरुषस् स समानः सन्नुभौ लोकावनुसंचरति ।
SF स समानस् सन् उभौ लोकौ संचरति अनुसंचरति
ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं लोकमतिक्रामति
मृत्यो रूपाणि ॥ ७ ॥
SF ध्यायति इव लेलायति इव सधीस्k स हि स्वप्नस्
भूत्वा इमम् लोकम् अतिक्रामतिk add मृत्योस् रूपाणि

मन्त्र ८ [IV.iii.8]

स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः
सꣳसृज्यते ।
SF स वै अयम् पुरुषस् जायमानस् शरीरम्
अभिसम्पद्यमानस् पाप्मभिस् सꣳसृज्यते
स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥
SF सस् उत्क्रामन् म्रियमाणस् पाप्मनस् विजहाति निजहाति
मृत्योस् रूपाणिk OM

मन्त्र ९ [IV.iii.9]

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत
SF तस्य वै एतस्य पुरुषस्य द्वे एव स्थाने भवतस्
इदं च परलोकस्थानं च
SF इदम् च परलोकस्थानम् च
सन्ध्यं तृतीयꣳ स्वप्नस्थानम्
SF सन्ध्यम् तृतीयम् स्वप्नस्थानम्
तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च
परलोकस्थानं च
SF तस्मिन् सन्ध्ये स्थाने तिष्ठन् उभे स्थाने पश्यति
इदम् च परलोकस्थानम् च
अथ यथाक्रमोऽयं परलोकस्थाने भवति
SF अथ यथाक्रमस् अयम् परलोकस्थाने भवति
तमाक्रममाक्रम्योभयान्पाप्मन आनन्दाꣳश्च पश्यति ।
SF तम् आक्रमम् आक्रम्य उभयान् पाप्मनस् आनन्दान् च
पश्यति
स यत्र प्रस्वपित्य्
SF स यत्र अयम्k OM. प्रस्वपिति
अस्य लोकस्य सर्वावतो मात्रामपादाय
SF अस्य लोकस्य सर्वावतस् मात्राम् अपादाय
स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्य्
SF स्वयम् विहत्य स्वयम् निर्माय स्वेन भासा स्वेन
ज्योतिषा प्रस्वपिति
अत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥ ९ ॥
SF अत्र अयम् पुरुषस् स्वयंज्योतिस् भवति

मन्त्र १० [IV.iii.10]

न तत्र रथा न रथयोगा न पन्थानो भवन्त्य्
SF न तत्र रथास् न रथयोगास् न पन्थानस् भवन्ति
अथ रथान्रथयोगान्पथः सृजते ।
SF अथ रथान् रथयोगान् पथस् सृजते
न तत्राऽऽनन्दा मुदः प्रमुदो भवन्त्य्
SF न तत्र आनन्दास् मुदस् प्रमुदस् भवन्ति
अथाऽऽनन्दान्मुदः प्रमुदः सृजते ।
SF अथ आनन्दान् मुदस् प्रमुदस् सृजते
न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्य्
SF न तत्र वेशान्तास् स्रवन्त्यस् पुष्करिण्यस् स्रवन्त्यस् भवन्ति
अथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते
SF अथ वेशान्तान् स्रवन्तीस् पुष्करिणीस् पुष्करिणीस् स्रवन्तीस् सृजते
स हि कर्ता ॥१० ॥
SF स हि कर्ता

मन्त्र ११ [IV.iii.11]

तदेते श्लोका भवन्ति
SF तद् अपि एते श्लोकास् तद् एते श्लोकास् भवन्ति
स्वप्नेन शारीरमभिप्रहत्या
SF स्वप्नेन शारीरम् अभिप्रहत्य
सुप्तः सुप्तानभिचाकशीति ।
SF असुप्तस् सुप्तान् अभिचाकशीति
शुक्रमादाय पुनरैति स्थान॑
SF शुक्रम् आदाय पुनरैति स्थानम्
हिरण्मयः पुरुष एकहं॑सः ॥११ ॥
SF हिरण्मयस् पौरुषस् पुरुषस् एकहं॑सस्

मन्त्र १२ [IV.iii.12]

प्राणेन रक्षन्नपरं कुलायम्
SF प्राणेन रक्षन् अपरम् अवरम् कुलायम्
बहिष्कुलायादमृतश्चरित्वा
SF बहिस् कुलायाद् अमृतस् चरित्वा
स ईयतेऽमृतो यत्रकाम॑
SF सस् ईयते अमृतस् यत्रकामम्
हिरण्मयः पुरुष एकहं॑सः ॥१२ ॥
SF हिरण्मयस् पौरुषस् पुरुषस् एकहं॑सस्

मन्त्र १३ [IV.iii.13]

स्वप्नान्त उच्चावचमीयमानो
SF स्वप्नान्ते उच्चावचम् ईयमानस्
रूपाणि देवः कुरुते बहूनि ।
SF रूपाणि देवस् कुरुते बहूनि
उतेव स्त्रीभिः सह मोदमानो
SF उत इव स्त्रीभिस् सह मोदमानस्
जक्षदुतेवापि भयानि पश्यन् ॥१३ ॥
SF जक्षत् उत इव अपि भयानि पश्यन्

मन्त्र १४ [IV.iii.14]

आराममस्य पश्यन्ति
SF अरामम् अस्य पश्यन्ति
न तं पश्यति कश्चनेति ।
SF न तम् कश्चन पश्यति इति पश्यति कस् चन इति
तं नाऽऽयतं बोधयेदित्याहुः ।
SF तम् न आयतम् बोधयेत् इति आहुर्
दुर्भिषज्य॑ हास्मै भवति
SF दुर्भिषज्यम् ह अस्मै भवति
यमेष न प्रतिपद्यते ॥१४ ॥
SF यम् एष न प्रतिपद्यते
अथो खल्वाहुर्
SF अथ उ खलु आहुर्
जागरितदेश एवास्यैष
SF जागरितदेशस् एव अस्य एस
यानि ह्येव जाग्रत् पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयं ज्योतिर्भवति ।
SF यानि हि एव जाग्रत् पश्यति तानि सुप्तस् इति अत्र अयम् पुरुषस् स्वयंज्योतिस् भवति इति
सोऽहं भगवते सहस्रं ददाम्य्
SF सस् अहम् भगवते सहस्रम् ददामि
अत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥१४ ॥
SF अतस् ऊर्ध्वम् विमोक्षाय एवk OM. ब्रूहि इति

मन्त्र १५ [IV.iii.15]

स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं
प्रतियोन्याद्रवति स्वप्नायैव
SF स वै एषस् एतस्मिन् स्वप्नान्तेk संप्रसादे रत्वा चरित्वा दृष्ट्वा एव पुण्यम् च पापम् च पुनर् प्रतिन्यायम् प्रतियोनि आद्रवति बुद्धान्ताय k स्वप्नाय एव
स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्य्
SF स यद् अत्र तत्र किञ्चिद् पश्यति अनन्वागतस् तेन

भवति
असङ्गो ह्ययं पुरुष इत्य्
 SF असङ्गस् हि अयम् पुरुषस् इति
एवमेवैतद्
 SF एवम् एव एतद्
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
सोऽहं भगवते सहस्रं ददाम्य्
 SF सस् अहम् भगवते सहस्रम् ददामि
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५ ॥
 SF अतस् ऊर्ध्वम् विमोक्षाय एव ब्रूहि इति

मन्त्र १६ [IV.iii.16]

स वा एष एतस्मिन्त्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव
 SF स वै एषस् एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वा
 एव पुण्यम् च पापम् च पुनर् प्रतिन्यायम् प्रतियोनि
आद्रवति
 बुद्धान्ताय एव
स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्य्
 SF स यद् तत्र किञ्चिद् पश्यति अनन्वागतस् तेन भवति
असङ्गो ह्ययं पुरुष इत्य्
 SF असङ्गस् हि अयम् पुरुषस् इति
एवमेवैतद्
 SF एवम् एव एतद्
याज्ञवल्क्य ।
 SF याज्ञवल्क्य
सोऽहं भगवते सहस्रं ददाम्य्
 SF सस् अहम् भगवते सहस्रम् ददामि
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६ ॥
 SF अतस् ऊर्ध्वम् विमोक्षाय एव ब्रूहि इति

मन्त्र १७ [IV.iii.17]

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥
१७ ॥
 SF स वै एषस् एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वा
 एव पुण्यम् च पापम् च पुनर् प्रतिन्यायम् प्रतियोनि
आद्रवति
 स्वप्नान्ताय एव

मन्त्र १८ [IV.iii.18]

तद्यथा महामत्स्य उभे कूलेऽनुसंचरति पूर्वं चापरं
चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च
बुद्धान्तं च ॥१८ ॥
 SF तद् यथा महामत्स्यस् उभे कूले अनुसंचरति पूर्वम्
 च अपरम् च एवम् एव अयम् पुरुषस् एतौ उभौ
अन्तौ
 अनुसंचरति स्वप्नान्तम् च बुद्धान्तम् च

मन्त्र १९ [IV.iii.19]

तद्यथास्मिन्नाऽकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः
सꣳहत्य पक्षौ संलयायैव ध्रियत
 SF तद् यथा अस्मिन् आकाशे श्येनस् वा सुपर्णस् वा
 विपरिपत्य रान्तस् सꣳहत्य पक्षौ संलयाय एव
ध्रियते
एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कं चन
कामं कामयते न कं चन स्वप्नं पश्यति ॥१९ ॥
 SF एवम् एव अयम् पुरुषस् एतस्मै अन्ताय धवति यत्र
 सुप्तस् न कम् चन कामम् कामयते न कम् चन
स्वप्नम्
 पश्यति

मन्त्र २० [IV.iii.20]

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा
भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य
हरितस्य लोहितस्य पूर्णा ।
 SF तास् वै अस्य एतास् हितास् नाम नाड्यस् यथा केशस्
 सहस्रधा भिन्नस् तावता अणिम्ना तिष्ठन्ति शुक्लस्य
नीलस्य
 पिङ्गलस्य हरितस्य लोहितस्य पूर्णास्
अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव
पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते
 SF अथ यत्र एनम् घ्नन्ति इव जिनन्ति इव हस्ती इव
 विच्छाययति गर्तम् इव पतति यद् एव जाग्रत् भयम्
 पश्यति तद् अत्र अविद्यया भयम् मन्यते
ऽथ यत्र देव इव राजेवाहमेवेदꣳ
सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकाः ॥२० ॥
 SF अथ यत्र राजा इव देवस् इव अहम्k देवस् इव राजा
 इव अहम् एव इदम् सर्वम् k सर्वस् अस्मि इति
 मन्यते सस् अस्य परमस् लोकस्

मन्त्र २१ [IV.iii.21]

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयꣳ रूपं ।
 SF तद् वै अस्य एतद् आत्मकामम् आप्तकामम् अकामम्

एतद् अतिच्छन्दस् अपहतपाप्म अभयम् रूपम्
तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किं चन वेद
नाऽऽन्तरमेवमेवायं पुरुषः प्राज्ञेनाऽऽत्मना
संपरिष्वक्तो न बाह्यं किं चन वेद नाऽऽन्तरं ।
SF तद् यथा प्रियया स्त्रिया संपरिष्वक्तस् न बाह्यम्
किम् चन वेद न अन्तरम् एवम् एव अयम् पुरुषस्
शारिरस् आत्माk OM. अम्बो प्राज्ञेन आत्मना
संपरिष्वक्तस् न
बाह्यम् किम् चन वेद न अन्तरम्
तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपम् शोकान्तरम् ॥ २१ ॥
SF तद् वै अस्य एतद् अतिच्छन्दस् अपहतपाप्म
अभयम्k एतद् आप्तकामम् आत्मकामम् अकामम् रूपम्
अशोकान्तरम्k शोकान्तरम्

मन्त्र २२ [IV.iii.22]

अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा
SF
अत्र पिता अपिता भवति माता अमाता लोकास् अलोकास् देवास्
अदेवास् वेदास् अवेदास् यज्ञस् अयज्ञस्k OM. अम्बो
अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा
चाण्डालोऽचण्डालः पौल्कसोऽपौल्कसो श्रमणोऽश्रमण
स्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन
SF अत्र स्तेनस् अस्तेनस् भवति भ्रूणहा अभ्रूणहा
पौल्कसस् अपौल्कसस् चाण्डालस् अचण्डालस् चाण्ड्यालस्
अचण्ड्यालस् पौल्कसस् अपौल्कसस् श्रमणस्
अश्रमणस्
तापसस् अतापसस् अनन्वागतस् पुण्येन अनन्वागतस्
पापेन
तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥
SF तीर्णस् हि तदा सर्वान् शोकान् हृदयस्य भवति

मन्त्र २३ [IV.iii.23]

यद्वै तन्न पश्यति
SF यद् वै तद् न पश्यति
पश्यन्वै तन्न पश्यति
SF पश्यन् वै तद् द्रष्टव्यम्k OM. न पश्यति
न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्
SF न हि द्रष्टुर्दृष्टेस् विपरिलोपस् विद्यते
अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यत्पश्येत् ॥ २३ ॥
SF ततस् अन्यद् विभक्तम् यद् पश्येत्

मन्त्र २४ [IV.iii.24]

यद्वै तन्न जिघ्रति
SF यद् वै तद् न जिघ्रति
जिघ्रन्वै तन्न जिघ्रति
SF जिघ्रन् वै तद् घ्रतव्यम्k OM. न जिघ्रति
न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्
SF न हि घ्रातुर्घ्रातेस् विपरिलोपस् विद्यते अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥
SF ततस् अन्यद् विभक्तम् यद् जिघ्रेत्

मन्त्र २५ [IV.iii.25]

यद्वै तन्न रसयते
SF यद् वै तद् न रसयति
रसयन्वै तन्न रसयते
SF विजानन् वै तद् रसम् रसयन् वै तद् न रसयति
न हि रसयितृ रसयितेर्विपरिलोपो विद्यतेऽविनाशित्वान्
SF न हि रसयितुर् रसाद् रसयितेस् विपरिलोपस् विद्यते
अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥
SF ततस् अन्यद् विभक्तम् यद् रसयेत्

मन्त्र २६ [IV.iii.26]

यद्वै तन्न वदति
SF यद् वै तद् न वदति
वदन्वै तन्न वदति
SF वदन् वै तद् वक्तव्यम्k OM. न वदति
न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्
SF न हि वक्तुर्वचस् वक्तेस् विपरिलोपस् विद्यते
अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥
SF ततस् अन्यद् विभक्तम् यद् वदेत्

मन्त्र २७ [IV.iii.27]

यद्वै तन्न शृणोति
SF यद् वै तद् न शृणोति
शृण्वन्वै तन्न शृणोति

 SF शृण्वन् वै तद् श्रोतव्यम्k OM. न शृणोति
न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्
 SF न हि श्रोतुर् श्रुतेस् विपरिलोपस् विद्यते अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
 SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥
 SF ततस् अन्यद् विभक्तम् यद् शृणुयात्

मन्त्र २८ [IV.iii.28]

यद्वै तन्न मनुते
 SF यद् वै तद् न मनुते
मन्वानो वै तन्न मनुते
 SF मन्वानस् वै तद् मन्तव्यम्k OM. न मनुते
न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्
 SF न हि मन्तुर्मतेस् विपरिलोपस् विद्यते अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
 SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥
 SF ततस् अन्यद् विभक्तम् यद् मन्वीत

मन्त्र २९ [IV.iii.29]

यद्वै तन्न स्पृशति
 SF यद् वै तद् न स्पृशति
स्पृशन्वै तन्न स्पृशति
 SF स्पृशन् वै तद् स्प्रष्टव्यम्k OM. न स्पृशति
न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्
 SF न हि स्प्रष्टुर् स्पृष्टेस् विपरिलोपस् विद्यते
 अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
 SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥
 SF ततस् अन्यद् विभक्तम् यद् स्पृशेत्

मन्त्र ३० [IV.iii.30]

यद्वै तन्न विजानाति
 SF यद् वै तद् न विजानाति
विजानन्वै तन्न विजानाति
 SF विजानन् वै तद् विज्ञेयम्k OM. न विजानाति
न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्
 SF न हि विज्ञातुर्विज्ञानाद् विज्ञातेस् विपरिलोपस् विद्यते
 अविनाशित्वाद्
न तु तद्द्वितीयमस्ति
 SF न तु तद् द्वितीयम् अस्ति
ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥
 SF ततस् अन्यद् विभक्तम् यद् विजानीयात्

मन्त्र ३१ [IV.iii.31]

यत्र वा अन्यदिव स्यात्
 SF यत्र वै अन्यद् इव स्यात्
तत्रान्योऽन्यत्पश्येद्
 SF तत्र अन्यस् अन्यद् पश्येत्
अन्योऽन्यज्जिघ्रेद्
 SF अन्यस् अन्यद् जिघ्रेत्
अन्योऽन्यद्रसयेद्
 SF अन्यस् अन्यद् रसयेत्
अन्योऽन्यद्वदेद्
 SF अन्यस् अन्यद् वदेत्
अन्योऽन्यच्छृणुयाद्
 SF अन्यस् अन्यद् शृणुयात्
अन्योऽन्यन्मन्वीता
 SF अन्यस् अन्यद् मन्वीत
न्योऽन्यत्स्पृशेद्
 SF अन्यस् अन्यद् स्पृशेत्
अन्योऽन्यद्विजानीयात् ॥ ३१ ॥
 SF अन्यस् अन्यद् विजानीयात्

मन्त्र ३२ [IV.iii.32]

सलिल एको द्रष्टाद्वैतो भवत्य्
 SF सलिले एकस् द्रष्टा अद्वैतस् भवति
एष ब्रह्मलोकः
 SF एष ब्रह्मलोकस्
सम्राड्
 SF सम्राट्
इति हैनमनुशशास याज्ञवल्क्य। एषास्य
परमा गतिर्
 SF इति ह एनम् उवाच अनुशशास याज्ञवल्क्यस् एषा अस्य
 परमा गतिस्
एषास्य परमा संपद्
 SF एषा अस्य परमा संपद्
एषोऽस्य परमो लोक
 SF एषस् अस्य परमस् लोकस्
एषोऽस्य परम आनन्द
 SF एषस् अस्य परमस् आनन्दस्
एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥
 SF एतस्य एव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति

मन्त्र ३३ [IV.iii.33]

स यो मनूष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः
सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः अन्येषाम्
SF स यस् मनूष्याणाम् राद्धस् समृद्धस् भवति
अधिपतिस् सर्वैस् मानुष्यकैस् भोगैस्
सम्पन्नतमस्
स मनुष्याणां परम आनन्दो
SF स मनुष्याणाम् परमस् आनन्दस्
ऽथ ये शतं मनुष्याणामानन्दाः
SF अथ ये शतम् मनुष्याणाम् आनन्दास्
स एकः पितृणां जितलोकानामानन्दो
SF सस् एकस् पितृणाम् जितलोकानाम् आनन्दस्
ऽथ ये शतं पितृणां जितलोकानामानन्दाः
SF अथ ये शतम् पितृणाम् जितलोकानाम् आनन्दास्
स एको गन्धर्वलोक आनन्दो
SF सस् एकस् गन्धर्वलोके आनन्दस्
ऽथ ये शतं गन्धर्वलोक आनन्दाः
SF अथ ये शतम् गन्धर्वलोके आनन्दास्
स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते
SF सस् एकस् कर्मदेवानाम् आनन्दस् ये कर्मणा देवत्वम्
अभिसम्पद्यन्ते
ऽथ ये शतं कर्मदेवानामानन्दाः
SF अथ ये शतम् कर्मदेवानाम् आनन्दास्
स एक आजानदेवानामानन्दो
SF सस् एकस् आजानदेवानाम् आनन्दस्
यश्च श्रोत्रियोऽवृजिनोऽकामहतो
SF यस् च श्रोत्रियस् अवृजिनस् अकामहतस्
ऽथ ये शतमाजानदेवानामानन्दाः
SF अथ ये शतम् आजानदेवानाम् आनन्दास्
स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतो
SF सस् एकस् प्रजापतिलोके आनन्दस् यस् च श्रोत्रियस्
अवृजिनस् अकामहतस्
अथ ये शतं प्रजापतिलोक आनन्दाः
SF अथ ये शतम् प्रजापतिलोके आनन्दास्
स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतो
SF सस् एकस् ब्रह्मलोके आनन्दस् यस् च श्रोत्रियस्
अवृजिनस् अकामहतस्
ऽथैष एव परम आनन्द एष ब्रह्मलोकः
SF अथ एषस् एव परमस् आनन्दस् एष ब्रह्मलोकस्
सम्राड्
SF सम्राट्
इति होवाच याज्ञवल्क्यः ।
SF इति ह् उवाच याज्ञवल्क्यस्
सोऽहं भगवते सहस्रं ददाम्य्
SF सस् अहम् भगवते सहस्रम् ददामि
अत ऊर्ध्वं विमोक्षायैव ब्रूहीत्य्
SF अतस् ऊर्ध्वम् विमोक्षाय एव ब्रूहि इति
अत्र ह् याज्ञवल्क्यो बिभयांचकारः
SF अत्र ह् याज्ञवल्क्यस् बिभयाम् चकार
मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥
SF मेधावी राजा सर्वेभ्यस् मा अन्तेभ्यस् उदरौत्सीत् इति

मन्त्र ३४ [IV.iii.34]

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥
३४ ॥
SF स वै एषस् एतस्मिन् स्वप्नान्ते रत्वा चरित्वा
दृष्ट्वा एव पुण्यम् च पापम् च पुनर् प्रतिन्यायम्
प्रतियोनि आद्रवति बुद्धान्ताय एव

मन्त्र ३५ [IV.iii.35]

तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवायꣳ शारीर आत्मा
प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी
भवति
॥ ३५ ॥
SF तद् यथा अनस् सुसमाहितम् उत्सर्जम् यायात् एवम्
एव अयम् शारीरस् आत्मा प्राज्ञेन आत्मना अन्वारूढस्
उत्सर्जम्
याति यत्र एतद् ऊर्ध्वोच्छ्वासी भवति

मन्त्र ३६ [IV.iii.36]

स यत्रायमणिमानं न्येति जरया वोपतपता वाऽणिमानं निगच्छति
SF स यत्र अयम् अणिमानम् न्येति जरया वा उपतपता वा
अणिमानम् निगच्छति
तद्यथाऽऽम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत
SF तद् यथा आम्रम् वा उदुम्बरम् वा पिप्पलम् वा
बन्धनाद् प्रमुच्यते
एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं
प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥
SF एवम् एव अयम् पुरुषस् एभ्यस् अङ्गेभ्यस्
संप्रमुच्य पुनर् प्रतिन्यायम् प्रतियोनि आद्रवति
प्राणाय एव

मन्त्र ३७ [IV.iii.37]

तद्यथा राजानमायन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः
पानैरवसथैः प्रतिकल्पन्ते
SF तद् यथा राजानम् आयन्तम् उग्रास् प्रत्येनसस्
सूतग्रामण्यस् अन्नैस् पानैस् अवसथैस् प्रतिकल्पन्ते

अयमायात्ययमागच्छतीत्य्
 SF अयम् आयाति अयम् आगच्छति इति
एवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्त
 SF एवम् ह एवंविदम् सर्वाणि भूतानि प्रतिकल्पन्ते
इदं ब्रह्माऽऽयातीदमागच्छतीति ॥ ३७ ॥
 SF इदम् ब्रह्म आयाति इदम् आगच्छति इति

मन्त्र ३८ [IV.iii.38]

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः
सूतग्रामण्योऽभिसमायन्त्य्
 SF तद् यथा राजानम् प्रयियासन्तम् उग्रास् प्रत्येनसस्
 सूतग्रामण्यस् उपसमायन्ति अभिसमायन्ति
एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति
 SF एवम् ह एवंविदम्k एवम् एव इमम् आत्मानम्
 अन्तकाले सर्वे प्राणास् उपसमायन्तिk अभिसमायन्ति
यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥ इति तृतीयं
ब्राह्मणम् ॥
 SF यत्र एतद् ऊर्ध्वोच्छ्वासी भवति

चतुर्थं ब्राह्मणम् ।

मन्त्र १ [IV.iv.1]

स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव न्येत्य्
 SF स यत्र अयम् शारिरम् k OM आत्मा अबल्यम् नीत्य k
 न्येत्य संमोहम् इव न्येति
अथैनमेते प्राणा अभिसमायन्ति
 SF अथ एनम् एते प्राणास् अभिसमायन्ति
स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति
 SF सस् एतास् तेजोमात्रास् समभ्याददानस् हृदयम् एव
 अन्ववक्रामति
स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्तते
 SF स यत्र एष चाक्षुषस् पुरुषस् पराङ् पर्यावर्तते
ऽथारूपज्ञो भवति ॥ १ ॥
 SF अथ अरूपज्ञस् भवति

मन्त्र २ [IV.iv.2]

एकीभवति न पश्यतीत्याहुर्
 SF एकीभवति न पश्यति इति आहुः
एकीभवति न जिघ्रतीत्याहुर्
 SF एकीभवति न जिघ्रति इति आहुः
एकीभवति न रसयतीत्याहुर्
 SF एकीभवति न रसयति इति आहुः
एकीभवति न वदतीत्याहुर्
 SF एकीभवति न वदति इति आहुः
एकीभवति न शृणोतीत्याहुर्
 SF एकीभवति न शृणोति इति आहुः
एकीभवति न मनुत इत्याहुर्
 SF एकीभवति न मनुते इति आहुः
एकीभवति न स्पृशतीत्याहुर्
 SF एकीभवति न स्पृशति इति आहुः
एकीभवति न विजानातीत्याहुस्
 SF एकीभवति न विजानाति इति आहुर्
तस्य हैतस्य हृदयस्याग्रं प्रद्योतते
 SF तस्य ह एतस्य हृदयस्य अग्रम् प्रद्योतते
तेन प्रद्योतेनैष आत्मा निष्क्रामति
 SF तेन प्रद्योतेन एषस् आत्मा निष्क्रामति
चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्
 SF चक्षुष्टस् वा मूर्ध्नस् वा अन्येभ्यस् वा
 शरीरदेशेभ्यः
तमुत्क्रामन्तं प्राणोऽनूत्क्रामति
 SF तम् उत्क्रामन्तम् प्राणस् अनूत्क्रामति
प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति ।
 SF प्राणम् अनूत्क्रामन्तम् सर्वे प्राणास् अनूत्क्रामन्ति
सविज्ञानो भवति
 SF सविज्ञनस् भवति
सविज्ञानमेवान्ववक्रामति ।
 SF सविज्ञानम् एव अन्ववक्रामति
तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥
 SF तम् विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च

मन्त्र ३ [IV.iv.3]

तद्यथा तृणजलायुका तृणस्यान्तं
गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरत्य्
 SF तद् यथा तृणजलायुका तृणस्य अन्तम् गत्वाk add.
 mark 1 अन्यम् आक्रमम् आक्रम्य आत्मानम् आत्मनम्
 उपसꣳहरति
एवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां
गमयित्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसꣳहरति ॥ ३ ॥
 SF एवम् एव अयम् पुरुषस्k आत्मा इदम् शरीरम्
 निहत्य अविद्याम् गमयित्वा आत्मनम् k गमयित्वा अन्यम्
 आक्रमम् आक्रम्य आत्मानम् उपसꣳहरति

मन्त्र ४ [IV.iv.4]

तद्यथा पेशस्कारी पेशसो मात्राम् अपादायान्यन्नवतरं
कल्याणतरꣳ रूपं तनुत
 SF तद् यथा पेशस्कारी पेशसस् मात्राम् अपादाय उपादाय

अन्यद् नवतरम् कल्याणतरम् रूपम् तनुते
एवमेवायम् आत्मेदꣳ शरीरं निहत्याविद्यां
गमयित्वाऽन्यन्नवतरं कल्याणतरꣳ रूपं कुरुते
पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं
वाऽन्येषां वा भूतानाम् ॥ ४ ॥
SF एवम् एव अयम् पुरुषk आत्मा इदम् शरीरम्
निहत्य अविद्याम् गमयित्वा अन्यद् नवतरम् कल्याणतरम्
रूपम् तनुते k कुरुते पित्र्यम् वा गान्धर्वम् वा
ब्राह्मम् वा
प्राजापत्यम् वा दैवम् वा अन्येभ्यस् वा भूतेभ्यस्k
गान्धर्वम् वा दैवम् वा प्राजापत्यम् वा ब्राह्मम्
वान्येषाम्
वा भूतानाम्

मन्त्र ५ [IV.iv.5]

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः
प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो
वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः
क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्
SF स वै अयम् आत्मा ब्रह्म विज्ञानमयस् मनोमयस्
वाङ्मयस् k OM प्राणमयस् चक्षुर्मयस्
श्रोत्रमयस्
आकाशमयस् वायुमयस् तेजोमयस् आपोमयस्
पृथिवीमयस्
क्रोधमयस् अक्रोधमयस् हर्षमयस् अहर्षमयस्
k
श्रोत्रमयस् पृथिवीमयस् आपोमयस् वायुमयस्
आकाशमयस्
तेजोमयस् अतेजोमयस् काममयस् अकाममयस्
क्रोधमयस्
अक्रोधमयस् धर्ममयस् अधर्ममयस् सर्वमयः
तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति ।
SF तद् यदा इदंमयस् तद् यद् एतद् इदंमयस्
अदोमयस् इति यथाकारी यथाचारी तथा भवति
साधुकारी साधुर्भवति
SF साधुकारी साधुस् भवति
पापकारी पापो भवति
SF पापकारी पापस् भवति
पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।
SF पुण्यस् पुण्येन कर्मणा भवति पापस् पापेन
अथो खल्वाहुः
SF अथ उ खलु आहुर्
काममय एवायं पुरुष इति
SF काममयस् एव अयम् पुरुषस् इति
स यथाकामो भवति
SF स यथाकामस् भवति
तत्क्रतुर्भवति
SF तथाक्रतुस् तत्क्रतुस् भवति
यत्क्रतुर्भवति
SF यथाक्रतुस् यत्क्रतुस् भवति
तत्कर्म कुरुते
SF तद् कर्म कुरुते
यत्कर्म कुरुते
SF यद् कर्म कुरुते
तदभिसंपद्यते ॥ ५ ॥
SF तद् अभिसंपद्यते

मन्त्र ६ [IV.iv.6]

तदेष श्लोको भवति ।
SF तद् एष श्लोकस् भवति
तदेव सक्तः सह कर्मणैति
SF तद् एव सत् तद् सक्तस् सह कर्मणा एति
लिङ्गं मनो यत्र निषक्तमस्य ।
SF लिङ्गम् मनस् यत्र निषक्तम् अस्य
प्राप्यान्तं कर्मणस्तस्य
SF प्राप्य अन्तम् कर्मणस् तस्य
यत्किञ्चेह करोत्ययम् ।
SF यद् किञ्च इह करोति अयम्
तस्माल्लोकात्पुनरैत्य्
SF तस्माद् लोकाद् पुनरैति
अस्मै लोकाय कर्मण्
SF अस्मै लोकाय कर्मणे
इति नु कामयमानो
SF इति नु कामयमानस्
ऽथाकामयमानो योऽकामो निष्काम भवति आप्तकाम
आत्मकामो न तस्य प्राणा उत्क्रामन्ति
SF अथ अकामयमानस् यस् अकामस् निष्कामस् आत्मकामस्
आप्तकामस् भवतिk अप्तकामस् आत्मकामस् न तस्माद्
k
तस्य प्राणास् उत्क्रामन्ति
ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥
SF अत्र एव समवनीयन्तेk OM. अत्र ॥। ब्रह्म एव सन्
ब्रह्म अप्येति

मन्त्र ७ [IV.iv.7]

तदेष श्लोको भवति
SF तद् एष श्लोकस् भवति
यदा सर्वे प्रमुच्यन्ते
SF यदा सर्वे प्रमुच्यन्ते

कामा येऽस्य हृदि श्रिताः ।
 SF कामास् ये अस्य हृदि श्रितास्
अथ मर्त्योऽमृतो भवत्य्
 SF अथ मर्त्यस् अमृतस् भवति
अत्र ब्रह्म समश्नुत इति ॥
 SF अत्र ब्रह्म समश्नुते इति
तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेते
 SF तद् यथा अहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत
  एवम् एव इदम् शरीरम् शेते
ऽथायमशरीरोऽमृतः प्राणो
ब्रह्मैव तेज एव
 SF अथ अयम् अनस्थिकस् अशरीरस् प्राज्ञस् आत्माk
  अयम् अशरीरस् अमृतस् प्राणस् ब्रह्म एव लोकस्
k
  तेजस् एव
सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥
 SF सस् अहम् भगवते सहस्रानि ददामि इति ह उवाच
  जनकस् वैदेहस्

मन्त्र ८ [IV.iv.8]

तदेते श्लोका भवन्ति ।
 SF तद् अपि एते श्लोकास् तद् एते श्लोकास् भवन्ति
अणुः पन्था विततः पुराणो
 SF अणुस् पन्था वितरस् विततस् पुराणस्
माꣳ स्पृष्टोऽनुवित्तो मयैव ।
 SF माम् स्पृष्टस् अनुवित्तस् मया एव
तेन धीरा अपियन्ति ब्रह्मविदः
 SF तेन धीरास् अपियन्ति ब्रह्मविदस्
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥
 SF उत्क्रम्य स्वर्गम् लोकम् इतस् विमुक्तास् स्वर्गम्
  लोकम् इतस् ऊर्ध्वम् विमुक्तास्

मन्त्र ९ [IV.iv.9]

तस्मिञ्छुक्लमुत नीलमाहुः
 SF तस्मिन् शुक्लम् उत नीलम् आहुर्
पिङ्गलꣳ हरितं लोहितं च ।
 SF पिङ्गलम् हरितम् लोहितम् च
एष पन्था ब्रह्मणा हानुवित्तस्
 SF एष पन्था ब्रह्मणा ह अनुवित्तः
तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥
 SF तेन एति ब्रह्मविद् तैजसस् पुण्यकृत् च
  पुण्यकृत् तैजसस् च

मन्त्र १० [IV.iv.10]

अन्धं तमः प्रविशन्ति
 SF अन्धम् तमस् प्रविशन्ति
येऽविद्यामुपासते ।
 SF ये असम्भूतिम् अविद्याम् उपासते
ततो भूय इव ते तमो
 SF ततस् भूयस् इव ते तमस्
य उ विद्यायाꣳ रताः ॥ १० ॥
 SF ये उ सम्भूत्याम् विद्यायाम् रतास्

मन्त्र ११ [IV.iv.11]

अनन्दा नाम ते लोका
 SF असुर्यास् अनन्दास् नाम ते लोकास्
अन्धेन तमसाऽऽवृताः
 SF अन्धेन तमसा आवृतास् तान्
ताꣳस्ते प्रेत्याभिगच्छन्त्य्
 SF ते प्रेत्य अपिगच्छतिk अभिगच्छन्ति
अविद्वाꣳसोऽबुधो जनाः ॥ ११ ॥
 SF अविद्वाꣳसस् अबुधास् जनास्

मन्त्र १२ [IV.iv.12]

आत्मानं चेद्विजानीयाद्
 SF आत्मानम् चेद् विजानीयात्
अयमस्मीति पूरुषः
 SF अयम् अस्मि इति पुरुषस्
किमिच्छन्कस्य कामाय
 SF किम् इच्छन् कस्य कामाय
शरीरमनुसंज्वरेत् ॥ १२ ॥
 SF शरीरम् अनु संचरेत् संज्वरेत्

मन्त्र १३ [IV.iv.13]

यस्यानुवित्तः प्रतिबुद्ध आत्मा
 SF यस्य अनुवित्तस् प्रतिबुद्धस् आत्मा
ऽस्मिन्संदेह्ये गहने प्रविष्टः ।
 SF अस्मिन् संदेह्ये गहने प्रविष्टस्
स विश्वकृत्
 SF स विश्वकृत्
स हि सर्वस्य कर्ता
 SF स हि सर्वस्य कर्ता
तस्य लोकः
 SF तस्य लोकस्
स उ लोक एव ॥ १३ ॥

SF सस् उ लोकस् एव

मन्त्र १४ [IV.iv.14]

इहैव सन्तोऽथ विद्मस्तद्वयं
SF तद् एव सन्तस् तद् उ भवामस् इह एव सन्तस् अथ विद्मस् तद् वयम्
न चेदवेदिर्महती विनष्टिः ।
SF न चेद् अवेदी अवेदिस् महती विनष्टिस्
ये तद्विदुरमृतास्ते भवन्त्य्
SF ये तद् विदुरमृतास् ते भवन्ति
अथेतरे दुःखमेवापियन्ति ॥ १४ ॥
SF अथ इतरे दुःखम् एव उपयन्ति अपियन्ति

मन्त्र १५ [IV.iv.15]

यदैतमनुपश्यत्य्
SF यदा एतम् अनुपश्यति
आत्मानं देवमञ्जसा ।
SF अत्मानम् देवम् अञ्जसा
ईशानं भूतभव्यस्य
SF ईशानम् भूतभव्यस्य
न ततो विजुगुप्सते ॥ १५ ॥
SF न तदा विचिकित्सति ततस् विजुगुप्सते

मन्त्र १६ [IV.iv.16]

यस्मादर्वाक्संवत्सरो
SF यस्माद् अर्वाक् संवत्सरस्
ऽहोभिः परिवर्तते ।
SF अहोभिस् परिवर्तते
तद्देवा ज्योतिषां ज्योतिर्
SF तद् देवास् ज्योतिषाम् ज्योतिस्
आयुर्होपासतेऽमृतम् ॥ १६ ॥
SF अयुस् हि ह उपासते अमृतम्

मन्त्र १७ [IV.iv.17]

यस्मिन्पञ्च पञ्चजना
SF यस्मिन् पञ्च पञ्चजनास्
आकाशश्च प्रतिष्ठितः ।
SF अकाशस् च प्रतिष्ठितः
तमेव मन्य आत्मानं
SF तम् एव मन्ये आत्मानम्
विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥
SF विद्वान् ब्रह्म अमृतस् अमृतम्

मन्त्र १८ [IV.iv.18]

प्राणस्य प्राणमुत चक्षुषश्चक्षुर्
SF प्राणस्य प्राणम् उत चक्षुषस् चक्षुस्
उत श्रोत्रस्य श्रोत्रं
SF उत श्रोत्रस्य श्रोत्रम् अन्नस्य अन्नम्
मनसो ये मनो विदुः ।
SF मनसस् ये मनस् विदुर्
ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥
SF ते निचिक्युर् ब्रह्म पुराणम् अग्र्यम्

मन्त्र १९ [IV.iv.19]

मनसैवानुद्रष्टव्यं
SF मनसा एव आप्तव्यम् अनुद्रष्टव्यम्
नेह नानाऽस्ति किं चन ।
SF न इह नाना अस्ति किम् चन
मृत्योः स मृत्युमाप्नोति
SF मृत्योस् स मृत्युम् आप्नोति
य इह नानेव पश्यति ॥ १९ ॥
SF यस् इह नाना इव पश्यति

मन्त्र २० [IV.iv.20]

एकधैवानुद्रष्टव्यम्
SF मनसा एव अनुद्रष्टव्यम् एकधा एव अनुद्रष्टव्यम्
एतदप्रमयं ध्रुवम् ।
SF एतद् अप्रमयम् ध्रुवम्
विरजः पर आकाशाद्
SF विरजस् परस् आकाशाद्
अज आत्मा महान्ध्रुवः ॥ २० ॥
SF अजस् आत्मा महान् ध्रुवः

मन्त्र २१ [IV.iv.21]

तमेव धीरो विज्ञाय
SF तम् एव धीरस् विज्ञाय
प्रज्ञां कुर्वीत ब्राह्मणः ।
SF प्रज्ञाम् कुर्वीत ब्राह्मणस्
नानुध्यायाद्बहूञ्छब्दान्
SF न अनुध्यायात् बहून् शब्दान्
वाचो विग्लापनꣳ हि तद्
SF वाचस् विग्लापनम् हि तद्
इति ॥ २१ ॥

SF इति

मन्त्र २२ [IV.iv.22]

स वा एष महानज आत्मा योऽयं
विज्ञानमयः प्राणेषु
SF स वै अयम् आत्मा k स वै एष महान् अजस् आत्मा
यस् अयम् विज्ञानमयस् प्राणेषु
य एषोऽन्तर्हृदय आकाशस्
SF यस् एषस् अन्तर्हृदय आकाशः
तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः
स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष
सर्वेश्वर
SF स न साधुना कर्मणा भूयान् न उ एव असाधुना कनीयान्k
add. mark 1 एष सर्वेश्वरस्
एष भूताधिपतिरेष भूतपाल एष
SF एष भूताधिपतिस्k add. mark 1 एष भूतपालस्
एष लोकेश्वरस् एश लोकपालस्k OM. अम्बो
सेतुर्विधरण एषां लोकानामसंभेदाय ।
SF स सेतुस् विधरणस् एषाम् लोकानाम् असंभेदाय
तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
SF तम् एतम् वेदानुवचनेनk add. mark 1 ब्राह्मणास्
विविदिषन्ति
यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवत्य्
SF ब्रह्मचर्येन तपसा श्रद्धया यज्ञेन अनाशकेन च
ब्रह्मचर्येन यज्ञेन दानेन तपसाऽनाशकेन एतम् एव
विदित्वा
मुनिस् भवति
एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्त्य्
SF एतम् एव प्रव्राजिनस् लोकम् ईप्सन्तस् इच्छन्तस्
प्रव्रजन्ति
एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते
SF एतद् ध स्म वै तद् पूर्वे ब्रह्मणास् अनुचानास्k
अम्बो विद्वांसस् प्रजाम् न कामयन्ते
किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ।
SF किम् प्रजया करिष्यामस् येषाम् नस् अयम् आत्मा
अयम् लोकस् इति
ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च
व्युत्थायाथ भिक्षाचर्यं चरन्ति
SF ते ह स्म पुत्रैषणायास् च वित्तैषणायास् च
लोकैषणायास् च व्युत्थाय अथ भिक्षाचर्यम् चरन्ति
या ह्येव पुत्रैषणा सा वित्तैषणा
SF या हि एव पुत्रैषणा सा वित्तैषणा
या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः ।
SF या वित्तैषणा सा लोकैषणा उभे हि एते एषणे एव
भवतस्

स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते
SF सस् एष न इति न इति आत्मा अगृह्यस् न हि गृह्यते
ऽशीर्यो न हि शीर्यते
SF अशीर्यस् न हि शीर्यते
ऽसङ्गो न हि सज्यते
SF असङ्गस् असितस् न सज्यते न व्यथते k असङ्गस्
न हि सज्यते
ऽसितो न व्यथते न रिष्यत्य्
SF असितस् न व्यथते न रिष्यति
एतमु हैवैते न तरत इत्य्
SF
अतः पापमकरवमित्यतः कल्याणमकरवमित्युभे
उ हैवैष एते तरति
SF अतस् mark 2 पापम् अकरवम् इति अतस् कल्याणम्
अकरवम् इति उभेस्उभे हि एषस् उभे उ ह एव एषस्
एते तरति
नैनं कृताकृते तपतः ॥ २२ ॥
SF अमृतस् साध्वसाधुनीk OM. अमृतस् ॥। न एनम्
कृताकृते तपतस्

मन्त्र २३ [IV.iv.23]

तदेतदृचाभ्युक्तम् ।
SF तद् एतद् ऋचा अभ्युक्तम्
एष नित्यो महिमा ब्राह्मणस्य
SF एष नित्यस् महिमा ब्राह्मणस्य
न वर्धते कर्मणा नो कनीयान् ।
SF न कर्मणा वर्धते न उ कनीयान्
तस्यैव स्यात् पदवित्तं विदित्वा
SF तस्य एव स्यात्पदवित्तम् विदित्वा
न लिप्यते कर्मणा पापकेनेति ।
SF न कर्मणा लिप्यते लिप्यते कर्मणा पापकेन इति
तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो
भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति
SF तस्माद् एवंविद् शान्तस् दान्तस् उपरतस् तितिक्षुस्
श्रद्धावित्तस्k समाहितस् भूत्वा आत्मनि एव आत्मानम्
पश्येत् k पश्यति
सर्वमात्मानं पश्यति
SF सर्वम् आत्मानम् पश्यति
नैनं पाप्मा तरति
SF न एनम् पाप्मा तरति
सर्वं पाप्मानं तरति
SF सर्वम् पाप्मानम् तरति
नैनं पाप्मा तपति
SF न एनम् पाप्मा तपति
सर्वं पाप्मानं तपति

SF सर्वम् पाप्मानम् तपति
विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति
SF विपापस् विरजस् अविचिकित्सस् ब्राह्मणस् भवति
एष ब्रह्मलोकः
SF एष ब्रह्मलोकस्
सम्राड्
SF सम्राट्
इति होवाच याज्ञवल्क्यः ।
SF एनम् प्राप्तस् असि इति ह उवाच याज्ञवल्क्यस्
सोऽहं भगवते विदेहान्ददामि माम् चापि सह दास्यायेति ॥ २३ ॥
SF सस् अहम् भगवते विदेहान् ददामि माम् च अपि सह दास्याय इति

मन्त्र २४ [IV.iv.24]

स वा एष महानज आत्माऽन्नादो वसुदानो
SF स वै एष महान् अजस् आत्मा अन्नादस् वसुदानस्
विन्दते वसु
SF विन्दते वसु
य एवं वेद ॥ २४ ॥
SF यस् एवम् वेद

मन्त्र २५ [IV.iv.25]

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो
ब्रह्माभयं वै
SF स वै एष महान् अजस् आत्मा अजरस् अमरस् अभयस् अमृतस् अमृतस् अभयस् ब्रह्म अभयम् वै
ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥ इति
चतुर्थं ब्राह्मणम् ।
SF क् ब्रह्म अभयम् वै ब्रह्म अभयम् हि वै ब्रह्म भवति यस् एवम् वेद

पञ्चमं ब्राह्मणम्

मन्त्र १ [IV.v.1]

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च
SF अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च
तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव
SF तयोस् ह मैत्रेयी ब्रह्मवादिनी बभूव
स्त्रीप्रज्ञैव तर्हि कात्यायन्य्
SF स्त्रीप्रज्ञा एव तर्हि कात्यायनी
अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥
SF सस् अन्यद् वृत्तम् उपाकरिष्यमाणस् अथ ह याज्ञवल्क्यस् अन्यद् वृत्तम् उपाकरिष्यन्

मन्त्र २ [IV.v.2]

मैत्रेयीति होवाच याज्ञवल्क्यः
SF मैत्रेयि इति ह उवाच मैत्रेयि इति ह उवाच याज्ञवल्क्यस्
प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि ।
SF प्रव्रजिष्यन् वै अरे अहम् अस्माद् स्थानाद् अस्मि
हन्त तेऽनया कत्यायान्याऽन्तं करवाणीति ॥ २ ॥
SF हन्त ते अनया कत्यायन्या अन्तम् करवाणि इति

मन्त्र ३ [IV.v.3]

सा होवाच मैत्रेयी
SF सा ह उवाच मैत्रेयी
यन्नु म इयं
SF यद् नु मे इयम्
भगोः
SF भगोस्
सर्वा पृथिवी वित्तेन पूर्णा स्यात्
SF सर्वा पृथिवी वित्तेन पूर्णा स्यात्
स्यां न्वहं तेनामृताऽऽहो३ नेति
SF स्याम् नु अहम् तेन अमृता आहो न इति
नेति होवाच याज्ञवल्क्यो
SF न इति ह उवाच याज्ञवल्क्यस्
यथैवोपकरणवतां जीवितं
SF यथा एव उपकरणवताम् जीवितम्
तथैव ते जीवितꣳ स्याद्
SF तथा एव ते जीवितम् स्यात्
अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ ३ ॥
SF अमृतत्वस्य तु न आशा अस्ति वित्तेन इति

मन्त्र ४ [IV.v.4]

सा होवाच मैत्रेयी
SF सा ह उवाच मैत्रेयी
येनाहं नामृता स्यां
SF येन अहम् न अमृता स्याम्
किमहं तेन कुर्यां ।
SF किम् अहम् तेन कुर्याम्
यदेव भगवान्वेद
SF यद् एव भगवान् वेद
तदेव मे ब्रूहीति ॥ ४ ॥
SF तद् एव मे ब्रूहि इति

मन्त्र ५ [IV.v.5]

स होवाच याज्ञवल्क्यः
 SF स ह उवाच याज्ञवल्क्यस्
प्रिया वै खलु नो भवती सती
 SF प्रियाk add. mark 1 वै खलु नस् भवती सती
प्रियमवृधद्
 SF प्रियम् अवृतत् अवृधत्
धन्त तर्हि
 SF धन्त खलु तर्हि
भवत्य्
 SF भवति
एतद् व्याख्यास्यामि ते
 SF एतद् व्याख्यास्यामि ते
व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥
 SF व्याचक्षाणस्य तु मे निदिध्यासस्व इति

मन्त्र ६ [IV.v.6]

स होवाच
 SF स ह उवाच याज्ञवल्क्यस्k OM.
न वा अरे पत्युः कामाय पतिः प्रियो भवत्य्
 SF न वै अरे पत्युर् कामाय पतिस् प्रियस् भवति
आत्मनस्तु कामाय पतिः प्रियो भवति ।
 SF आत्मनस् तु कामाय पतिस् प्रियस् भवति
न वा अरे जायायै कामाय जाया प्रिया भवत्य्
 SF न वै अरे जायायै कामाय जाया प्रिया भवति
आत्मनस्तु कामाय जाया प्रिया भवति ।
 SF आत्मनस् तु कामाय जाया प्रिया भवति
न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्य्
 SF न वै अरे पुत्राणाम् कामाय पुत्रास् प्रिया भवन्ति
आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।
 SF आत्मनस् तु कामाय पुत्रास् प्रिया भवन्ति
न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्य्
 SF न वै अरे वित्तस्य कामाय वित्तम् प्रियम् भवति
आत्मनस्तु कामाय वित्तं प्रियं भवति ॥
 SF आत्मनस् तु कामाय वित्तम् प्रियम् भवति
न वा अरे पशूनां कामाय पशवः प्रिया भवन्ति
 SF
आत्मनस्तु कामाय पशवः प्रिया भवन्ति ।
 SF
न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्य्
 SF न वै अरे ब्रह्मणस् कामाय ब्रह्म प्रियम् भवति
आत्मनस्तु कामाय ब्रह्म प्रियं भवति ।
 SF आत्मनस् तु कामाय ब्रह्म प्रियम् भवति
न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्य्
 SF न वै अरे क्षत्रस्य कामाय क्षत्रम् प्रियम् भवति
आत्मनस्तु कामाय क्षत्रं प्रियं भवति ।
 SF आत्मनस् तु कामाय क्षत्रम् प्रियम् भवति
न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्य्
 SF न वै अरे लोकानाम् कामाय लोकास् प्रियास् भवन्ति
आत्मनस्तु कामाय लोकाः प्रिया भवन्ति ।
 SF आत्मनस् तु कामाय लोकास् प्रियास् भवन्ति
न वा अरे देवानां कामाय देवाः प्रिया भवन्त्य्
 SF न वै अरे देवानाम् कामाय देवास् प्रियास् भवन्ति
आत्मनस्तु कामाय देवाः प्रिया भवन्ति ।
 SF आत्मनस् तु कामाय देवास् प्रियास् भवन्ति
न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्य्
 SF
आत्मनस्तु कामाय वेदाः प्रिया भवन्ति ।
 SF
न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्य्
 SF न वै अरे भूतानाम् कामाय भूतानि प्रियाणि भवन्ति
आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति ।
 SF आत्मनस् तु कामाय भूतानि प्रियाणि भवन्ति
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्य्
 SF न वै अरे सर्वस्य कामाय सर्वम् प्रियम् भवति
आत्मनस्तु कामाय सर्वं प्रियं भवत्य्
 SF आत्मनस् तु कामाय सर्वम् प्रियम् भवति
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो
 SF अत्मा वै अरे द्रष्टव्यस् श्रोतव्यस् मन्तव्यस्
 निदिध्यासितव्यस्
मैत्रेय्य्
 SF मैत्रेयि
आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं
विदितम् ।
 SF आत्मनस् वै अरे दर्शनेन श्रवणेन मत्या विज्ञानेन
 इदम् सर्वम् विदितम्

मन्त्र ७ [IV.v.7]

ब्रह्म तं परादाद्
 SF ब्रह्म तम् परादात्
योऽन्यत्राऽऽत्मनो ब्रह्म वेद
 SF यस् अन्यत्र आत्मनस् वेदान्
क्षत्रं तं परादाद्
 SF क्षत्रम् तम् प्रादात्
योऽन्यत्राऽऽत्मनः क्षत्रं वेद
 SF यस् अन्यत्र आत्मनस् क्षत्रम् वेद
लोकास्तं परादुः
 SF लोकास् तम् परादुः
योऽन्यत्राऽऽत्मनो लोकान्वेद

 SF यस् अन्यत्र आत्मनस् लोकान् वेद
देवास्तं परादुः
 SF देवास् तम् परादुः
योऽन्यत्रात्मनो देवान्वेद
 SF यस् अन्यत्र आत्मनस् देवान् वेद
वेदास्तं परादुर्
 SF वेद वेदास् तम् परादुः
योऽन्यत्रात्मनो वेदान्वेद
 SF यस् अन्यत्र आत्मनस् वेदान् वेद
भूतानि तं परादुर्
 SF भूतानि तम् परादुः
योऽन्यत्राऽऽत्मनो भूतानि वेद
 SF यस् अन्यत्र आत्मनस् भूतानि वेद
सर्वं तं परादाद्
 SF सर्वम् तम् परादात्
योऽन्यत्राऽऽत्मनः सर्वं वेद्
 SF यस् अन्यत्र आत्मनस् सर्वम् वेद
एदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि
भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥
 SF इदम् ब्रह्म इदम् क्षत्रम् इमे लोकास् इमे देवास् इमे
 वेदास् इमानि भूतानि इदम् सर्वम् यद् अयम् आत्मा

मन्त्र ८ [IV.v.8]

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय
 SF स यथा दुन्दुभेस् हन्यमानस्य न बाह्यान् शब्दान्
 शक्नुयात् ग्रहणाय
दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥
 SF दुन्दुभेस् तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दस्
 गृहीतस्

मन्त्र ९ [IV.v.9]

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्
ग्रहणाय
 SF स यथा षङ्खस्य ध्मायमानस्य न बाह्यान् शब्दान्
 शक्नुयात् ग्रहणाय
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥
 SF षङ्खस्य तु ग्रहणेन षङ्खध्मस्य वा शब्दस्
 गृहीतस्

मन्त्र १० [IV.v.10]

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय
 SF स यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान्
 शक्नुयात् ग्रहणाय
वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥
 SF वीणायै तु ग्रहणेन वीणावादस्य वा शब्दस् ग्हीतस्

मन्त्र ११ [IV.v.11]

स यथाऽऽर्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्य्
 SF स यथा आर्द्रैधाग्नेस् अभ्याहितस्य पृथक् धूमास्
 विनिश्चरन्ति
एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो
यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं
विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि
इष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः
सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥
 SF एवम् वै अरे अस्य महतस् भूतस्य निश्वसितम्k
 निःश्वसितम् एतद् यद् ऋग्वेदस् यजुर्वेदस्
सामवेदस्
 अथर्वाङ्गिरसस् इतिहासस् पुराणम् विद्यास्
उपनिषदस्
 श्लोकास् सूत्राणि अनुव्याख्यानानि व्याख्याननि दत्तम् k
इष्टम्
 हुतम् आशितम् पायितम् अयम् च लोकस् परस् च
लोकस्
 सर्वाणि च भूतानि अस्य एव एतानि सर्वाणि निश्वसितानिk

 निःश्वसितानि

मन्त्र १२ [IV.v.12]

स यथा सर्वासामपाꣳ समुद्र एकायनम्
 SF स यथा सर्वासाम् अपाम् समुद्रस् एकायनम्
एवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनम्
 SF एवम् सर्वेषाम् स्पर्शानाम् त्वक् एकायनम्
एवꣳ सर्वेषां गन्धानां नासिकैकायनम्
 SF एवम् सर्वेषाम् गन्धानाम् नासिके एकायनम्
एवꣳ सर्वेषाꣳ रसानां जिह्वैकायनम्
 SF एवम् सर्वेषाम् रसानाम् जिह्वा एकायनम्
एवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनम्
 SF एवम् सर्वेषाम् रूपाणाम् चक्षुस् एकायनम्
एवꣳ सर्वेषं शब्दानां श्रोत्रमेकायनम्
 SF एवम् सर्वेषम् शब्दानाम् श्रोत्रम् एकायनम्
एवꣳ सर्वेषाꣳ सङ्कल्पानां मन एकायनम्
 SF एवम् सर्वेषाम् सङ्कल्पानाम् मनस् एकायनम् k
 मनस् एकायनम्
एवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनम्
 SF एवम् सर्वासाम् विद्यानाम् हृदयम् एकायनम्
एवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनम्

SF एवम् सर्वेषाम् कर्मणाम् हस्तौ एकायनम्
एवꣳ सर्वेषामानन्दानामुपस्थ एकायनम्
SF एवम् सर्वेषाम् आनन्दानाम् उपस्थस् एकायनम्
एवꣳ सर्वेषां विसर्गाणां पायुरेकायनम्
SF एवम् सर्वेषाम् विसर्गाणाम् पायुस् एकायनम्
एवꣳ सर्वेषामध्वनां पादावेकायनम्
SF एवम् सर्वेषाम् अध्वनाम् पादौ एकायनम्
एवꣳ सर्वेषां वेदानां वागेकायनम् ॥१२ ॥
SF एवम् सर्वेषाम् वेदानाम् वाक् एकायनम्

मन्त्र १३ [IV.v.13]

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवै
SF स यथा सैन्धवघनस् अनन्तरस् अबाह्यस् कृत्स्नस्
रसघनस् एव स्यात्k OM.
वं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो
भूतेभ्यः समुत्थाय तान्येवानुविनयष्यतिति
SF एवम् वै अरे इदम् महत् भूतम् अनन्तम् अपरम्
अरे अयम् आत्मा अनन्तरस् अबाह्यस् कृत्स्नस्
प्रज्ञानघनस्
एव एतेभ्यस् भूतेभ्यस् समुत्थाय तानि एव अनुविनयति
न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१३ ॥
SF न प्रेत्य संज्ञा अस्ति इति अरे ब्रविमि इति ह उवाच
याज्ञवल्क्यस्

मन्त्र १४ [IV.v.14]

सा होवाच मैत्रेय्य्
SF सा ह उवाच मैत्रेयी
अत्रैव मा भगवान्मोहान्तमापीपिपन्
SF अत्र एव मा भगवान् मोहान्तम् आपीपदत्
न वा अहमिमं विजानामीति
SF न वै अहम् इमम् विजानामि इति
स होवाच
SF स ह उवाच याज्ञवल्क्यस्k OM.
न वा अरेऽहं मोहं ब्रवीम्य्
SF न वै अरे अहम् मोहम् ब्रवीमि
अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥१४ ॥
SF अविनाशी वै अरे अयम् आत्मा अनुच्छित्तिधर्मा

मन्त्र १५ [IV.v.15]

यत्र हि द्वैतमिव भवति
SF यत्र हि द्वैतम् इव भवति
तदितर इतरं पश्यति
SF तद् इतरस् इतरम् पश्यति
तदितर इतरं जिघ्रति
SF तद् इतरस् इतरम् जिघ्रति
तदितर इतरꣳ रसयते
SF तद् इतरस् इतरम् रसयति
तदितर इतरमभिवदति
SF तद् इतरस् इतरम् अभिवदति
तदितर इतरꣳ शृणोति
SF तद् इतरस् इतरम् शृणोति
तदितर इतरं मनुते
SF तद् इतरस् इतरम् मनुते
तदितर इतरꣳ स्पृशति
SF तद् इतरस् इतरम् स्पृशति
तदितर इतरं विजानाति ।
SF तद् इतरस् इतरम् विजानाति
यत्र त्वस्य सर्वमात्मैवाभूत्
SF यत्र तु अस्य सर्वम् आत्मा एव अभूत्
तत्केन कं पश्येत्
SF तद् केन कम् पश्येत्
तत्केन कं जिघ्रेत्
SF तद् केन कम् जिघ्रेत्
तत्केन कꣳ रसयेत्
SF तद् केन कम् रसयेत्
तत्केन कमभिवदेत्
SF तद् केन कम् अभिवदेत्
तत्केन कꣳ शृणुयात्
SF तद् केन कम् शृणुयात्
तत्केन कं मन्वीत
SF तद् केन कम् मन्वीत
तत्केन कꣳ स्पृशेत्
SF तद् केन कम् स्पृशेत्
तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति
SF तद् केन कम् विजानीयात्
तं केन विजानीयात्
SF तम् केन विजानीयात्
स एष नेति नेत्याऽत्मागृह्यो न हि गृह्यते
SF सस् एष न इति न इति आत्मा अगृह्यस् न हि गृह्यते
ऽशीर्यो न हि शीर्यते
SF अशीर्यस् न हि शीर्यते
ऽसङ्गो न हि सज्यते
SF असङ्गस् न हि सज्यते
ऽसितो न व्यथते न रिष्यति ।
SF असितस् न व्यथते न रिष्यतिϐ
विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि
SF विज्ञातारम् अरे केन विजानीयात् इति उक्तानुशासना असि
मैत्रेय्य्
SF मैत्रेयि

एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो
विजहार ॥१५ ॥इति पञ्चमं ब्राह्मणम् ॥
SF एतावत् अरे खलु अमृतत्वम् इति ह उक्त्वा याज्ञवल्क्यस्
विजहार

षष्ठं ब्राह्मणम् ।

मन्त्र १ [IV.vi.1]

अथ वꣳशः
SF अथ वꣳशस्
पौतिमाष्यो गौपवनाद्
SF पशुतिमाष्यस् गौपवनाद्
गौपवनः पौतिमाष्यात्
SF गौपवनस् पशुतिमाष्याद्
पौतिमाष्यो गौपवनाद्
SF पशुतिमाष्यस् गौपवनाद्
गौपवनः कौशिकात्
SF गौपवनः कौशिकाद्
कौशिकः कौण्डिन्यात्
SF कौशिकस् कौण्डिन्याद्
कौण्डिन्यः शाण्डिल्याच्
SF कौण्डिन्यस् ह्याण्डिल्याद्
छाण्डिल्यः कौशिकाच्च गौतमाच्च
SF ह्याण्डिल्यस् कौशिकाद् च गौतमाद् च
गौतमः ॥१ ॥
SF गौतमस्

मन्त्र २ [IV.vi.2]

आग्निवेश्याद्
SF अग्निवेश्यस्
अग्निवेश्यो गार्ग्याद्
SF अग्निवेश्याद् गार्ग्याद्
गार्ग्यो गार्ग्याद्
SF गार्ग्यस् गार्ग्याद्
गार्ग्यो गौतमाद्
SF गार्ग्यस् गौतमाद्
गौतमः सैतवात्
SF गौतमस् शैतवाद्
सैतवः पाराशर्यायणात्
SF शैतवस् पाराशर्यायणाद्
पाराशार्यायणो गार्ग्यायणाद्
SF पाराशार्यायणस् गार्ग्यायणाद्
गार्ग्यायण उद्दालकायनाद्
SF गार्ग्यायणस् ऊद्दालकायनाद्
उद्दालकायनो जाबालायनाज्
SF ऊद्दालकायनस् जाबालायनाद्
जाबालायनो माध्यन्दिनायनान्
SF जाबालायनस् माध्यन्दिनायनाद्
माध्यन्दिनायनः सौकरायणात्
SF माध्यन्दिनायनस् शौकरायणाद्
सौकरायणः काषायणात्
SF शौकरायणस् काषायणाद्
काषायणः सायकायनात्
SF काषायणस् शायकायनाद्
सायकायनः कौशिकायनेः
SF शायकायनस् कौशिकायनेस्
कौशिकायनिः ॥ २ ॥
SF कौशिकायनिस्

मन्त्र ३ [IV.vi.3]

घृतकौशिकाद्
SF घृतकौशिकाद्
घृतकौशिकः पाराशर्यायणात्
SF घृतकौशिकस् प्राशर्यायणाद्
पाराशर्यायणः पाराशर्यात्
SF पारशर्यायणस् पाराशर्याद्
पाराशर्यो जातूकर्ण्याज्
SF पाराशर्यस् जातूकर्ण्याद्
जातूकर्ण्य आसुरायणाच्च यास्काच्चा
SF जातूकर्ण्यस् असुरायणाद् च यास्काद् च
ऽऽसुरायणस्त्रैवणेस्
SF असुरायणस् त्रैवणेः
त्रैवणिरौपजन्धनेर्
SF त्रैवणिस् आउपजन्धनेस्
औपजन्धनिरासुरेर्
SF औपजन्धनिस् असुरेस्
आसुरिर्भारद्वाजाद्
SF असुरिस् भारद्वाजाद्
भारद्वाज आत्रेयाद्
SF भारद्वाजस् अत्रेयाद्
आत्रेयो माण्टेर्
SF अत्रेयस् माण्टेस्
माण्टिर्गौतमाद्
SF माण्टिस् गौतमाद्
गौतमो गौतमाद्
SF गौतमस् गौतमाद्
गौतमो वात्स्याद्
SF गौतमस् वात्स्याद्

वात्स्यः शाण्डिल्याच्
 SF वात्स्यस् हाण्डिल्याद्
छाण्डिल्यः कैशोर्यात्काप्यात्
 SF हाण्डिल्यस् कैशोर्याद् काप्याद्
कैशोर्यः काप्यः कुमारहारितात्
 SF कैशोर्यस् काप्यस् कुमारहारिताद्
कुमारहारितो गालवाद्
 SF कुमारहारितस् गालवाद्
गालवो विदर्भीकौण्डिन्याद्
 SF गालवस् विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्
 SF विदर्भी कौण्डिन्यस् वत्सनपातस् बाभ्रवाद्
वत्सनपाद्बाभ्रव पथः सौभरात्
 SF वत्सनपाद् बाभ्रवस् पथस् शौभराद्
पन्थाः सौभरोऽयास्यादाङ्गिरसाद्
 SF पन्थास् शौभरस् आयास्याद् अङ्गिरसाद्
अयास्य आङ्गिरस आभूतेस्त्वाष्ट्राद्
 SF अयास्यस् अङ्गिरसस् अभूतेस् त्वाष्ट्राद्
आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्
 SF अभूतिस् त्वाष्ट्रस् विवरूपाद् त्वाष्ट्राद्
विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम्
 SF विश्वरूपस् त्वाष्ट्रस् आश्विभ्याम्
अश्विनौ दधीच आथर्वणाद्
 SF अश्विनौ दधीचस् अथर्वणाद्
दध्यङ्ङाथर्वणोऽथर्वणो दैवाद्
 SF दध्यङ् अथर्वणस् आथर्वणस् दैवाद्
अथर्वा दैवो मृत्योः प्राध्वꣳसनान्
 SF अथर्वा दैवस् मृत्योस् प्राध्वꣳसनाद्
मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्
 SF मृत्युस् प्राध्वꣳसनस् प्रध्वꣳसनाद्
प्रध्वꣳसन एकर्षेर्
 SF प्रध्वꣳसनस् एकर्षेस्
एकर्षिर्विप्रचित्तेः
 SF एकर्षिस् विप्रचित्तेस्
विप्रचित्तिर्व्यष्टेर्
 SF विप्रचित्तिस् व्यष्टेस्
व्यष्टिः सनारोः
 SF व्यष्टिस् शनारोस्
सनारुः सनातनात्
 SF शनारुस् शनातनाद्
सनातनः सनगात्
 SF शनातनस् शनगाद्
सनगः परमेष्ठिनः
 SF शनगस् परमेष्ठिनस्
परमेष्ठी ब्रह्मणो
 SF परमेष्ठी ब्रह्मणस्
ब्रह्म स्वयंभु
 SF ब्रह्म स्वयंभु
ब्रह्मणे नमः ॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥
 SF ब्रह्मणे नमस्
॥ इति बृहदारण्यकोपनिषदि चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

प्रथमं ब्राह्मणम् । [V.i.1]

ॐ पूर्णमदः
 SF पूर्णम् अदस्
पूर्णमिदं
 SF पूर्णम् इदम्
पूर्णात्पूर्णमुदच्यते ।
 SF पूर्णाद् पूर्णम् उदच्यते
पूर्णस्य पूर्णमादाय
 SF पूर्णस्य पूर्णम् आदाय
पूर्णमेवावशिष्यते ।
 SF पूर्णम् एव अवशिष्यते
ॐ३ खं ब्रह्म
 SF खम् ब्रह्म
खं पुराणं
 SF खम् पुराणम्
वायुरं खम्
 SF वायुरम् खम्
इति ह स्माऽऽह कौरव्यायणीपुत्रो ।
 SF इति ह स्म आह कौरव्यायणीपुत्रस्
वेदोऽयम्
 SF वेदस् अयम्
ब्राह्मणा विदुर्
 SF ब्राह्मणास् विदुर्
वेदैनेन यद्वेदितव्यम् ॥ १ ॥ इति प्रथमं ब्राह्मणम् ॥
 SF वेद एनेन यद् वेदितव्यम्

द्वितीयं ब्राह्मणम् ।

मन्त्र १ [V.ii.1]

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्
 SF त्रयास् प्राजापत्यास् प्रजापतौ पितरि ब्रह्मचर्यम्
 ऊषुर्
देवा मनुष्या असुरा
 SF देवास् मनुष्यास् असुरास्
उषित्वा ब्रह्मचर्यं देवा ऊचुर्

SF उषित्वा ब्रह्मचर्यम् देवास् ऊचुर्
ब्रवीतु नो भवानिति ।
SF ब्रवीतु नस् भवान् इति
तेभ्यो हैतदक्षरमुवाच
SF तेभ्यस् ह एतद् अक्षरम् उवाच
द इति
SF दस् इति
व्यज्ञासिष्टा३ इति ।
SF व्यज्ञासिष्ट इति
व्यज्ञासिष्मेति होचुर्
SF व्यज्ञासिष्म इति ह ऊचुर्
दाम्यतेति न आत्थेत्य्
SF दाम्यत इति नस् आत्थ इति
ओमिति होवाच
SF ओम् इति ह उवाच
व्यज्ञासिष्टेति ॥ १ ॥
SF व्यज्ञासिष्ट इति

मन्त्र २ [V.ii.2]

अथ हैनं मनुष्या ऊचुर्
SF अथ ह एनम् मनुष्यास् ऊचुर्
ब्रवीतु नो भवानिति ।
SF ब्रवीतु नस् भवान् इति
तेभ्यो हैतदेवाक्षरमुवाच
SF तेभ्यस् ह एतद् एव अक्षरम् उवाच
द इति
SF दस् इति
व्यज्ञासिष्टा३ इति ।
SF व्यज्ञासिष्ट इति
व्यज्ञासिष्मेति होचुर्
SF व्यज्ञासिष्म इति ह ऊचुर्
दत्तेति न आत्थेत्य्
SF दत्त इति नस् आत्थ इति
ओमिति होवाच
SF ओम् इति ह उवाच
व्यज्ञासिष्टेति ॥ २ ॥
SF व्यज्ञासिष्ट इति

मन्त्र ३ [V.ii.3]

अथ हैनमसुरा ऊचुर्
SF अथ ह एनम् असुरास् ऊचुर्
ब्रवीतु नो भवानिति ।
SF ब्रवीतु नस् भवान् इति
तेभ्यो हैतदेवाक्षरमुवाच
SF तेभ्यस् ह एतद् एव अक्षरम् उवाच
द इति
SF दस् इति
व्यज्ञासिष्टा३ इति ।
SF व्यज्ञासिष्ट इति
व्यज्ञासिष्मेति होचुर्
SF व्यज्ञासिष्म इति ह ऊचुर्
दयध्वमिति न आत्थेत्य्
SF दयध्वम् इति नस् आत्थ इति
ओमिति होवाच
SF ओम् इति ह उवाच
व्यज्ञासिष्टेति ।
SF व्यज्ञासिष्ट इति
तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्
SF तद् एतद् एव एषा दैवी वाक् अनुवदति स्तनयित्नुस्
द द द इति
SF दददस् इति
दाम्यत दत्त दयध्वमिति ।
SF दम्यत दत्त दयध्वम् इति
तदेतत्त्रयꣳ शिक्षेद्
SF तद् एतद् त्रयम् शिक्षेत्
दमं
SF दमम्
दानं
SF दानम्
दयामिति ॥ ३ ॥ इति द्वितीयं ब्राह्मणम् ॥
SF दयाम् इति

तृतीयं ब्राह्मणम् । [V.iii.1]

एष प्रजापतिर्यद्धृदयम्
SF एष प्रजापतिस् यद् धृदयम्
एतद्ब्रह्मैतत्सर्वं ।
SF एतद् ब्रह्म एतद् सर्वम्
तदेतत्त्यक्षरꣳ
SF तद् एतद् त्र्यक्षरम्
हृदयमिति ।
SF हृदयम् इति
हृ इत्येकमक्षरम्
SF हृस् इति एकम् अक्षरम्
अभिहरन्त्यस्मै स्वाश्चान्ये च
SF अभिहरन्ति अस्मै स्वास् च अन्ये च
य एवं वेद ।
SF यस् एवम् वेद
द इत्येकमक्षरम्
SF दस् इति एकम् अक्षरम्

ददत्यस्मै स्वाश्चान्ये च
 SF ददन्ति ददति अस्मै स्वास् च अन्ये च
य एवं वेद ।
 SF यस् एवम् वेद
यमित्येकमक्षरम्
 SF यम् इति एकम् अक्षरम्
एति स्वर्गं लोकं
 SF एति स्वर्गम् लोकम्
य एवं वेद ॥१ ॥ इति तृतीयं ब्राह्मणम् ॥
 SF यस् एवम् वेद

चतुर्थं ब्राह्मणम् । [V.iv.1]

तद्वै तद्
 SF तद् वै तद्
एतदेव तदास
 SF एतद् एव तद् आस
सत्यमेव ।
 SF सत्यम् एव
स यो हैतं महद्यक्षं प्रथमजं वेद
 SF स यस् ह एवम् महत् यक्षम् प्रथमजम् वेद
सत्यं ब्रह्मेति
 SF सत्यम् ब्रह्म इति
जयतीमाँल्लोकाञ्
 SF जयति इमान् लोकान्
जित इन्नवसावसद्
 SF जितस् इद् नु असौ असत्
य एवमेतन्महद्यक्षं प्रथमजं वेद
 SF यस् एवम् एतद् महत् यक्षम् प्रथमजम् वेद
सत्यं ब्रह्मेति
 SF सत्यम् ब्रह्म इति
सत्यँ ह्येव ब्रह्म ॥१ ॥ इति चतुर्थं ब्राह्मणम् ॥
 SF सत्यम् हि एव ब्रह्म

पञ्चमं ब्राह्मणम् ।

मन्त्र १ [v.V.1]

अप एवेदमग्र आसुस्
 SF अपस् एव इदम् अग्रे आसुर्
ता आपः सत्यमसृजन्त
 SF तास् आपस् सत्यम् असृजन्त
सत्यं ब्रह्म
 SF सत्यम् ब्रह्म
ब्रह्म प्रजापतिम्
 SF ब्रह्म प्रजापतिम्
प्रजापतिर्देवाँस्
 SF प्रजापतिस् देवान्
ते देवाः सत्यमेवोपासते
 SF ते देवास् सत्यम् इति एव उपासते
तदेतत्त्यक्षरँ
 SF तद् एतद् त्र्यक्षरम्
सत्यमिति ।
 SF सत्यम् सतियम् इति
स इत्येकमक्षरम्
 SF स इति एकम् अक्षरम्
तीत्येकमक्षरम्
 SF ति इति एकम् अक्षरम्
यमित्येकमक्षरं ।
 SF अम् यम् इति एकम् अक्षरम्
प्रथमोत्तमे अक्षरे सत्यम्
 SF प्रथमोत्तमे अक्षरे सत्यम्
मध्यतोऽनृतम् तदेतदनृतमुभयतः
सत्येन परिगृहीतँ
 SF मध्यतस् अनृतम् तद् एतद्
  अनृतम्k add. mark 1 उभयतस्
  सत्येन परिगृहीतम्
सत्यभूयमेव भवति ।
 SF सत्यभूयम् एव भवति
नैनंविद्वाँसमनृतँ हिनस्ति ॥१ ॥
 SF न एवंविद्वाँसम् अनृतम् हिनस्ति

मन्त्र २ [V.v.2]

तद्यत्तत्सत्यमसौ स आदित्यो ।
 SF तद् यद् तद् सत्यम् असौ सस् आदित्यस्
य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्
पुरुषस्
 SF यस् एषस् एतस्मिन् मण्डले पुरुषस् यस्च अयम्
  दक्षिणे अक्षन् पुरुषः
तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ
 SF तौ एतौ अन्यस् अन्यस्मिन् प्रतिष्ठितौ
रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः
 SF रश्मिभिस् एषस् अस्मिन् प्रतिष्ठितस्
प्राणैरयममुष्मिन्
 SF प्राणैस् अयम् अमुष्मिन्
स यदोत्क्रमिष्यन्भवति
 SF स यदा उत्क्रमिष्यन् भवति
शुद्धमेवैतन्मण्डलं पश्यति
 SF शुद्धम् एव एतद् मण्डलम् पश्यति
नैनमेते रश्मयः प्रत्यायन्ति ॥२ ॥
 SF न एनम् एते रश्मयस् प्रत्यायन्ति

मन्त्र ३ [V.v.3]

य एष एतस्मिन्मण्डले पुरुषस्
 SF यस् एषस् एतस्मिन् मण्डले पुरुषः
तस्य भूरिति शिर
 SF तस्य भूस् इति शिरस्
एकꣳ शिर
 SF एकम् शिरस्
एकमेतदक्षरं
 SF एकम् एतद् अक्षरम्
भुव इति बाहू
 SF भुवस् इति बाहू
द्वौ बाहू
 SF द्वौ बाहू
द्वे एते अक्षरे
 SF द्वे एते अक्षरे
स्वरिति प्रतिष्ठा
 SF स्वरिति प्रतिष्ठा
द्वे प्रतिष्ठे द्वे एते अक्षरे ।
 SF द्वे प्रतिष्ठे द्वे एते अक्षरे
तस्योपनिषदहरिति ।
 SF तस्य उपनिषद् अहरिति
हन्ति पाप्मानं जहाति च
 SF हन्ति पाप्मानम् जहाति च
य एवं वेद ॥३ ॥
 SF यस् एवम् वेद

मन्त्र ४ [V.v.4]

योऽयं दक्षिणेऽक्षन्पुरुषस्
 SF अथk OM. यस् अयम् दक्षिणे अक्षन् पुरुषः
तस्य भूरिति शिरः
 SF तस्य भूस् इति शिरस्
एकꣳ शिर
 SF एकम् शिरस्
एकमेतदक्षरम्
 SF एकम् एतद् अक्षरम्
भुव इति बाहू
 SF भुवस् इति बाहू
द्वौ बाहू
 SF द्वौ बाहू
द्वे एते अक्षरे
 SF द्वे एते अक्षरे
स्वरिति प्रतिष्ठा
 SF स्वरिति प्रतिष्ठा

द्वे प्रतिष्ठे
 SF द्वे प्रतिष्ठे
द्वे एते अक्षरे ।
 SF द्वे एते अक्षरे
तस्योपनिषदहमिति ।
 SF तस्य उपनिषद् अहम् इति
हन्ति पाप्मानं जहाति च
 SF हन्ति पाप्मानम् जहाति च
य एवं वेद ॥४ ॥ इति पञ्चमं ब्राह्मणम् ॥
 SF यस् एवम् वेद

षष्ठं ब्राह्मणम् [V.vi.1]

मनोमयोऽयं पुरुषो
 SF मनोमयस् अयम् पुरुषस्
भाःसत्यस्
 SF भाःसत्यः
तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा
 SF तस्मिन् अन्तर्हृदये यथा व्रीहिस् वा यवस् वा एवम्
 अयम् अन्तरात्मन् पुरुषस्k OM. एवम्
स एष सर्वस्य सर्वस्येशानः
 SF स एष सर्वस्य सर्वस्य ईशानस्
सर्वस्याधिपतिः
 SF सर्वस्य अधिपतिस्
सर्वमिदं प्रशास्ति यदिदं किञ्च ॥१ ॥ इति षष्ठं ब्राह्मणम् ॥
 SF सर्वम् इदम् प्रशास्ति यद् इदम् किञ्च

सप्तमं ब्राह्मणम् । [V.vii.1]

विद्युद् ब्रह्मेत्याहुर्
 SF विद्युत् ब्रह्म इति आहुर्
विदानाद्विद्युद्
 SF विदानाद् विद्युत्
विद्यत्येनं पाप्मनो
 SF विद्यति एनम् पाप्मनस्
य एवं वेद
 SF यस् एवम् वेद
विद्युद्ब्रह्मेति ।
 SF विद्युत् ब्रह्म इति
विद्युद्ध्येव ब्रह्म ॥१ ॥ इति सप्तमं ब्राह्मणम् ॥
 SF विद्युत् धि एव ब्रह्म

अष्टमं ब्राह्मणम् । [V.viii.1]

वाचं धेनुमुपासीत ।

 SF वाचम् धेनुम् उपासीत
तस्याश्चत्वारः स्तनाः
 SF तस्यास् चत्वारस् स्तनास्
स्वाहाकारो वषङ्कारो हन्तकारः स्वधाकारस्
 SF स्वाहाकारस् वषङ्कारस् हन्तकारस् स्वधाकारः
तस्यै द्वौ स्तनौ देवा उपजीवन्ति
 SF तस्यै द्वौ स्तनौ देवास् उपजीवन्ति
स्वाहाकारं च वषङ्कारं च
 SF स्वाहाकारम् च वषङ्कारम् च
हन्तकारं मनुष्याः
 SF हन्तकारम् मनुष्यास्
स्वधाकारं पितरः ।
 SF स्वधाकारम् पितरस्
तस्याः प्राण ऋषभो
 SF तस्यास् प्राणस् ऋषभस्
मनो वत्सः ॥ १ ॥   इत्यष्टमं ब्राह्मणम् ॥
 SF मनस् वत्सस्

नवमं ब्राह्मणम् । [V.ix.1]

अयमाग्निर्वैश्वानरो योऽयमन्तः पुरुषे
 SF अयम् आग्निस् वैश्वानरस् यस् अयम् अन्तर् पुरुषे
येनेदमन्नं पच्यते यदिदमद्यते ।
 SF येन इदम् अन्नम् पच्यते यद् इदम् अद्यते
तस्यैष घोषो भवति
 SF तस्य एष घोषस् भवति
यमेतत्कर्णावपिधाय शृणोति ।
 SF यम् एतद् कर्णौ अपिधाय शृणोति
स यदोत्क्रमिष्यन्भवति
 SF स यदा उत्क्रमिष्यन् भवति
नैनं घोषꣳ शृणोति ॥ १ ॥   इति नवमं ब्राह्मणम् ॥
 SF न एनम् घोषम् शृणोति

दशमं ब्राह्मणम् । [V.x.1]

यदा वै पुरुषोऽस्माल्लोकात्प्रैति
 SF यदा वै पुरुषस् अस्माद् लोकाद् प्रैति
स वायुमागच्छति
 SF स वायुम् आगच्छति
तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं
 SF तस्मै स तत्र विजिहीते यथा रथचक्रस्य खम्
तेन स ऊर्ध्व आक्रमते ।
 SF तेन सस् ऊर्ध्वस् आक्रमते
स आदित्यमागच्छति
 SF सस् आदित्यम् आगच्छति
तस्मै स तत्र विजिहीते यथालम्बरस्य खम्
 SF तस्मै स तत्र विजिहीते यथा अडम्बरस्य अलम्बरस्य खम्
तेन स ऊर्ध्व आक्रमते ।
 SF तेन सस् ऊर्ध्वस् आक्रमते
स चन्द्रमसमागच्छति
 SF स चन्द्रमसम् आगच्छति
तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्
 SF तस्मै स तत्र विजिहीते यथा दुन्दुभेस् खम्
तेन स ऊर्ध्व आक्रमते ।
 SF तेन सस् ऊर्ध्वस् आक्रमते
स लोकमागच्छत्यशोकमहिमम्
 SF स लोकम् आगच्छति अशोकम् अहिमम्
तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥ इति दशमं ब्राह्मणम् ॥
 SF तस्मिन् वसति शाश्वतीस् समास्

एकादशं ब्राह्मणम् । [V.xi.1]

एतद्वै परमं तपो यद्व्याहितस्तप्यते
 SF एतद् वै परमम् तपस् यद् व्याहितस् तप्यते
परमꣳ हैव लोकं जयति
 SF परमम् ह एव लोकम् जयति
य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति
 SF यस् एवम् वेद एतद् वै परमम् तपस् यम्
 प्रेतम् अरण्यम् हरन्ति
परमꣳ हैव लोकं जयति
 SF परमम् ह एव लोकम् जयति
य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति
 SF यस् एवम् वेद एतद् वै परमम् तपस् यम्
 प्रेतम् अग्नौ अभ्यादधति
परमꣳ हैव लोकं जयति
 SF परमम् ह एव लोकम् जयति
य एवं वेद ॥ ११ ॥   इति एकादशं ब्राह्मणम् ॥
 SF यस् एवम् वेद

द्वादशं ब्राह्मणम् । [V.xii.1]

अन्नं ब्रह्मेत्येक आहुस्
 SF अन्नम् ब्रह्म इति एके आहुर्
तन्न तथा
 SF तद् न तथा
पूयति वा अन्नमृते प्राणात्
 SF पूयति वै अन्नम् ऋते प्राणाद्
प्राणो ब्रह्मेत्येक आहुस्
 SF प्राणस् ब्रह्म इति एके आहुर्
तन्न तथा
 SF तद् न तथा
शुष्यति वै प्राण ऋतेऽन्नाद्

SF शुष्यति वै प्रणस् ऋते अन्नाद्
एते ह त्वेव देवते
SF एते ह तु एव देवते
एकधाभूयं भूत्वा
SF एकधाभूयम् भूत्वा
परमतां गच्छतस्
SF परमताम् गच्छतः
तद्ध स्माऽऽह प्रातृदः पितरम्
SF तद् ध स्म आह प्रातृदस् पितरम्
किꣳ स्विदेवैवं विदुषे साधु कुर्याम्
SF किम् स्विद् एव एवंविदुषे साधु कुर्याम्
किमेवास्मा असाधु कुर्यामिति ।
SF किम् एव अस्मै असाधु कुर्याम् इति
स ह स्माह पाणिना
SF स ह स्म आह पाणिना
मा
SF मा
प्रातृद
SF प्रातृद
कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति ।
SF कस् तु एनयोस् एकधाभूयम् भूत्वा परमताम् गच्छति इति
तस्मा उ हैतदुवाच
SF तस्मै उ ह एतद् उवाच
वीत्य्
SF वि इति
अन्नं वै वि
SF अन्नम् वै वि
अन्ने हीमानि सर्वाणि भूतानि विष्टानि ।
SF अन्ने हि इमानि सर्वाणि भूतानि विष्टानि
रमिति
SF रम् इति
प्राणो वै रं
SF प्राणस् वै रम्
प्राणे हीमानि सर्वाणि भूतानि रमन्ते ।
SF प्राणे हि इमानि सर्वाणि भूतानि रतानि रमन्ते
सर्वाणि ह वा अस्मिन् भूतानि विशन्ति
SF सर्वाणि ह वै अस्मिन् भूतानि विशन्ति
सर्वाणि भूतानि रमन्ते
SF सर्वाणि भूतानि रमन्ते
य एवं वेद ॥१२ ॥ इति द्वादशं ब्राह्मणम् ॥
SF यस् एवम् वेद

त्रयोदशं ब्राह्मणम्

मन्त्र १ [V.xiii.1]

उक्थम्
SF उक्थम्
प्राणो वा उक्थम्
SF प्राणस् वै उक्थम्
प्राणो हीदꣳ सर्वमुत्थापयत्य्
SF प्राणस् हि इदम् सर्वम् उत्थापयति
उद्धास्मा धस्मादुक्थविद्वीरस्तिष्ठत्य्
SF उद् ध अस्मै अस्माद् उक्थविद् वीरस् तिष्ठति
उक्थस्य सायुज्यꣳ सलोकतां जयति
SF उक्थस्य सायुज्यम् सलोकताम् जयति
य एवं वेद ॥१ ॥
SF यस् एवम् वेद

मन्त्र २ [V.xiii.2]

यजुः
SF यजुस्
प्राणो वै यजुः
SF प्राणस् वै यजुस्
प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते ।
SF प्राणे हि इमानि सर्वाणि भूतानि युज्यन्ते
युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय
SF युज्यन्ते ह अस्मै सर्वाणि भूतानि श्रैष्ठ्याय
यजुषः सायुज्यꣳ सलोकतां जयति
SF यजुषस् सायुज्यम् सलोकताम् जयति
य एवं वेद ॥२ ॥
SF यस् एवम् वेद

मन्त्र ३ [V.xiii.3]

साम
SF साम
प्राणो वै साम
SF प्राणस् वै साम
प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि ।
SF प्राणे हि इमानि सर्वाणि भूतानि सम्यञ्चि
सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते
SF सम्यञ्चि ह अस्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते
साम्नः सायुज्यꣳ सलोकतां जयति
SF साम्नस् सायुज्यम् सलोकताम् जयति
य एवं वेद ॥३ ॥
SF यस् एवम् वेद

मन्त्र ४ [V.xiii.4]

क्षत्रम्
 SF क्षत्रम्
प्राणो वै क्षत्रम्
 SF प्राणस् वै क्षत्रम्
प्राणो हि वै क्षत्रम्
 SF प्राणस् हि वै क्षत्रम्
त्रायते हैनं प्राणः क्षणितोः ।
 SF त्रायते ह एनम् प्राणस् क्ष्हणितोस्
प्र क्षत्रमत्रमप्नोति
 SF प्र क्षत्रम् अत्रम् अत्रम् अप्नोति
क्षत्रस्य सायुज्यꣳ सलोकतां जयति
 SF क्षत्रस्य सायुज्यम् सलोकताम् जयति
य एवं वेद ॥ ४ ॥ इति त्रयोदशं ब्राह्मणम् ॥
 SF यस् एवम् वेद

चतुर्दशं ब्राह्मणम् ।

मन्त्र १ [V.xiv.1]

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्य्
 SF भूमिस् अन्तरिक्षम् द्यौस् इति अष्टौ अक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्
 SF अष्टाक्षरम् ह वै एकम् गायत्र्यै पदम्
एतदु हैवास्या एतत्
 SF एतद् उ ह एव अस्यास् एतद्
स यावदेषु त्रिषु लोकेषु
 SF स यावत् एषु त्रिषु लोकेषु
तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥
 SF तावत् ध जयति यस् अस्यास् एतद् एवम् पदम् वेद

मन्त्र २ [V.xiv.2]

ऋचो यजूꣳषि सामानीत्यष्टावक्षराण्य्
 SF ऋचस् यजूषि सामानि इति अष्टौ अक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्।
 SF अष्टाक्षरम् ह वै एकम् गायत्र्यै पदम्
एतदु हैवास्या एतत्
 SF एतद् उ ह एव अस्यास् एतद्
स यावतीयं त्रयी विद्या
 SF स यावती इयम् त्रयी विद्या
तावद्ध जयति
 SF तावत् ध जयति
योऽस्या एतदेवं पदं वेद ॥ २ ॥
 SF यस् अस्यास् एतद् एवम् पदम् वेद

मन्त्र ३ [V.xiv.3]

प्राणोऽपानो व्यान इत्यष्टावक्षराणि
 SF प्राणस् अपानस् व्यानस् इति अष्टौ अक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्
 SF अष्टाक्षरम् ह वै एकम् गायत्र्यै पदम्
एतदु हैवास्या एतत्
 SF एतद् उ ह एव अस्यास् एतद्
स यावदिदं प्राणि
 SF स यावत् इदम् प्राणि
तावद्ध जयति
 SF तावत् ध जयति
योऽस्या एतदेवं पदं वेद
 SF यस् अस्यास् एतद् एवम् पदम् वेद
अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति
 SF अथ अस्यास् एतद् एव तुरीयम् दर्शतम् पदम्
 परोरजास् यस् एष तपति
यद्वै चतुर्थं तत्तुरीयम्
 SF यद् वै चतुर्थम् तद् तुरीयम्
दर्शतं पदमिति
 SF दर्शतम् पदम् इति
ददृश इव ह्येष
 SF ददृशे इव हि एषस्
परोरजा इति
 SF परोरजास् इति
सर्वमु ह्येवैष रज उपर्युपरि तपत्य्
 SF सर्वम् उ हि एव एष रजस् उपर्युपरि तपति
एवꣳ हैव श्रिया यशसा तपति
 SF एवम् ह एव श्रिया यशसा तपति
योऽस्या एतदेवं पदं वेद ॥ ३ ॥
 SF यस् अस्यास् एतद् एवम् पदम् वेद

मन्त्र ४ [V.xiv.4]

सैषा गायत्र्येतस्मिꣳस्तुरीये दर्शते पदे परोरजसि
प्रतिष्ठिता
 SF सा एषा गायत्री एतस्मिन् तुरीये दर्शते पदे परोरजसि
 प्रतिष्ठिता
तद्वै तत्सत्ये प्रतिष्ठितं
 SF तद् वै तद् सत्ये प्रतिष्ठिता प्रतिष्ठितम्
चक्षुर्वै सत्यम्
 SF चक्षुस् वै सत्यम्
चक्षुर्हि वै सत्यम्
 SF चक्षुस् हि वै सत्यम्
तस्माद्यदिदानीं द्वौ विवदमानावेयाताम्
 SF तस्माद् यद् इदानीम् द्वौ विवदमानौ एयातम्

अहम् अदर्शम्
SF अहम् अद्राक्षम् अदर्शम्
अहमश्रौषमिति
SF अहम् अश्रौषम् इति
य एव एवं ब्रूयाद्
SF यस् एव एवम् ब्रूयात्
अहम् अदर्शमिति
SF अहम् अद्राक्षम् अदर्शम् इति
तस्मा एव श्रद्दध्याम ।
SF तस्मै एव श्रद्दध्यात् श्रद्दध्याम
तद्वै तत्सत्यं बले प्रतिष्ठितम्
SF तद् वै तद् सत्यम् बले प्रतिष्ठितम्
प्राणो वै बलम्
SF प्राणस् वै बलम्
तत्प्राणे प्रतिष्ठितम्
SF तद् प्राणे प्रतिष्ठितम्
तस्मादाहुर्
SF तस्माद् आहुर्
बलꣳ सत्यादोगीय इत्य्
SF बलम् सत्याद् ओजीयस् इति
एवं वेषा गायत्र्यध्यात्मं प्रतिष्ठिता ।
SF एवम् उ एषा गायत्री अध्यात्मम् प्रतिष्ठिता
सा हैषा गयाꣳस्तत्रे
SF सा ह एषा गयान् तत्रे
प्राणा वै गयास्
SF प्राणास् वै गयाः
तत्प्राणाꣳस्तत्रे
SF तद् प्राणास् तत्रे
तद्यद्गयाꣳस्तत्रे
SF तद् यद् गयान् तत्रे
तस्माद् गायत्री नाम ।
SF तस्माद् गायत्री नाम
स यामेवामूꣳ सावित्रीमन्वाहैषैव सा ।
SF स याम् एव अमूम्k add. mark 1 सावित्रीम् अन्वाह एषा एव सा
स यस्मा अन्वाह
SF स यस्मै अन्वाह
तस्य प्राणाꣳस्त्रायते ॥ ४ ॥
SF तस्य प्राणास् त्रायते

मन्त्र ५ [V.xiv.5]

ताꣳ हैतामेके सावित्रीमनुष्टुभमन्वाहुर्
SF ताम् हk add. mark 1 एताम् एके सावित्रीम् अनुष्टुभम् अन्वाहुर्
वागनुष्टुब्
SF वाक् अनुष्टुब्
एतद्वाचमनुब्रूम इति ।
SF एतद् वाचम् अनुब्रूमस् इति
न तथा कुर्याद्
SF न तथा कुर्यात्
गायत्रीमेवानुब्रूयाद् ।
SF गायत्रीम् एवk add. mark 1 सावित्रीम् अनुब्रूयात्
यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति
SF यदि ह वै अपिk add. mark 1 एवंविद् बहु इव प्रतिगृह्णाति
न हैव तद्गायत्र्या एकं चन पदं प्रति ॥ ५ ॥
SF न ह एव तद् गायत्र्यै एकम् चन पदम् प्रति

मन्त्र ६ [V.xiv.6]

स य इमाꣳस्त्रींल्लोकान्पूर्णान्प्रतिगृह्णीयात्
SF स यस् इमान् त्रीन् लोकान् पूर्णान् प्रतिगृह्णीयात्
सोऽस्या एतत्प्रथमं पदमाप्नुयाद् ।
SF सस् अस्यास् एतद् प्रथमम् पदम् आप्नुयात्
अथ यावतीयं त्रयी विद्या
SF अथ यावती इयम् त्रयी विद्या
यस्तावत्प्रतिगृह्णीयात्
SF यस् तावत् प्रतिगृह्णीयात्
सोऽऽस्या एतद्द्वितीयं पदमाप्नुयाद्
SF सस् अस्यास् एतद् द्वितीयम् पदम् आप्नुयात्
अथ यावदिदं प्राणि
SF अथ यावत् इदम् प्राणि
यस्तावत्प्रतिगृह्णीयात्
SF यस् तावत् प्रतिगृह्णीयात्
सोऽस्या एतत्तृतीयं पदमाप्नुयाद्
SF सस् अस्यास् एतद् तृतीयम् पदम् आप्नुयात्
अथास्या एतदेव तुरीयं दर्शतं पदम्
SF अथ अस्यास् एतद् एव तुरीयम् दर्शतम् पदम्
परोरजा य एष तपति
SF परोरजास् यस् एष तपति
नैव केन चनाप्यम्
SF न एव केन चनाऽऽप्यम्
कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥
SF कुतस् उ एतावत् प्रतिगृह्णीयाद्

मन्त्र ७ [V.xiv.7]

तस्या उपस्थानम्
SF तस्यै उपस्थानम्
गायत्र्य्
SF गायत्रि

अस्येकपदी द्विपदी त्रिपदी चतुष्पद्य्
 SF असि एकपदी द्विपदी त्रिपदी चतुष्पदि
अपदसि
 SF अपद् असि
न हि पद्यसे ।
 SF न हि पद्यसे
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे
 SF नमस् ते तुरीयाय दर्शताय पदाय परोरजसे
ऽसावदो मा प्रापदिति
 SF असौ अदस् मा प्रापत् इति
यं द्विष्याद्
 SF यम् द्विष्यात्
असावस्मै कामो मा समृद्धीति वा
 SF असौ अस्मै कामस् मा समर्धि इति वा
न हैवास्मै स कामः समृद्धयते यस्मा एवमुपतिष्ठते
 SF न ह एव अस्मै स कामस् समृध्यते यस्मै एवम्
 उपतिष्ठते
ऽहमदः प्रापमिति वा ॥ ७ ॥
 SF अहम् अदस् प्रापम् इति वा

मन्त्र ८ [V.xiv.8]

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच
 SF एतद् ध वै तद् जनकस् वैदेहस् बुढिलम्
 आश्वतराश्विम् उवाच
यन्नु हो तद्गायत्रीविदब्रूथा
 SF यद् नु ह उ तद् गायत्रीविद् अब्रूथास्
अथ कथꣳ हस्ती भूतो वहसीति ।
 SF अथ कथम् हस्ती भूतस् वहसि इति
मुखꣳ ह्यस्याः
 SF मुखम् हि अस्यास्
सम्राण्
 SF सम्राट्
न विदां चकारेति होवाच ।
 SF न विदाम् चकर इति ह उवाच
तस्या अग्निरेव मुखम्
 SF तस्यै आग्निस् एव मुखम्
यदि ह वा अपि बह्विवाग्नावभ्यादधति
 SF यदि ह वै अपि बहु इव आग्नौ अभ्यादधति
सर्वमेव तत्संदहत्य्
 SF सर्वम् एव तद् संदहति
एवꣳ हैवैवंविद्
 SF एवम् ह एव एवंविद्
यद्यपि बह्विव पापं कुरुते
 SF यदि अपि बहु इव पापम् करोति कुरुते
सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः
संभवति ॥ ८ ॥ इति चतुर्दशं ब्राह्मणम् ॥
 SF सर्वम् एव तद् संप्साय शुद्धस् पूतस् अजरस्
 अमृतस् संभवति

पञ्चदशं ब्राह्मणम् । [V.xv.1]

हिरण्मयेन पात्रेण
 SF हिरण्मयेन पात्रेण
सत्यस्यापिहितं मुखम् ।
 SF सत्यस्य अपिहितम् मुखम्
तत्त्वम्
 SF तद् त्वम्
पूषन्न्
 SF पूषन्
अपावृणु
 SF अपावृणु
सत्यधर्माय दृष्टये ।
 SF सत्यधर्माय दृष्टये
पूषन्न्
 SF पूषन्
एकर्षे
 SF एकर्षे
यम
 SF यम
सूर्य
 SF सूर्य
प्राजापत्य
 SF प्राजापत्य
व्यूह रश्मीन् ।
 SF व्यूह रश्मीन्
समूह तेजो
 SF समूह तेजस्
यत्ते रूपं
 SF यद् ते रूपम्
कल्याणतमं
 SF कल्याणतमम्
तत्ते पश्यामि ।
 SF तद् ते पश्यामि
योऽसावसौ पुरुषः
 SF यस् असौ असौ पुरुषस्
सोऽहमस्मि ।
 SF सस् अहम् अस्मि
वायुरनिलममृतम्
 SF वायुस् अनिलम् अमृतम्
अथेदं भस्मान्तꣳ शरीरम् ।
 SF अथ इदम् भस्मान्तम् शरीरम्

ॐ३ क्रतो
 SF क्रतस्
स्मर
 SF स्मर
कृतꣳ स्मर
 SF कृतम् स्मर
क्रतो
 SF क्रतस्
स्मर
 SF स्मर
कृतꣳ स्मर ।
 SF कृतम् स्मर
अग्ने
 SF अग्ने
नय सुपथा रायेऽस्मान्
 SF नय सुपथा राये अस्मान्
विश्वानि
 SF विश्वानि
देव
 SF देव
वयुनानि विद्वान्।
 SF वयुनानि विद्वान्
युयोध्यस्मज्जुहुराणमेनो
 SF युयोधि अस्मद् जुहूराणम् एनस्
भूयिष्ठां ते नम उक्तिं विधेम ॥१ ॥ इति पञ्चदशं ब्राह्मणम् ॥
 SF भूयिष्ठाम् ते नमःउक्तिम् विधेम
॥ इति बृहदारण्यकोपनिषदि पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः ।

प्रथमं ब्राह्मणम्

मन्त्र १ [VI.1.1]

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद
 SF यस् ह वै ज्येष्ठम् च श्रेष्ठम् च वेद
ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति ।
 SF ज्येष्ठस् च श्रेष्ठस् च स्वानाम् भवति
प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ।
 SF प्राणस् वै ज्येष्ठस् च श्रेष्ठस् च
ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्य्
 SF ज्येष्ठस् च श्रेष्ठस् च स्वानाम् भवति
अपि च येषां बुभूषति
 SF अपि च येषाम् बुभूषति
य एवं वेद ॥१ ॥
 SF यस् एवम् वेद

मन्त्र २ [VI.i.2]

यो ह वै वसिष्ठां वेद
 SF यस् ह वै वसिष्ठाम् वेद
वसिष्ठः स्वानां भवति ।
 SF वसिष्ठस् स्वानाम् भवति
वाग्वै वसिष्ठा ।
 SF वाक् वै वसिष्ठा
वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति ,
 SF वसिष्ठस् स्वानाम् भवतिk add. mark 1 अपि च येषाम् बुभूषति
य एवं वेद ॥२ ॥
 SF यस् एवम् वेद

मन्त्र ३ [VI.i.3]

यो ह वै प्रतिष्ठां वेद
 SF यस् ह वै प्रतिष्ठाम् वेद
प्रतितिष्ठति समे
 SF प्रतितिष्ठति समे
प्रतितिष्ठति दुर्गे ।
 SF प्रतितिष्ठति दुर्गे
चक्षुर्वै प्रतिष्ठा
 SF चक्षुस् वै प्रतिष्ठा
चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति ।
 SF चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति
प्रतितिष्ठति समे
 SF प्रतितिष्ठति समे
प्रतितिष्ठति दुर्गे
 SF प्रतितिष्ठति दुर्गे
य एवं वेद ॥३ ॥
 SF यस् एवम् वेद

मन्त्र ४ [VI.i.4]

यो ह वै संपदं वेद
 SF यस् ह वै संपदम् वेद
सꣳ हास्मै पद्यते
 SF सम् ह अस्मै पद्यते
यं कामं कामयते ।
 SF यम् कामम् कामयते
श्रोत्रं वै संपच्
 SF श्रोत्रम् वै संपद्

छ्रोत्रे ह्रीमे सर्वे वेदा अभिसंपन्नाः ।
 SF श्रोत्रे हि इमे सर्वे वेदास् अभिसंपन्नास्
सᳲ हास्मै पद्यते
 SF सम् ह अस्मै पद्यते
यं कामं कामयते
 SF यम् कामम् कामयते
य एवं वेद ॥ ४ ॥
 SF यस् एवम् वेद

मन्त्र ५ [VI.i.5]

यो ह वा आयतनं वेदाऽऽयतनᳲ स्वानां भवति
 SF यस् ह वै आयतनम् वेद आयतनम् स्वानाम् भवति
आयतनं जनानां ।
 SF अयतनम् जनानाम्
मनो वा आयतनम्
 SF मनस् वै आयतनम्
आयतनᳲ स्वानां भवत्य्
 SF अयतनम् स्वानाम् भवति
आयतनं जनानाम्
 SF अयतनम् जनानाम्
य एवं वेद ॥ ५ ॥
 SF यस् एवम् वेद

मन्त्र ६ [VI.i.6]

यो ह वै प्रजातिं वेद
 SF यस् ह वै प्रजातिम् वेद
प्रजायते ह प्रजया पशुभी
 SF प्रजायते ह प्रजया पशुभिस्
रेतो वै प्रजातिः ।
 SF रेतस् वै प्रजातिस्
प्रजायते ह प्रजया पशुभिर्
 SF प्रजायतेk add. mark 1 ह प्रजया पशुभिस्
य एवं वेद ॥ ६ ॥
 SF यस् एवम् वेद

मन्त्र ७ [VI.i.7]

ते हेमे प्राणा
 SF ते ह इमे प्राणास्
अहᳲश्रेयसे विवदमाना
 SF अहᳲश्रेयसे विवदमानास्
ब्रह्म जग्मुस्तद्धोचुः
 SF ब्रह्म जग्मुर्k add. mark 1 तद् ध ऊचुर्
को नो वसिष्ठ इति ।
 SF कस् नस् वसिष्ठस् इति
तद्धोवाच
 sN editio una indicha et k add. mark 1 तद् ध उवाच
यस्मिन्व उत्क्रान्त इदᳲ शरीरं पापीयो मन्यते
 SF यस्मिन् वस् उत्क्रान्ते इदम् शरीरम् पापियस् मन्यते
स वो वसिष्ठ इति ॥ ७ ॥
 SF स वस् वसिष्ठस् इति

मन्त्र ८ [vi.I.8]

वाग्घोच्चक्राम ।
 SF वाक् ध उच्चक्राम
सा संवत्सरं प्रोष्या ऽआ ऽआगत्योवाच
 SF सा संवत्सरम् प्रोष्य आगत्य उवाच
कथमशकत मदृते जीवितुमिति ।
 SF कथम् अशकत मद् ऋते जीवितुम् इति
ते होचुर्
 SF ते ह ऊचुर्
यथाऽकला
 SF यथा कडास् कलास्
अवदन्तो वाचा
 SF अवदन्तस् वाचा
प्राणन्तः प्राणेन
 SF प्राणन्तस् प्राणेन
पश्यन्तश्चक्षुषा
 SF पश्यन्तस् चक्षुषा
शृण्वन्तः श्रोत्रेण
 SF शृण्वन्तस् श्रोत्रेण
विद्वाᳲसो मनसा
 SF विद्वाᳲसस् मनसा
प्रजायमाना रेतसैवमजीविष्मेति ।
 SF प्रजायमानास् रेतसा एवम् अजीविष्म इति
प्रविवेश ह वाक् ॥ ८ ॥
 SF प्रविवेश ह वाक्

मन्त्र ९ [VI.i.9]

चक्षुर्होच्चक्राम ।
 SF चक्षुस् ह उच्चक्राम
तत्संवत्सरं प्रोष्याऽऽगत्योवाच
 SF तद् संवत्सरम् प्रोष्य आगत्य उवाच
कथमशकत मदृते जीवितुमिति ।
 SF कथम् अशकत मद् ऋते जीवितुम् इति
ते होचुर्
 SF ते ह ऊचुर्
यथान्धा

SF यथा अन्धास्
अपश्यन्तश्चक्षुषा
SF अपश्यन्तस् चक्षुषा
प्राणन्तः प्राणेन
SF प्राणन्तस् प्राणेन
वदन्तो वाचा
SF वदन्तस् वाचा
शृण्वन्तः श्रोत्रेण
SF शृण्वन्तस् श्रोत्रेण
विद्वाꣳसो मनसा
SF विद्वाꣳसस् मनसा
प्रजायमाना रेतसैवमजीविष्मेति ।
SF प्रजायमानास् रेतसा एवम् अजीविष्म इति
प्रविवेश ह चक्षुः ॥ ९ ॥
SF प्रविवेश ह चक्षुस्

मन्त्र १० [VI.i.10]

श्रोत्रꣳ होच्चक्राम ।
SF श्रोत्रम् ह उच्चक्राम
तत्संवत्सरं प्रोष्याऽऽगत्योवाच
SF तद् संवत्सरम् प्रोष्य आगत्य उवाच
कथमशकत मदृते जीवितुमिति ।
SF कथम् अशकत मद् ऋते जीवितुम् इति
ते होचुर्
SF ते ह ऊचुर्
यथा बधिरा
SF यथा बधिरास्
अशृण्वन्तः श्रोत्रेण
SF अशृण्वन्तस् श्रोत्रेण
प्राणन्तः प्राणेन
SF प्राणन्तस् प्राणेन
वदन्तो वाचा
SF वदन्तस् वाचा
पश्यन्तश्चक्षुषा
SF पश्यन्तस् चक्षुषा
विद्वाꣳसो मनसा
SF विद्वाꣳसस् मनसा
प्रजायमाना रेतसैवमजीविष्मेति ।
SF प्रजायमानास् रेतसा एवम् अजीविष्म इति
प्रविवेश ह श्रोत्रम् ॥ १० ॥
SF प्रविवेश ह श्रोत्रम्

मन्त्र ११ [VI.i.11]

मनो होच्चक्राम ।
SF मनस् ह उच्चक्राम
तत्संवत्सरं प्रोष्याऽऽगत्योवाच
SF तद् संवत्सरम् प्रोष्य आगत्य उवाच
कथमशकत मदृते जीवितुमिति ।
SF कथम् अशकत मद् ऋते जीवितुम् इति
ते होचुर्
SF ते ह ऊचुर्
यथा मुग्धा
SF यथा मुग्धास्
अविद्वाꣳसो मनसा
SF अविद्वाꣳसस् मनसा
प्राणन्तः प्राणेन
SF प्राणन्तस् प्राणेन
वदन्तो वाचा
SF वदन्तस् वाचा
पश्यन्तश्चक्षुषा
SF पश्यन्तस् चक्षुषा
शृण्वन्तः श्रोत्रेण
SF शृण्वन्तस् श्रोत्रेण
प्रजायमाना रेतसैवमजीविष्मेति ।
SF प्रजायमानास् रेतसा एवम् अजीविष्म इति
प्रविवेश ह मनः ॥ ११ ॥
SF प्रविवेश ह मनस्

मन्त्र १२ [VI.i.12]

रेतो होच्चक्राम ।
SF रेतस् ह उच्चक्राम
तत्संवत्सरं प्रोष्याऽऽगत्योवाच
SF तद् संवत्सरम् प्रोष्य आगत्य उवाच
कथमशकत मदृते जीवितुमिति ।
SF कथम् अशकत मद् ऋते जीवितुम् इति
ते होचुर्
SF ते ह ऊचुर्
यथा क्लीबा
SF यथा क्लीबास्
अप्रजायमाना रेतसा
SF अप्रजायमानास् रेतासा
प्राणन्तः प्राणेन
SF प्राणन्तस् प्राणेन
वदन्तो वाचा
SF वदन्तस् वाचा
पश्यन्तश्चक्षुषा
SF पश्यन्तस् चक्षुषा
शृण्वन्तः श्रोत्रेण
SF शृण्वन्तस् श्रोत्रेण

विद्वाꣳसो मनसैवमजीविष्मेति ।
 SF विद्वाꣳसस् मनसा एवम् अजीविष्म इति
प्रविवेश ह रेतः ॥ १२ ॥
 SF प्रविवेश ह रेतस्

मन्त्र १३ [VI.i.13]

अथ ह प्राण उत्क्रमिष्यन्
 SF अथ ह प्राणस् उत्क्रमिष्यन्
यथा महासुहयः सैन्धवः पड्वीशशङ्कून्संवृहेद्
 SF यथा महासुहयस् सैन्धवस् पड्वीशषङ्कून्
 संवृहेत्
एवꣳ हैवेमान्प्राणान्संववर्ह ।
 SF एवम् ह एव इमान् प्राणान् संववर्ह
ते होचुर्
 SF ते ह ऊचुर्
मा
 SF मा
भगव
 SF भगवस्
उत्क्रमीर्
 SF उत्क्रमीस्
न वै शक्ष्यामस्त्वदृते जीवितुमिति ।
 SF न वै शक्ष्यामस् त्वद् ऋते जीवितुम् इति
तस्यो मे बलिं कुरुतेति
 SF तस्य उ मे बलिम् कुरुत इति
तथेति ॥ १३ ॥
 SF तथा इति

मन्त्र १४ [VI.i.14]

सा ह वागुवाच
 SF सा ह वाक् उवाच
यद्वा अहं वसिष्ठाऽस्मि
 SF यद् वै अहम् वसिष्ठा अस्मि
त्वं तद्वसिष्ठोऽसीति ।
 SF त्वम् तद् वसिष्ठस् असि इति
यद् वा अहं प्रतिष्ठास्मि
 SF यद् वै अहम् प्रतिष्ठा अस्मि
त्वं तत्प्रतिष्ठोऽसीति चक्षुर्
 SF त्वम् तत् प्रतिष्ठस्  असि इति
यद्वा अहꣳ संपदस्मि
 SF श्रोत्रम् क् इन् फ़िने यद् वै अहम् संपद् अस्मि
त्वं तत् संपदसीति श्रोत्रम् ।
 SF त्वम् तद् संपद् असि इति
यद् वा अहमायतनमस्मि
 SF यद् वै अहम् आयतनम् अस्मि
त्वं तदायतनमसीति मनो
 SF त्वम् तद् आयतनम् असि इति
यद्वा अहं प्रजातिरस्मि
 SF यद् वै अहम् प्रजातिस् अस्मि
त्वं तत् प्रजातिरसीति रेतस्
 SF त्वम् तद् प्रजातिस् असि इति
तस्यो मे किमन्नम्
 SF तस्य उ मे किम् अन्नम्
किं वास इति ।
 SF किम् वासस् इति
यदिदं किञ्चाऽऽश्वभ्य
 SF यद् इदम् किञ्च आ श्वभ्यस्
आ कृमिभ्य
 SF अ क्रिमिभ्यस् कृमिभ्यस्
आ कीटपतङ्गेभ्यस्
 SF अ कीटपतङ्गेभ्यः
तत्तेऽन्नम्
 SF तद् ते अन्नम्
आपो वास इति ।
 SF अपस् वासस् इति
न ह वा अस्यानन्नं जग्धं भवति
 SF न ह वै अस्य अनन्नम् जग्धम् भवति
नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद ।
 SF न अनन्नम् प्रतिगृहीतम् यस् एवम् एतद् अनस्य
 अन्नम् वेद
तद् विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्य्
 SF तद् विद्वाꣳसस् श्रोत्रियास् अशिष्यन्तस् आचामन्ति
अशित्वाऽऽचामन्त्य्
 SF अशित्वा आचामन्ति
एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥ इति प्रथमं ब्राह्मणम् ॥
 SF एतम् एव तद् अन्नम् अनग्नम् कुर्वन्तस् मन्यन्ते

द्वितीयं ब्राह्मण्

मन्त्र १ [VI.ii.1]

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम ।
 SF ह्वेतकेतुस् हk OM. वै अरुणेयस् पन्चालानाम्
 परिषदम् आजगाम
स आजगाम जैवलिं प्रवाहणं परिचारयमाणं ।
 SF सस् आजगाम जैवलम् प्रवाहणम् परिचारयमाणम्
तमुदीक्ष्याभ्युवाद
 SF तम् उदीक्ष्य अभ्युवाद

कुमारा३ इति ।
SF कुमार इति
स भोः ३ इति प्रतिशुश्राव
SF स भोस् इति प्रतिशुश्राव
अनुशिष्टोऽन्वसि पित्रेत्य्
SF अनुशिष्टस् नु असि पित्रा इति
ओमिति होवाच ॥१ ॥
SF ओम् इति ह उवाच

मन्त्र २ [VI.ii.2]

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता३ इति ।
SF वेत्थ यथा इमास् प्रजास् प्रयत्यस् विप्रतिपद्यन्ते इति
नेति होवाच ।
SF न इति ह उवाच
वेत्थो यथेमं लोकं पुनरापद्यन्ता३ इति ।
SF वेत्थ वेत्थ उ यथा इमम् लोकम् पुनरापद्यन्ते इति
नेति हैवोवाच ।
SF न इति ह एव उवाच
वेत्थो यथाऽसौ लोक एवं बहुभिः पुनःपुनः प्रयद्भिर्न संपूर्यता३ इति
SF वेत्थ वेत्थ उ यथा असौ लोकस् एवम् बहुभिस् पुनः पुनर् प्रयद्भिस् न संपूर्यते इति
नेति हैवोवाच ।
SF न इति ह एव उवाच
वेत्थो यतिथ्यामाहुत्याꣳ हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति ।
SF वेत्थ वेत्थ उ यतिथ्याम् आहुत्याम् हुतायाम् आपस् पुरुषवाचस् भूत्वा समुत्थाय वदन्ति इति
नेति हैवोवाच ।
SF न इति ह एव उवाच
वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा
SF वेत्थ उ देवयानस्य वा पथस् प्रतिपदम् पितृयाणस्य वा
यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वा
SF यद् कृत्वा देवयानम् वा पन्थानम् प्रतिपद्यन्ते पितृयाणम् वा
ऽपि हि न ऋषेर्वचः श्रुतम्
SF अपि हि नस् ऋषेस् वचस् श्रुतम्
द्वे सृती अशृणवं पितृणाम्
SF द्वे सृती अशृणवम् पित्र्णाम्
अहं देवानामुत मर्त्यानाम्
SF अहम् देवानाम् उत मर्त्यानाम्
ताभ्यामिदं विश्वमेजत्समेति
SF ताभ्याम् इदम् विश्वम् एजत् समेति
यदन्तरा पितरं मातरं चेति ।
SF यद् अन्तरा पितरम् मातरम् च इति

नाहमत एकं चन वेदेति होवाच ॥२ ॥
SF न अहम् अतस् एकम् चन वेद इति ह उवाच

मन्त्र ३ [VI.ii.3]

अथैनं वसत्योपमन्त्रयां चक्रे
SF अथ हk OM. एनम् वसत्या उपमन्त्रयाम् चक्रे
ऽनादृत्य वसतिं कुमारः प्रदुद्राव ।
SF अनादृत्य वसतिम् कुमारस् प्रदुद्राव
स आजगाम पितरम्
SF सस् आजगाम पितरम्
तꣳ होवाचेति वाव किल नो भवान्पुराऽनुशिष्टानवोच इति ।
SF तम् ह उवाच इति वाव किल नस् भवान् पुरा अनुशिष्टान् अवोचस् इति
कथꣳ,
SF कथम्
सुमेध इति ।
SF सुमेधस् इति
पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्
SF पञ्च मा प्रश्नान् राजन्यबन्धुस् अप्राक्षीत्
ततो नैकञ्चन वेदेति ।
SF ततस् न एकम् चन वेद इति ह उवाचk OM. ह उवाच
कतमे त इति
SF कतमे ते इति
इम इति ह प्रतीकान्युदाजहार ॥३ ॥
SF इमे इति ह प्रतीकानि उदाजहार

मन्त्र ४ [VI.ii.4]

स होवाच
SF स ह उवाच
तथा नस्त्वम्
SF तथा नस् त्वम्
तात
SF तत
जानीथा यथा
SF जानीथास् यथा
यदहं किंच वेद
SF यद् अहम् किंच वेद
सर्वमहं तत्तुभमवोचं ।
SF सर्वम् अहम् तद् तुभम् अवोचम्
प्रेहि तु
SF प्रेहि तु
तत्र प्रतीत्य
SF तत्र प्रतीत्य
ब्रह्मचर्यं वत्स्याव इति ।

 SF ब्रह्मचर्यम् वत्स्यावस् इति
भवानेव गच्छत्विति ।
 SF भवान् एव गच्छतु इति
स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास ।
 SF सस् आजगाम गौतमस् यत्र प्रवाहणस्य जैवलेस् आस
तस्मा आसनमाहृत्योदकमहारयां चकाराथ हास्मा
अर्घ्यं चकार ।
 SF तस्मै आसनम् अहार्यk अहृत्य उदकम् आहारयाम्
 चकार अथ ह अस्मै अर्घम् k अर्घ्यम् चकार
तꣳ होवाच
 SF तम् ह उवाच
वरं भगवते गौतमाय दद्म इति ॥४ ॥
 SF वरम् भवतेk bhagavate गौतमाय दद्मस् इति

मन्त्र ५ [VI.ii.5]

स होवाच
 SF स ह उवाच
प्रतिज्ञातो म एष वरो
 SF प्रतिज्ञतस् मे एष वरस्
यां तु कुमारस्यान्ते वाचमभाषथास्
 SF याम् तु कुमारस्य अन्ते वाचम् अभाषथाः
तां मे ब्रूहीति ॥५ ॥
 SF ताम् मे ब्रूहि इति

मन्त्र ६ [VI.ii.6]

स होवाच
 SF स ह उवाच
दैवेषु वै
 SF दैवेषु वै
गौतम
 SF गौतम
तद्वरेषु
 SF तद् वरेषु
मानुषाणां ब्रूहीति ॥६ ॥
 SF मानुषाणाम् ब्रूहि इति

मन्त्र ७ [VI.ii.7]

स होवाच
 SF स ह उवाच
विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां
परिधानस्य
 SF विज्ञायते ह अस्ति हिरण्यस्य अपात्तम् गोअश्वानाम्
 दासीनाम् प्रवाराणाम् परिधानानाम्
मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति ।
 SF मा नस् भवान् बहोस् अनन्तस्य अपर्यन्तस्य
 अभ्यवदान्यस् भूत् इति
स वै
 SF स वै
गौतम
 SF गौतम
तीर्थेनेच्छासा इत्
 SF तीर्थेन इच्छसै इति
उपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति ।
 SF उपैमि अहम् भवन्तम् इति वाचा ह स्म एव पूर्वे उपयन्ति
स होपायनकीर्त्योवास ॥७ ॥
 SF स ह उपायनकीर्तौ उवाच सस् उपायनकीर्त्या उवास

मन्त्र ८ [VI.ii.8]

स होवाच
 SF
तथा नस्त्वम्
 SF तथा नस् त्वम्
गौतम
 SF गौतम
माऽपराधास्तव च पितामहा
 SF मा अपराधास् अपराधस् तव च पितामहास्
यथेयं विद्येतः पूर्वं न कस्मिꣳश्चन ब्राह्मण उवास
 SF यथा इयम् विद्या इतस् पूर्वम् न कस्मिन् चन
 ब्राह्मनस् उवास
तां त्वहं तुभ्यं वक्ष्यामि
 SF ताम् तु अहम् तुभ्यम् वक्ष्यामि
को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥८ ॥
 SF कस् हि त्वा एवम् ब्रुवन्तम् अर्हति प्रत्याख्यातुम् इति

मन्त्र ९ [VI.ii.9]

असौ वै लोकोऽग्निर्
 SF असौ वै लोकस् अग्निस्
गौतम ।
 SF गौतम
तस्याऽऽदित्य एव समिद्
 SF तस्य आदित्यस् एव समिद्
रश्मयो धूमो
 SF रश्मयस् धूमस्
ऽहरर्चिर्
 SF अहरर्चिस्
दिशोऽङ्गारा
 SF चन्द्रमास् दिशस् अङ्गारास्

अवान्तरदिशो विस्फुलिङ्गास्
 SF नक्षत्राणि अवान्तरदिशस् विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति
 SF तस्मिन् एतस्मिन् अग्नौ देवास् श्रद्धाम् जुह्वति
तस्या आहुत्यै सोमो राजा संभवति ॥९ ॥
 SF तस्यै आहुतेस् सोमस् राजा संभवति

मन्त्र १० [VI.ii.10]

पर्जन्यो वा अग्निर्
 SF पर्जन्यस् वै अग्निस्
गौतम ।
 SF गौतम
तस्य संवत्सर एव समिद्
 SF तस्य संवत्सरस् एव समिद्
अभ्राणि धूमो
 SF अभ्राणि धूमस्
विद्युदर्चिर्
 SF विद्युत् अर्चिस्
अशनिरङ्गारा
 SF अशनिस् अङ्गारास्
ह्रादुनयो विस्फुलिङ्गास्
 SF ह्रादुनयस् विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति
 SF तस्मिन् एतस्मिन् अग्नौ देवास् सोमम्k add. mark 1
 राजानम् जुह्वति
तस्या आहुत्यै वृष्टिः संभवति ॥१० ॥
 SF तस्यै आहुतेस् वृष्टिस् संभवति

मन्त्र ११ [VI.ii.11]

अयं वै लोकोऽग्निर्
 SF अयम् वै लोकस् अग्निस्
गौतम ।
 SF गौतम
तस्य पृथिव्येव समिद्
 SF तस्य पृथिवी एव समिद्
अग्निर्धूमो
 SF वायुस् अग्निस् धूमस्
रात्रिरर्चिश्
 SF रात्रिस् अर्चिः
चन्द्रमा अङ्गारा
 SF दिशस् चन्द्रमास् अङ्गारास्
नक्षत्राणि विष्फुलिङ्गास्
 SF अवन्तरदिशस्nakshatrANi विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति
 SF तस्मिन् एतस्मिन् अग्नौ देवास् वृष्टिम् जुह्वति
तस्या आहुत्या अन्नꣳ संभवति ॥११ ॥
 SF तस्यै आहुतेस् अन्नम् संभवति

मन्त्र १२ [VI.ii.12]

पुरुषो वा अग्निर्
 SF पुरुषस् वै अग्निस्
गौतम ।
 SF गौतम
तस्य व्यात्तमेव समित्
 SF तस्य व्यात्तम् एव समित्
प्राणो धूमो
 SF प्राणस् धूमस्
वागर्चिश्
 SF वाक् अर्चिस्
चक्षुरङ्गाराः
 SF चक्षुस् अङ्गारास्
श्रोत्रं विस्फुलिङ्गास्
 SF श्रोत्रम् विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति
 SF तस्मिन् एतस्मिन् अग्नौ देवास् अन्नम् जुह्वति
तस्या आहुत्यै रेतः संभवति ॥१२ ॥
 SF तस्यै आहुतेस् रेतस् संभवति

मन्त्र १३ [VI.ii.13]

योषा वा आग्निर्
 SF योषा वै आग्निस्
गौतम ।
 SF गौतम
तस्या उपस्थ एव समिल्
 SF तस्यै उपस्थस् एव समिद्
लोमानि धूमो
 SF लोमानि धूमस्
योनिरर्चिर्
 SF योनिस् अर्चिस्
यदन्तः करोति
 SF यद् अन्तर् करोति
तेऽङ्गारा
 SF ते अङ्गारास्
अभिनन्दा विस्फुलिङ्गास्
 SF अभिनन्दा विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति
 SF तस्मिन् एतस्मिन् अग्नौ देवास् रेतस् जुह्वति
तस्या आहुत्यै पुरुषः संभवति ।

SF तस्यै आहुतेस् पुरुषस् संभवति
स जीवति यावज्जीवत्य्
SF स जीवति यावत् जीवति
अथ यदा म्रियते ।१३ ॥
SF अथ यदा म्रियते

मन्त्र १४ [VI.ii.14]

अथैनमग्नये हरन्ति ।
SF अथ एनम् अग्नये हरन्ति
तस्याग्निरेवाग्निर्भवति
SF तस्य अग्निस् एव अग्निस् भवति
समित्समिद्
SF समिद् समिद्
धूमो धूमो
SF धूमस् धूमस्
ऽर्चिरर्चिर्
SF अर्चिस् अर्चिस्
अङ्गारा अङ्गारा
SF अङ्गारास् अङ्गारास्
विस्फुलिङ्गा विस्फुलिङ्गास्
SF विष्फुलिङ्गास् विष्फुलिङ्गाः
तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति
SF तस्मिन् एतस्मिन् अग्नौ देवास् पुरुषम् जुह्वति
तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥१४ ॥
SF तस्यै आहुतेस् पुरुषस् भास्वरवर्णस् संभवति

मन्त्र १५ [VI.ii.15]

ते य एवमेतद्विदुर्
SF ते ये एवम् एतद् विदुः
ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते
SF ये च अमी अरण्ये श्रद्धाम् सत्यम् उपासते
तेऽर्चिरभिसंभवन्त्य्
SF ते अर्चिस् अभिसंभवन्ति
अर्चिषोऽह्नो
SF अर्चिषस् अहः
ऽह्न आपूर्यमाणपक्षम्
SF अह्नस् आपूर्यमाणपक्षम्
आपूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति
SF अपूर्यमाणपक्षाद् यान् षट् मासान् उदङ् आदित्यस् एति
मासेभ्यो देवलोकम्
SF मासेभ्यस् देवलोकम्
देवलोकादादित्यम्
SF देवलोकाद् आदित्यम्
आदित्याद्वैद्युतम्
SF आदित्याद् वैद्युतम्
तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्
गमयति
SF तान् वैद्युताद् वैद्युतान् पुरुषस् मानसस् एत्य
ब्रह्मलोकान् गमयति
ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति ।
SF ते तेषु ब्रह्मलोकेषु परास् परावतस् वसन्ति
तेषां न पुनरावृत्तिः ।
SF तेषाम् इह्k OM न पुनरावृत्तिस् अस्तिk OM

मन्त्र १६ [VI.ii.16]

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति
SF अथ ये यज्ञेन दानेन तपसा लोकम् लोकान् जयन्ति
ते धूममभिसंभवन्ति
SF ते धूमम् अभिसंभवन्ति
धूमाद्रात्रिꣳ,
SF धूमाद् रात्रिम्
रात्रेरपक्षीयमाणपक्षम्
SF रात्रेस् अपक्षीयमाणपक्षम्
अपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति
SF अपक्षीयमाणपक्षाद् यान् षट् मासान् दक्षिणा आदित्यस् एति
मासेभ्यः पितृलोकम्
SF मासेभ्यस् पितृलोकम्
पितृलोकाच्चन्द्रम्
SF पितृलोकाद् चन्द्रम्
ते चन्द्रं प्राप्यान्नं भवन्ति
SF ते चन्द्रम् प्राप्य अन्नम् भवन्ति
ताꣳस्तत्र देवा यथा सोमꣳ राजानम्
SF तान् तत्र देवास् यथा सोमम् राजानम्
आप्यायस्व
SF अप्यायस्व
अपक्षीयस्वेत्य्
SF अपक्षीयस्व इति
एवमेनाꣳस्तत्र भक्षयन्ति ।
SF एवम् एनान् तत्र भक्षयन्ति
तेषां यदा तत्पर्यवैत्य्
SF तेषाम् यदा तद् पर्यवैति
अथेममेवाऽऽकाशमभिनिष्पद्यन्ते
SF अथ इमम् एव आकाशम् अभिनिष्पद्यन्ते
आकाशाद्वायुम्
SF अकाशाद् वायुम्
वायोर्वृष्टिम्
SF वायोस् वृष्टिम्
वृष्टेः पृथिवीम्
SF वृष्टेस् पृथिवीम्

ते पृथिवीं प्राप्यान्नं भवन्ति
 SF ते पृथिवीम् प्राप्य अन्नम् भवन्ति
ते पुनः पुरुषाग्नौ हूयन्ते
 SF k add. mark 1 ते पुनर् पुरुषाग्नौ हूयन्ते
ततो योषाग्नौ जायन्ते
 SF ततस् योषाग्नौ जायन्ते
ते लोकान्प्रत्युथायिनस्त एवमेवानुपरिवर्तन्ते
 SF लोकान्नत्युथायिनस् ते एवम् एव अनुपरिवर्तन्ते
ऽथ य एतौ पन्थानौ न विदुस्
 SF अथ यस् एतौ पन्थानौ न विदुर्
ते कीटाः
 SF ते कीटास्
पतङ्गा
 SF पतङ्गास्
यदिदं दन्दशूकम् ॥१६ ॥ इति द्वितीयं ब्राह्मणम् ॥
 SF यद् इदम् दन्दशूकम्

तृतीयं ब्राह्मणम्

मन्त्र १ [VI.iii.1]

स यः कामयते
 SF स यस् कामयते
महत्प्राप्नुयामित्य्
 SF महत् प्राप्नुयाम् इति
उदगयन आपूर्यमाणपक्षस्य पुण्याहे
 SF उदगयने अपूर्यमाणपक्षे अपूर्यमाणपक्षस्य पुण्याहे
द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा
सर्वौषधं फलानीति संभृत्य
 SF द्वादशाहम् उपसद्व्रती भूत्वा औदुम्बरे कꣳसे चमसे
 वा सर्वौषधम् फलानि इति संभृत्य
परिसमुह्य
 SF परिसमुह्य
परिलिप्याग्निमुपसमाधाय
परिस्तीर्याऽऽवृताऽऽज्यꣳ सꣳस्कृत्य
 SF परिलिप्य अग्निम् उपसमाधायk add. mark 1 परिस्तीर्य
 अवृता आज्यम् सꣳस्कृत्य
पुꣳसा नक्षत्रेण मन्थꣳ संनीय
 SF पुꣳसा नक्षत्रेण मन्थम् संनीय
जुहोति ।
 SF जुहोति
यावन्तो देवास्त्वयि
 SF यावन्तस् देवास् त्वयि
जातवेदस्
 SF जातवेदः

तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्
 SF तिर्यञ्चस् घ्नन्ति पुरुषस्य कामान्
तेभ्योऽहं भागधेयं जुहोमि
 SF तेभ्यस् अहम् भागधेयम् जुहोमि
ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु
 SF ते मा तृप्तास्k add. mark 1 सर्वैस् कामैस्
 तर्पयन्तु
स्वाहा ।
 SF स्वाहा
या तिरश्ची निपद्यते
 SF या तिरश्ची निपद्यसे
ऽहं विधरणी इति
 SF अहम् विधरणी इति
तां त्वा घृतस्य धारया
 SF ताम् त्वा घृतस्य धारया
यजे सꣳराधनीमहꣳ ।
 SF यजे सꣳराधनीम् अहम्
स्वाहा ॥१ ॥
 SF स्वाहा

मन्त्र २ [VI.iii.2]

ज्येष्ठाय स्वाहा
 SF ज्येष्ठाय स्वाहा
श्रेष्ठाय स्वाहेत्य्
 SF श्रेष्ठाय स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
प्राणाय स्वाहा
 SF प्राणाय स्वाहा
वसिष्ठायै स्वाहेत्य्
 SF वसिष्ठायै स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
वाचे स्वाहा
 SF वाचे स्वाहा
प्रतिष्ठायै स्वाहेत्य्
 SF प्रतिष्ठायै स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति

चक्षुषे स्वाहा
 SF चक्षुषे स्वाहा
संपदे स्वाहेति
 SF संपदे स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्य्
 SF श्रोत्राय स्वाहा आयतनाय स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
मनसे स्वाहा
 SF मनसे स्वाहा
प्रजात्यै स्वाहेत्य्
 SF प्रजात्यै स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
रेतसे स्वाहेति
 SF रेतसे स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ॥ २ ॥
 SF मन्थे सꣳस्रवम् अवनयति

मन्त्र ३ [VI.iii.3]

अग्नये स्वाहेत्य्
 SF अग्नये स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
सोमाय स्वाहेत्य्
 SF सोमाय स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
भूः स्वाहेत्य्
 SF भूस् स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
भुवः स्वाहेत्य्
 SF भुवस् स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
स्वः स्वाहेत्य्
 SF स्वर् स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
भूर्भुवः स्वः स्वाहेत्य्
 SF भूस् भुवस् स्वर् स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
ब्रह्मणे स्वाहेत्य्
 SF ब्रह्मणे स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
क्षत्राय स्वाहेत्य्
 SF क्षत्राय स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
भूताय स्वाहेत्य्
 SF भूताय स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
भविष्यते स्वाहेत्य्
 SF भविष्यते स्वाहा इति
अग्नौ हुत्वा
 SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
 SF मन्थे सꣳस्रवम् अवनयति
विश्वाय स्वाहेत्य्

SF विश्वाय स्वाहा इति
अग्नौ हुत्वा
SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
SF मन्थे सꣳस्रवम् अवनयति
सर्वाय स्वाहेत्य्
SF सर्वाय स्वाहा इति
अग्नौ हुत्वा
SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ।
SF मन्थे सꣳस्रवम् अवनयति
प्रजापतये स्वाहेत्य्
SF प्रजापतये स्वाहा इति
अग्नौ हुत्वा
SF अग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ॥ ३ ॥
SF मन्थे सꣳस्रवम् अवनयति

मन्त्र ४ [VI.ii.4]

अथैनमभिमृशति
SF अथ एनम् अभिमृशति
भ्रमदसि
SF भ्रम् भ्रमत् असि
ज्वलदसि
SF ज्वलत् असि
पूर्णमसि
SF पूर्णम् असि
प्रस्तब्धमस्य्
SF प्रस्तब्धम् असि
एकसभमसि
SF एकसभम् असि
हिङ्कृतमसि
SF हिङ्कृतम् असि
हिङ्क्रियमाणमस्य्
SF हिङ्क्रियमानम् असि
उद्गीथमस्य्
SF उद्गीथम् असि
उद्गीयमानमसि
SF उद्गीयमानम् असि
श्रावितमसि
SF श्रावितम् असि
प्रत्याश्रावितमस्य्
SF प्रत्याश्रावितम् असि
अर्द्रे संदीप्तमसि
SF अर्द्रे संदीप्तम् असि

विभूरसि
SF विभूस् असि
प्रभूरस्य्
SF प्रभूस् असि
अन्नमसि ज्योतिरसि
sN k variato ordineH अन्नम् असि ज्योतिस् असि
निधनमसि
SF निधनम् असि
संवर्गोऽसीति ॥ ४ ॥
SF संवर्गस् असि इति

मन्त्र ५ [VI.iii.5]

अथैनमुद्यच्छत्य्
SF अथ एनम् उद्यच्छति
अमꣳस्य्
SF अमस् असि अमꣳसि
आमꣳ हि ते महि ।
SF अमम् हि ते मयि महि
स हि राजेशानोऽधिपतिः
SF स हि राजा ईशानस् अधिपतिस्
स माꣳ राजेशनोऽधिपतिं करोत्विति ॥ ५ ॥
SF स माम् राजा ईशनस् अधिपतिम् करोतु इति

मन्त्र ६ [Vi.iii.6]

अथैनमाचामति
SF अथ एनम् आचामति
तत्सवितुर्वरेण्यम् ।
SF तद् शवितुर्वरेण्यम्
मधु वाता ऋतायते
SF मधु वातास् ऋतायते
मधु क्षरन्ति सिन्धवः ।
SF मधु क्षरन्ति सिन्धवस्
माध्वीर्नः सन्त्वोषधीः ।
SF माध्वीस् नस् सन्तु ओषधीस्
भूः स्वाहा ।
SF भूस् स्वाहा
भर्गो देवस्य धीमहि
SF भर्गस् देवस्य धीमहि
मधु नक्तमुतोषसो
SF मधु नक्तम् उत उषसस्
मधुमत्पार्थिवꣳ रजः ।
SF मधुमत् पार्थिवम् रजस्
मधु द्यौरस्तु नः पिता ।
SF मधु द्यौस् अस्तु नस् पिता

भुवः स्वाहा ।
 SF भुवस् स्वाहा
धियो यो नः प्रचोदयात् ।
 SF धियस् यस् नस् प्रचोदयात्
मधुमान्नो वनस्पतिर्
 SF मधुमान् नस् वनस्पतिस्
मधुमाꣳ अस्तु सूर्यः ।
 SF मधुमान् अस्तु सूर्यस्
माध्वीर्गावो भवन्तु नः ।
 SF माध्वीस् गवस् भवन्तु नस्
स्वः स्वाहेति ।
 SF स्वर् स्वाहा इति
सर्वां च सावित्रीमन्वाह
 SF सर्वाम् च सावित्रीम् अन्वाह
सर्वाश्च मधुमतीर्
 SF सर्वास् च मधुमतीस् सर्वास् च व्याहृतीस्k
 OM. सर्वास्
अहमेवेदꣳ सर्वं भूयासं ।
 SF अहम् एव इदम् सर्वम् भूयासम्
भूर्भुवः स्वः स्वाहेत्य्
 SF भूस् भुवस् स्वर् स्वाहा इति
अन्तत आचम्य
 SF अन्ततस् आचम्य
पाणी प्रक्षाल्य
 SF प्रक्षाल्य पाणी पाणी प्रक्षाल्य
जघनेनाग्निं प्राक्शिराः संविशति ।
 SF जघनेन अग्निम् प्राक्शिरास् संविशति
प्रातरादित्यमुपतिष्ठते
 SF प्रातरादित्यम् उपतिष्ठते
दिशामेकपुण्डरीकमसि
 SF दिशाम् एकपुण्डरीकम् असि
अहं मनुष्याणामेकपुण्डरीकं भूयासमिति ।
 SF अहम् मनुष्याणाम् एकपुण्डरीकम् भूयासम् इति
यथेतमेत्य
 SF यथा इतम् एत्य
जघनेनाग्निमासीनो वꣳशं जपति ॥ ६ ॥
 SF जघनेन अग्निम् आसीनस् वꣳशम् जपति

मन्त्र ७ [VI.iii.7]

तꣳ हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्
 SF तम् ह एतम् ऊद्दालकस् आरुणिस् वाजसनेयाय
 याज्ञवल्क्याय अन्तेवासिने उक्त्वा उवाच अपि यस् एनम्
शुष्के
 स्थाणौ निषिञ्चेत्
जायेरञ्छाखाः
 SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ॥ ७ ॥
 SF प्ररोहेयुर् पलाशानि इति

मन्त्र ८ [VI.iii.8]

एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्
 SF एतम् उ ह एव वाजसनेयस् याज्नवल्क्यस् मधुकाय
 पैङ्ग्याय अन्तेवासिने उक्त्वा उवाच अपि यस् एनम् शुष्के
स्थाणौ
 निषिञ्चेत्
जायेरञ्छाखाः
 SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ॥ ८ ॥
 SF प्ररोहेयुर् पलाशानि इति

मन्त्र ९ [VI.iii.9]

एतमु हैव मधुकः पैङ्ग्यश्चूलाय
भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ
निषिञ्चेज्
 SF एतम् उ ह एव मधुकस् पैङ्ग्यस् चूडाय चूलाय
 भागवित्तये अन्तेवासिने उक्त्वा उवाच अपि यस् एनम् शुष्के
 स्थाणौ निषिञ्चेत्
जायेरञ्छाखाः
 SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ॥ ९ ॥
 SF प्ररोहेयुर् पलाशानि इति

मन्त्र १० [VI.iii.10]

एतमु हैव चूलो भागवित्तिर्जानकय आयस्थूणायान्तेवासिन
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ
निषिञ्चेज्
 SF एतम् उ ह एव चूडस्k चूलस् भागवित्तिस् जानकये
 अयस्थूणाय k अयःस्थूणाय अन्तेवासिने उक्त्वा उवाच अपि
यस्
 एनम् शुष्के स्थाणौ निषिञ्चेत्
जायेरञ्छाखाः
 SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ॥ १० ॥
 SF प्ररोहेयुर् पलाशानि इति

मन्त्र ११ [VI.iii.11]

एतमु हैव जानकिरयस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्
SF एतम् उ ह एव जानकिस् अयस्थूणस् अयःस्थूणस् शत्यकामाय जाबालाय अन्तेवासिने उक्त्वा उवाच अपि यस् एनम् शुष्के स्थाणौ निषिञ्चेत्
जायेरञ्छाखाः
SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ॥११ ॥
SF प्ररोहेयुर् पलाशानि इति

मन्त्र १२ [VI.iii.12]

एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्
SF एतम् उ ह एव शत्यकामस् जाबालस् अन्तेवासिभ्यस् उक्त्वा उवाच अपि यस् एनम् शुष्के स्थाणौ निषिञ्चेत्
जायेरञ्छाखाः
SF जायेरन् शाखास्
प्ररोहेयुः पलाशानीति ।
SF प्ररोहेयुर् पलाशानि इति
तमेतं नापुत्राय वाऽनन्तेवासिने वा ब्रूयात् ॥१२ ॥
SF तम् एतम् न अपुत्राय वा अनन्तेवासिने वा ब्रूयात्

मन्त्र १३ [VI.iii.13]

चतुरौदुम्बरो भवत्य्
SF चतुरौदुम्बरस् भवति
औदुम्बरः स्रुव
SF औदुम्बरस् स्रुवस्
औदुम्बरश्चमस
SF औदुम्बरस् चमसस्
औदुम्बर इध्म
SF औदुम्बरस् इध्मस्
औदुम्बर्या उपमन्थन्यौ ।
SF औदुम्बर्यास् उपमन्थन्यौ
दश ग्राम्याणि धान्यानि भवन्ति
SF दश ग्राम्याणि धान्यानि भवन्ति
व्रीहियवास्तिलमाषा अणुप्रियंगवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च
SF व्रीहियवास् तिलमाषास् अणुप्रियंगवस् गोधूमास् च मसूरास् च खल्वास् च खलकुलास् च
तान्पिष्टान्दधनि मधुनि घृत उपसिञ्चत्य्
SF तान् सार्धम् पिष्ट्वा दध्ना मधुना घृतेन उपसिञ्चति तान् पिष्टान् दधनि मधुनि घृते उपसिञ्चति
आज्यस्य जुहोति ॥१३ ॥ इति तृतीयं ब्राह्मणम् ॥
SF अज्यस्य जुहोति

चतुर्थं ब्राह्मणम्

मन्त्र १ [VI.iv.1]

एषां वै भूतानां पृथिवी रसः
SF एषाम् वै भूतानाम् पृथिवी रसस्
पृथिव्या आपो
SF पृथिव्यास् आपस्
ऽपामोषधय
SF अपाम् ओषधयस्
ओषधीनां पुष्पाणि
SF ओषधीनाम् पुष्पाणि
पुष्पाणां फलानि
SF पुष्पाणाम् फलानि
फलानां पुरुषः
SF फलानाम् पुरुषस्
पुरुषस्य रेतः ॥१ ॥
SF पुरुषस्य रेतस्

मन्त्र २ [VI.iv.2]

स ह प्रजापतिरीक्षांचक्रे
SF स ह प्रजापतिस् ईक्षाम् चक्रे
हन्तास्मै प्रतिष्ठां कल्पयानीति
SF हन्त अस्मै प्रतिष्ठाम् कल्पयानि इति
स स्त्रियꣳ ससृजे ।
SF स स्त्रियम् ससृजे
ताꣳ सृष्ट्वाऽध उपास्त
SF ताम् सृष्ट्वा अधस् उपास्त
तस्मात्स्त्रियमध उपासीत
SF तस्माद् स्त्रियम् अधस् उपासीत
स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्
SF स एतम् प्राञ्चम् ग्रावाणम् आत्मने एव समुदपारयद्
तेनैनामभ्यसृजत् ॥२ ॥
SF तेन एनाम् अभ्यसृजत

मन्त्र ३ [VI.iv.3]

तस्या वेदिरुपस्थो
SF तस्यास् वेदिस् उपस्थस्
लोमानि बर्हिश्
SF लोमानि बर्हिस्

चर्माधिषवणे
 SF चर्म अधिषवणे
समिद्धो मध्यतस्तौ मुष्कौ ।
 SF समिद्धस् मध्यतस् तौ मुष्कौ
स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति
 SF स यावान् ह वै वाजपेयेन यजमनस्य लोकस् भवति
तावानस्य लोको भवति
 SF तावान् अस्य लोकस् भवति
य एवं विद्वानधोपहासं चरत्य्
 SF यस् एवम् विद्वान् अधोपहासम् चरति
आसाꣳ स्त्रीणाꣳ सुकृतं वृङ्क्ते
 SF अ स अ आसाम् स्त्रीणाम् सुकृतम् वृङ्क्ते
ऽथ य इदमविद्वानधोपहासं चरत्य्
 SF अथ यस् इदम् अविद्वानधोपहासम् चरति
आऽस्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥
 SF अ अस्य स्त्रियस् सुकृतम् वृञ्जते

मन्त्र ४ [VI.iv.4]

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म
वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै
तद्विद्वान् कुमारहारित आह
 SF एतद् ध स्म वै तद् विद्वान् ऊद्दालकस् आरुनिस् आह
  एतद् ध स्म वै तद् विद्वान् नाकस् मौद्गल्यस् आह
एतद् ध
  स्म वै तद् विद्वान् कुमारहारितस् आह
बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति
 SF बहवस् मर्यास् ब्राह्मनायनास् निरिन्द्रियास्
  विसुकृतस् अस्माद् लोकाद् प्रयन्ति
य इदमविद्वाꣳसोऽधोपहासं चरन्तीति ।
 SF ये इदम् अविद्वाꣳसस् अधोपहासम् चरन्ति इति
बहु वा इदꣳ सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥
 SF बहु वै इदम् सुप्तस्य वा जाग्रतस् वा रेतस् स्कन्दति

मन्त्र ५ [VI.iv.5]

तदभिमृशेद्
 SF तद् अभिमृशेत्
अनु वा मन्त्रयेत
 SF अनु वा मन्त्रयेत
यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्
 SF यद् मे अद्य रेतस् पृथिवीम् अस्कान्त्सीत्
यदोषधीरप्यसरद्
 SF यद् ओषधीस् अपि असरत्
यदपः ।
 SF यद् अपस्
इदमहं तद्रेत आददे
 SF इदम् अहम् तद् रेतस् आददे
पुनर्मामैत्विन्द्रियम्
 SF पुनर्माम् ऐतु इन्द्रियम्
पुनस्तेजः
 SF पुनर् तेजस्
पुनर्भगः ।
 SF पुनर्भगस्
पुनरग्निर्धिष्ण्या
 SF पुनरग्नयस् धिष्ण्यास्
यथास्थानं कल्पन्तामित्य्
 SF यथास्थानम् कल्पन्ताम् इति
अनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात्
॥ ५ ॥
 SF अनामिकाङ्गुष्ठाभ्याम् आदाय अन्तरेण स्तनौ वा भ्रुवौ वा
  निमृज्यात्

मन्त्र ६ [VI.iv.6]

अथ यद्युदक आत्मानं पश्येत्
 SF अथ यदि उदके आत्मानम् पश्येत्
तदभिमन्त्रयेत
 SF तद् अभिमन्त्रयेत
मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति ।
 SF मयि तेजस् इन्द्रियम् यशस् द्रविणम् सुकृतम् इति
श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्
 SF श्रीस् ह वै एषा स्त्रीणाम् यद् मलोद्वासाः
तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६ ॥
 SF तस्माद् मलोद्वाससम् यशस्विनीम् अभिक्रम्य उपमन्त्रयेत

मन्त्र ७ [VI.iv.7]

सा चेदस्मै न दद्यात्
 SF सा चेद् अस्मै न दद्यात्
काममेनामवक्रिणीयात्
 SF कामम् एनाम् अपक्रिणीयात् अवक्रिणीयात्
सा चेदस्मै नैव दद्यात्
 SF सा चेद् अस्मै न एव दद्यात्
काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेद्
 SF कामम् एनाम् यष्ट्या वा पाणिना वा उपहत्य अतिक्रामेत्
इन्द्रियेण ते यशसा यश आदद
 SF इन्द्रियेन ते यशसा यशस् आददे
इत्य्
 SF इति
अयशा एव भवति ॥ ७ ॥
 SF अयशास् एव भवति

मन्त्र ८ [VI.iv.8]

सा चेदस्मै दद्याद्
 SF सा चेद् अस्मै दद्यात्
इन्द्रियेण ते यशसा यश आदधामीति
 SF इन्द्रियेण ते यशसा यशस् आदधामि इति
यशस्विनावेव भवतः ॥ ८ ॥
 SF यशस्विनौ एव भवतः

मन्त्र ९ [VI.iv.9]

स यामिच्छेत्
 SF स याम् इच्छेत्
कामयेत मेति
 SF कामयेत मा इति
तस्यामर्थं निष्ठाय
 SF तस्याम् अर्थम् निष्ठाप्य निष्ठाय
मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य
 SF मुखेन मुखम् संधाय उपस्थम् अस्यास् अभिमृश्य
जपेद्
 SF जपेत्
अङ्गादङ्गात्संभवसि
 SF अङ्गाद् अङ्गाद् संभवसि
हृदयादधिजायसे ।
 SF हृदयाद् अधिजायसे
स त्वमङ्गकषायोऽसि
 SF स त्वम् अङ्गकषायस् असि
दिग्धविद्धमिव मादय्
 SF दिग्धविद्धाम् इव मादय इति
एमाममूं मयीति ॥ ९ ॥
 SF इमाम् अमूम् मयि इति

मन्त्र १० [VI.iv.10]

अथ यामिच्छेन्
 SF अथ याम् इच्छेत्
न गर्भं दधीतेति
 SF न गर्भम् दधीत इति
तस्यामर्थं निष्ठाय
 SF तस्याम् अर्थम् निष्ठाप्य निष्ठाय
मुखेन मुखꣳ संधायाभिप्राण्यापान्याद्
 SF मुखेन मुखम् संधाय अभिप्राण्य अपान्यात्
इन्द्रियेण ते रेतसा रेत आदद
 SF इन्द्रियेण ते रेतसा रेतस् आददे
इत्यरेता एव भवति ॥ १० ॥
 SF इति अरेतास् एव भवति

मन्त्र ११ [VI.iv.11]

अथ यामिच्छेद्
 SF अथ याम् इच्छेत्
दधीतेति
 SF गर्भम् दधीत इति
तस्यामर्थं निष्ठाय
 SF तस्याम् अर्थम् निष्ठाप्य निष्ठाय
मुखेन मुखꣳ संधायापान्याभिप्राण्याद्
 SF मुखेन मुखम् संधाय अपान्य अभिप्राण्यात्
इन्द्रियेण ते रेतसा रेत आदधामीति
 SF इन्द्रियेण ते रेतसा रेतस् आदधामि इति
गर्भिण्येव भवति ॥ ११ ॥
 SF गर्भिणी एव भवति

मन्त्र १२ [VI.iv.12]

अथ यस्य जायायै जारः स्यात्
 SF अथ यस्य जायायै जारस् स्यात्
तं चेद् द्विष्याद्
 SF तम् चेद् द्विष्यात्
आमपात्रेऽग्निमुपसमाधाय
 SF अमपात्रे अग्निम् उपसमाधाय
प्रतिलोमꣳ शरबर्हिस्तीर्त्वा
 SF प्रतिलोमम् शरबर्हिस् स्तीर्त्वा
तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाऽक्ता जुहुयान्
 SF तस्मिन् एतास् शरभृष्टीस् प्रतिलोमास् सर्पिषा
 अक्तास् जुहुयात्
मम समिद्धेऽहौषीः
 SF मम समिद्धे अहौषीस्
प्राणापानौ त आददे
 SF प्राणापानौ ते आददे
ऽसाविति ।
 SF असौ इति
मम समिद्धेऽहौषीः
 SF मम समिद्धे अहौषीस्
पुत्रपशूꣳस्त आददे
 SF पुत्रपशून् ते आददे
ऽसाविति ।
 SF असौ इति
मम समिद्धेऽहौषीर्
 SF मम समिद्धे अहौषीस्
इष्टासुकृते त आददे
 SF इष्टासुकृते ते आददे

ऽसाविति ।
 SF असौ इति
मम समिद्धेऽहौषीर्
 SF मम समिद्धे अहौषीस्
आशापराकाशौ त आददे
 SF अशापराकाशौ ते आददे
ऽसाविति ।
 SF असौ इति
स वा एष निरिन्द्रियो विसुकृतोऽस्माल्लोकात्प्रैति
 SF स वै एष निरिन्द्रियस् विसुकृतस् अस्माद् लोकाद्
 प्रैति
यमेवंविद्ब्राह्मणः शपति ।
 SF यम् एवंविद् ब्राह्मणस् शपति
तस्मादेवंवित्छ्रोत्रियस्य दारेण नोपहासमिच्छेद्
 SF तस्माद् एवंवित्श्रोत्रियस्य दारेण न उपहासम् इच्छेत्
उत ह्येवंवित्परो भवति ॥१२ ॥
 SF उत हि एवंविद् परस् भवति

मन्त्र १३ [VI.iv.13]

अथ यस्य जायामार्तवं विन्देत्
 SF अथ यस्य जायाम् आर्तवम् विन्देत्
त्र्यहं कꣳसे न पिबेदहतवासा
 SF त्र्यहम् कꣳसे न पिबेत् अहतवासास्
नैनां वृषलो
 SF न एनाम् वृषलस्
न वृषल्युपहन्यात् अपहन्यात्
 SF न वृषली उपहन्यात् अपहन्याद्
त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥१३ ॥
 SF त्रिरात्रान्ते अप्लूय अप्लुत्य व्रीहीन् अवघातयेद्

मन्त्र १४ [VI.iv.14]

स य इच्छेत्
 SF स यस् इच्छेत्
पुत्रो मे शुक्लो जायेत
 SF पुत्रस् मे गौरस् शुक्लस् जायेत
वेदमनुब्रुवीत
 SF वेदम् अनुब्रुवीत
सर्वमायुरियादिति
 SF सर्वम् आयुस् इयात् इति
क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्
 SF क्षीरौदनम् पाचयित्वा सर्पिष्मन्तम् अश्नीयाताम्
ईश्वरौ जनयितवै ॥१४ ॥
 SF ईश्वरौ जनयितवै

मन्त्र १५ [VI.iv.15]

अथ य इच्छेत्
 SF अथ यस् इच्छेत्
पुत्रो मे कपिलः पिङ्गलो जायेत
 SF पुत्रस् मे कपिलस् पिङ्गलस् जायेत
द्वौ वेदावनुब्रुवीत
 SF द्वौ वेदौ अनुब्रुवीत
सर्वमायुरियादिति
 SF सर्वम् आयुस् इयात् इति
दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्
 SF दध्योदनम् पाचयित्वा सर्पिष्मन्तम् अश्नीयाताम्
ईश्वरौ जनयितवै ॥१५ ॥
 SF ईश्वरौ जनयितवै

मन्त्र १६ [VI.iv.16]

अथ य इच्छेत्
 SF अथ यस् इच्छेत्
पुत्रो मे श्यामो लोहिताक्षो जायेत
 SF पुत्रस् मे श्यामस् लोहिताक्षस् जायेत
त्रीन्वेदाननुब्रुवीत
 SF त्रीन् वेदान् अनुब्रुवीत
सर्वमायुरियादित्य्
 SF सर्वम् आयुस् इयात् इति
उदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्
 SF उदौदनम् पाचयित्वा सर्पिष्मन्तम् अश्नीयाताम्
ईश्वरौ जनयितवै ॥१६ ॥
 SF ईश्वरौ जनयितवै

मन्त्र १७ [VI.iv.17]

अथ य इच्छेद्
 SF अथ यस् इच्छेत्
दुहिता मे पण्डिता जायेत
 SF दुहिता मे पण्डिता जायेत
सर्वमायुरियादिति
 SF सर्वम् आयुस् इयात् इति
तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्
 SF तिलौदनम् पाचयित्वा सर्पिष्मन्तम् अश्नीयाताम्
ईश्वरौ जनयितवै ॥१७ ॥
 SF ईश्वरौ जनयितवै

मन्त्र १८ [VI.iv.18]

अथ य इच्छेत्

SF अथ यस् इच्छेत्
पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां
वाचं भाषिता जायेत
SF पुत्रस् मे पण्डितस् विजिगीथस् विगीतस् समितिंगमस्
शुश्रूषिताम् वाचम् भाषिता जायेत
सर्वान्वेदाननुब्रुवीत
SF सर्वान् वेदान् अनुब्रुवीत
सर्वमायुरियादिति
SF सर्वम् आयुस् इयात् इति
माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्
SF माꣳसौदनम् पाचयित्वा सर्पिष्मन्तम् अश्नीयाताम्
ईश्वरौ जनयितवै ।
SF ईश्वरौ जनयितवै
औक्षेण वाऽऽर्षभेण वा ॥ १८ ॥
SF औक्ष्णेण औक्षेण वा आर्षभेण वा

मन्त्र १९ [VI.iv.19]

अथाभिप्रातरेव स्थालीपाकावृताऽऽज्यं चेष्टित्वा
SF अथ अभिप्रातरेव स्थालीपाकावृता आज्यम् चेष्टित्वा
स्थालीपाकस्योपघातं जुहोत्य्
SF स्थालीपाकस्य उपघातम् जुहोति
अग्नये स्वाहा
SF अग्नये स्वाहा
ऽनुमतये स्वाहा
SF अनुमतये स्वाहा
देवाय सवित्रे सत्यप्रसवाय स्वाहेति
SF देवाय शवित्रे सत्यप्रसवाय स्वाह इति
हुत्वोद्धृत्य प्राश्नाति ।
SF हुत्वा उद्धृत्य प्राश्नाति
प्राश्येतरस्याः प्रयच्छति ।
SF प्राश्य इतरस्यास् प्रयच्छति
प्रक्षाल्य पाणी
SF प्रक्षाल्य पाणी
उदपात्रं पूरयित्वा
SF उदपात्रम् पूरयित्वा
तेनैनां त्रिरभ्युक्षत्य्
SF तेन एनाम् त्रिस् अभ्युक्षति
उत्तिष्ठातो
SF उत्तिष्ठ अतस्
विश्वावसो
SF विश्वावसो
ऽन्यामिच्छ प्रपूर्व्याꣳ
SF अन्याम् इच्छ प्रपूर्व्याम्
सं जायां पत्या सहेति ॥ १९ ॥
SF सम् जायाम् पत्या सह इति

मन्त्र २० [VI.iv.20]

अथैनामभिपद्यते
SF अथ एनाम् अभिपद्यते
ऽमोऽहमस्मि
SF अमस् अहम् अस्मि
सा त्वꣳ
SF सा त्वम्
सा त्वमस्य्
SF सा त्वम् असि
अमोऽहꣳ
SF अमस् अहम्
सामाहमस्मि
SF साम अहम् अस्मि
ऋक्त्वम्
SF ऋक् त्वम्
द्यौरहम्
SF द्यौस् अहम्
पृथिवी त्वं ।
SF पृथिवी त्वम्
तावेहि सꣳरभावहै
SF तौ एहि सꣳरभावहै
सह रेतो दधावहै
SF सह रेतस् दधावहै
पुꣳसे पुत्राय वित्तय इति ॥ २० ॥
SF पुꣳसे पुत्राय वित्तये इति

मन्त्र २१ [VI.iv.21]

अथास्या ऊरू विहापयति
SF अथ अस्यै ऊरू विहापयति
विजिहीथां द्यावापृथिवी इति ।
SF विजिहीथाम् द्यावापृथिवी इति
तस्यामर्थं निष्ठाय
SF तस्याम् अर्थम् निष्ठाप्य निष्ठाय
मुखेन मुखꣳ संधाय
SF मुखेन मुखम् संधाय
त्रिरेनामनुलोमामनुमार्ष्टि
SF त्रिस् एनाम् अनुलोमाम् अनुमार्ष्टि
विष्णुर्योनिं कल्पयतु
SF विष्णुस् योनिम् कल्पयतु
त्वष्टा रूपाणि पिꣳशतु
SF त्वष्टा रूपाणि पिंशतु
आसिञ्चतु प्रजापतिर्
SF असिन्चतु प्रजापतिस्

धाता गर्भं दधातु ते ।
 SF धाता गर्भम् दधातु ते
गर्भं धेहि
 SF गर्भम् धेहि
सिनीवालि
 SF शिनीवालि
गर्भं धेहि
 SF गर्भम् धेहि
पृथुष्टुके ।
 SF पृथुष्टुके
गर्भं ते आश्विनौ देवाव्
 SF गर्भम् ते आश्विनौ देवौ
आधत्तां पुष्करस्रजौ ॥ २१ ॥
 SF अधत्ताम् पुष्करस्रजौ

मन्त्र २२ [VI.iv.22]

हिरण्मयी अरणी
 SF हिरण्यनी हिरण्मयी अरणी
याभ्यां निर्मन्थतामाश्विनौ
 SF याभ्याम् निर्मन्थताम् आश्विनौ देवौk OM.
तं ते गर्भꣳ हवामहे
 SF तम् ते गर्भम् हवामहे
दशमे मासि सूतये ।
 SF दशमे मासि सूतवे सूतये
यथाऽग्निगर्भा पृथिवी
 SF यथा अग्निगर्भा पृथिवी
यथा द्यौरिन्द्रेण गर्भिणी
 SF यथा द्यौस् ९न्द्रेण गर्भिणी
वायुर्दिशां यथा गर्भ
 SF वायुस् दिशाम् यथा गर्भस्
एवं गर्भं दधामि ते
 SF एवम् गर्भम् दधामि ते
ऽसाविति ॥ २२ ॥
 SF असौ इति नाम गृह्णातिk OM. नाम

मन्त्र २३ [VI.iv.23]

सोष्यन्तीमद्भिरभ्युक्षति
 SF सोष्यन्तीम् अद्भिस् अभ्युक्षति
यथा वायुः पुष्करिणीꣳ
 SF यथा वातस् वायुस् पुष्करिणीम्
समिङ्गयति सर्वतः ।
 SF समिङ्गयति सर्वतस्
एवा ते गर्भ एजतु
 SF एव आ ते गर्भस् एजतु
सहावैतु जरायुणा ।
 SF सह अवैतु जरायुणा
इन्द्रस्यायं व्रजः कृतः
 SF ९न्द्रस्य अयम् व्रजस् कृतस्
सार्गलः सपरिश्रयः ।
 SF सार्गलस् सपरिश्रयः
तम्
 SF तम्
ईन्द्र
 SF ईन्द्र
निर्जहि
 SF निर्जहि
गर्भेण सावराꣳ सहेति ॥ २३ ॥
 SF गर्भेण सावराम् सह इति

मन्त्र २४ [VI.iv.24]

जातेऽग्निमुपसमाधायाङ्क आधाय
 SF जाते अग्निम् उपसमाधाय अङ्के आधाय
कꣳसे पृषदाज्यꣳ संनीय
 SF कꣳसे पृषदाज्यम् संनीय
पृषदाज्यस्योपघातं जुहोत्य्
 SF पृषदाज्यस्य उपघातम् जुहोति
अस्मिन्सहस्रं पुष्यासम्
 SF अस्मिन् सहस्रम् पुष्यासम्
एधमानः स्वे गृहे ।
 SF एधमानस् स्वगृहे स्वे गृहे
अस्योपसन्द्यां मा च्छैत्सीत्
 SF अस्य उपसद्याम् उपसन्द्याम् मा छैत्सीत्
प्रजया च पशुभिश्च
 SF प्रजया च पशुभिस् च
स्वाहा ।
 SF स्वाहा
मयि प्राणाꣳस्त्वयि मनसा जुहोमि
 SF मयि प्राणान् त्वयि मनसा जुहोमि
स्वाहा ।
 SF स्वाहा
यत् कर्मणाऽत्यरीरिचम्
 SF यद् कर्मणा अत्यरीरिचम्
यद्वा न्यूनमिहाकरम् ।
 SF यद् वा न्यूनम् इह अकरम्
अग्निष्टत्स्विष्टकृद्विद्वान्
 SF अग्निस् तद् स्विष्टकृत् विद्वान्
स्विष्टꣳ सुहुतं करोतु नः
 SF स्विष्टम् सुहुतम् करोतु नस्
स्वाहेति ॥ २४ ॥

SF स्वाहा इति

मन्त्र २५ [VI.iv.25]

अथास्य दक्षिणं कर्णमभिनिधाय
SF अथ अस्य दक्षिणम् कर्णम् अभिनिधाय
वाग्वागिति त्रिर्
SF वाक् वाक् इति त्रिस्
अथ
SF अथ
दधि मधु घृतꣳ संनीयानन्तर्हितेन जातरूपेण प्राशयति ।
SF दधि मधु घृतम् संनीय अनन्तर्हितेन जातरूपेण प्राशयति
भूस्ते दधामि
SF भूस् ते दधामि
भुवस्ते दधामि
SF भुवस् ते दधामि
स्वस्ते दधामि
SF स्वर् ते दधामि
भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ २५ ॥
SF भूस् भुवस् स्वर् सर्वम् त्वयि दधामि इति

मन्त्र २६ [VI.iv.26]

अथास्य नाम करोति
SF अथ अस्य नाम करोति
वेदोऽसीति ।
SF वेदस् असि इति
तदस्यैतद्गुह्यमेव नाम भवति ॥ २६ ॥
SF तद् अस्य एतद् गुह्यम् एव नाम भवति

मन्त्र २७ [VI.iv.27]

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति
SF अथ एनम् मात्रे प्रदाय स्तनम् प्रयच्छति
यस्ते स्तनः शशयो यो मयोभूर्
SF यस् ते स्तनस् शशयस् यस् मयोभूस्
यो रत्नधा वसुविद्यः सुदत्रो
SF यस् रत्नधा वसुविद् यस् सुदत्रस्
येन विश्वा पुष्यसि वार्याणि
SF येन विश्वा पुष्यसि वार्याणि
सरस्वति
SF शरस्वति
तमिह धातवे करिति ॥ २७ ॥
SF तम् इह धातवे कर् इति

मन्त्र २८ [VI.iv.28]

अथास्य मातरमभिमन्त्रयते ।
SF अथ अस्य मातरम् अभिमन्त्रयते
इलाऽसि मैत्रावरुणी
SF ९डा असि मैत्रावरुणी
वीरे वीरमजीजनत् ।
SF वीरे वीरम् अजीजनथास् अजीजनत्
सा त्वं वीरवती भव
SF सा त्वम् वीरवती भव
याऽस्मान्वीरवतोऽकरदिति ।
SF या अस्मान् वीरवतस् अकरत् इति
तं वा एतमाहुर्
SF तम् वै एतम् आहुर्
अतिपिता बताभूर्
SF अतिपिता बत अभूस्
अतिपितामहो बताभूः ।
SF अतिपितामहस् बत अभूस्
परमां बत काष्ठां प्रापयच्छ्रिया यशसा ब्रह्मवर्चसेन
SF परमाम् बत काष्ठाम् प्राप श्रिया यशसा ब्रह्मवर्चसेन
य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥ इति चतुर्थं ब्राह्मणम् ॥
SF यस् एवंविदस् ब्राह्मणस्य पुत्रस् जायते इति

पञ्चमं ब्राह्मणम्

मन्त्र १ [VI.v.1]

अथ वꣳशः ।
SF अथ वꣳशस्
पौतिमाषीपुत्रः कात्यायनीपुत्रात्
SF पौतिमाषीपुत्रस् कात्यायनीपुत्राद्
कात्यायनीपुत्रो गौतमीपुत्राद्
SF कात्यायनीपुत्रस् गौतमीपुत्राद्
गौतमीपुत्रो भारद्वाजीपुत्राद्
SF गौतमीपुत्रस् भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पाराशरीपुत्रात्
SF भारद्वाजीपुत्रस् पाराशरीपुत्राद्
पाराशरीपुत्र औपस्वस्तीपुत्राद्
SF पाराशरीपुत्रस् आउपस्वस्तीपुत्राद्
औपस्वस्तीपुत्रः पाराशरीपुत्रात्
SF औपस्वस्तीपुत्रस् पाराशरीपुत्राद्
पाराशरीपुत्रः कात्यायनीपुत्रात्

SF पाराशरीपुत्रस् कात्यायनीपुत्राद्
कात्यायनीपुत्रः कौशिकीपुत्रात्
SF कात्यायनीपुत्रस् कौशिकीपुत्राद्
कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च
SF कौशिकीपुत्रस् आलम्बीपुत्राद् च वैयाघ्रपदीपुत्राद् च
वैयाघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च
SF वैयाघ्रपदीपुत्रस् काण्वीपुत्राद् च कापीपुत्राद् च
कापीपुत्रः ॥ १ ॥
SF कापीपुत्रस्

मन्त्र २ [VI.v.2]

आत्रेयीपुत्राद्
SF अत्रेयीपुत्राद्
आत्रेयीपुत्रो गौतमीपुत्राद्
SF अत्रेयीपुत्रस् गौतमीपुत्राद्
गौतमीपुत्रो भारद्वाजीपुत्राद्
SF गौतमीपुत्रस् भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पाराशरीपुत्रात्
SF भारद्वाजीपुत्रस् पाराशरीपुत्राद्
पाराशरीपुत्रो वात्सीपुत्राद्
SF पाराशरीपुत्रस् वात्सीपुत्राद्
वात्सीपुत्रः पाराशरीपुत्रात्
SF वात्सीपुत्रस् पाराशरीपुत्राद्
पाराशरीपुत्रो वार्कारुणीपुत्राद्
SF पाराशरीपुत्रस् वार्कारुनीपुत्राद्
वार्कारुणीपुत्रो वार्कारुणीपुत्राद्
SF वार्कारुणीपुत्रस् वार्कारुणीपुत्राद्
वार्कारुणीपुत्र आर्तभागीपुत्राद्
SF वार्कारुणीपुत्रस् अर्तभागीपुत्राद्
आर्तभागीपुत्रः शौङ्गीपुत्राच्
SF अर्तभागीपुत्रस् हौङ्गीपुत्राद्
चौङ्गीपुत्रः साङ्कृतीपुत्रात्
SF हौङ्गीपुत्रस् शान्कृतिपुत्राद्
साङ्कृतीपुत्र आलम्बायनीपुत्राद्
SF शाङ्कृतिपुत्रस् अलम्बायनीपुत्राद्
आलम्बायनीपुत्र आलम्बीपुत्राद्
SF अलम्बायनीपुत्रस् अलम्बीपुत्राद्
आलम्बीपुत्रो जायन्तीपुत्राज्
SF अलम्बीपुत्रस् जायन्तीपुत्राद्
जायन्तीपुत्रो माण्डूकायनीपुत्रान्
SF जायन्तीपुत्रस् माण्डूकायनीपुत्राद्
माण्डूकायनीपुत्रो माण्डूकीपुत्रान्
SF माण्डूकायनीपुत्रस् माण्डूकीपुत्राद्
माण्डूकीपुत्रः शाण्डिलीपुत्राच्
SF माण्डूकीपुत्रस् हाण्डिलीपुत्राद्
छाण्डिलीपुत्रो राथीतरीपुत्राद्
SF हाण्डिलीपुत्रस् राथीतरीपुत्राद्
राथीतरीपुत्रो भालुकीपुत्राद्
SF राथीतरीपुत्रस् भालुकीपुत्राद्
भालुकीपुत्रः क्रौञ्चिकीपुत्राभ्यां
SF भालुकीपुत्रस् क्रौञ्चिकीपुत्राभ्याम्
क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्
SF क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्
वैदभृतीपुत्रः कार्शकेयीपुत्रात्
SF वैदभृतीपुत्रस् कार्शकेयीपुत्राद्
कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्
SF कार्शकेयीपुत्रस् प्राचीनयोगीपुत्राद्
प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्
SF प्राचीनयोगीपुत्रस् साञ्जीवीपुत्राद्
साञ्जीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः
SF साञ्जीवीपुत्रस् प्राश्नीपुत्राद् असुरिवासिनस्
प्राश्नीपुत्र आसुरायणाद्
SF प्राश्नीपुत्रस् असुरायणाद्
आसुरायण आसुरेर्
SF असुरायणस् असुरेस्
आसुरिः ॥ २ ॥
SF असुरिस्

मन्त्र ३ [VI.v.3]

याज्ञवल्क्याद्
SF याज्ञवल्क्याद्
याज्ञवल्क्य ऊद्दालकाद्
SF याज्ञवल्क्यस् ऊद्दालकाद्
ऊद्दालकोऽरुणाद्
SF ऊद्दालकस् आरुणाद्
अरुण उपवेशेर्
SF अरुणस् ऊपवेशेस्
उपवेशिः कुश्रेः
SF ऊपवेशिस् कुश्रेस्
कुश्रिर्वाजश्रवसो
SF कुश्रिस् वाजश्रवसस्
वाजश्रवा जीह्वावतो बाध्योगाज्
SF वाजश्रवास् जीह्वावतस् बाध्योगाद्
जीह्वावान्बाध्योगोऽसितादार्षगणाद्
SF जीह्वावान् बाध्योगस् आसिताद् वार्षगणाद्
असितो वार्षगणो हरितात्कश्यपाद्
SF असितस् वार्षगणस् हरिताद् कश्यपाद्
हरितः कश्यपः शिल्पात्कश्यपाच्
SF हरितस् कश्यपस् हिल्पात् कश्यपाद्
छिल्पः कश्यपः कश्यपान्नैध्रुवेः

SF हिल्पस् कश्यपस् कश्यपान् नैध्रुवेस्
कश्यपो नैध्रुविर्वाचो
SF कश्यपस् नैध्रुविस् वाचस्
वागम्भिण्याः
SF वाक् आम्भिण्यास्
अम्भिण्यादित्याद्
SF अम्भिणी आदित्याद्
आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन
याज्ञवल्क्येनाऽऽख्यायन्ते ॥ ३ ॥
SF आदित्यानि इमानि शुक्लानि यजूंषि वाजसनेयेन
याज्ञवल्क्येन आख्यायन्ते

मन्त्र ४ [VI.v.4]

समानमा साञ्जीवीपुत्रात्
SF शमानम् आ साञ्जीवीपुत्राद्
सञ्जिवीपुत्रो माण्डूकायनेर्
SF सञ्जिवीपुत्रस् माण्डूकायनेस्
माण्डूकायनिर्माण्डव्यान्
SF माण्डूकायनिस् माण्डव्याद्
माण्डव्यः कौत्सात्
SF माण्डव्यस् कौत्साद्
कौत्सो माहित्थेर्
SF कौत्सस् माहित्थेस्
माहित्थिर्वामकक्षायणाद्
SF माहित्थिस् वामकक्षायणाद्
वामकक्षायणः शाण्डिल्याच्
SF वामकक्षायणस् शाण्डिल्याद्
छाण्डिल्यो वात्स्याद्
SF हाण्डिल्यस् वात्स्याद्
वात्स्यः कुश्रेः
SF वात्स्यस् कुश्रेस्
कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्
SF कुश्रिस् यज्ञवचसस् राजस्तम्बायनाद्
यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्
SF यज्ञवचा राजस्तम्बायनस् तुराद् कावषेयाद्
तुरः कावषेयः प्रजापतेः
SF तुरस् कावषेयस् प्रजापतेस्
प्रजापतिर्ब्रह्मणो
SF प्रजापतिस् ब्रह्मणस्
ब्रह्म स्वयंभु ।
SF ब्रह्म स्वयंभु
ब्रह्मणे नमः ॥ ४ ॥ इति पञ्चमं ब्राह्मणम् ॥
SF ब्रह्मणे नमस्

इति बृहदारण्यकोपनिषदि षष्ठोऽध्यायः ॥

इति वाजसनेयके बृहदारण्यकोपनिषत्समाप्ता ॥

---

Please send corrections to sanskrit@cheerful.com
Last updated January 5, 2000